ISSN: 2249-538X

# वाक्यार्थभारती

अङ्कः – ६ वर्षम् २०१५-१६

नवशृङ्खला

**प्रधानसम्पादकः**

**आचार्यः ए. पि. सच्चिदानन्दः**

**सम्पादकाः**

आचार्य महाबलेश्वर पि. भट्टः

डा. रामचन्द्रुल बालाजि

डा. चन्द्रशेखरभट्टः

डा. हरिप्रसादः के.

योऽनूचानः स नो महान्।

राष्ट्रियसंस्कृतसंस्थानम्

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९

# वाक्यार्थभारती

**(नवशृङ्खला, अङ्कः – ६, वर्षम् – २०१५-१६)**

**प्रधानसम्पादकः**

**प्रो. ए. पि. सच्चिदानन्दः**

**सम्पादकाः**

आचार्य महाबलेश्वर पि. भट्टः

डा. रामचन्द्रुल बालाजी

डा. चन्द्रशेखरभट्टः

डा. हरिप्रसादः के.

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा "A" श्रेण्याङ्कितम्

राजीवगान्धीपरिसरः

शृङ्गेरी-577139

| | | |
|---|---|---|
| **Title** | : | Vākyārthabhāratī |
| **Chief Editor** | : | **Prof. A.P. Sachidanada** |
| **Editors** | : | **Prof. Mahabaleshwara P. Bhat** |
| | | **Dr. Ramachandrula Balaji** |
| | | **Dr. Chandrashekhara Bhat** |
| | | **Dr. Hariprasad K.** |
| **©Copyright** | : | **Publisher** |
| **Published by** | : | |

**Principal**
**RASHTRIYA SANSKRIT SANSTHAN**
**(Deemed University under MHRD, Govt. of India)**
**RAJIV GANDHI CAMPUS**
**SRINGERI-577 139 (Karnataka)**
**www.sringericampus.ac.in**

| | | |
|---|---|---|
| **E-Mail** | : | **principal_rgc@hotmail.com** |
| **Year** | : | **2017** |
| **ISSN** | : | **2249-538X** |
| **Copies** | : | **150** |
| **Page Design** | : | **Pruthviraj K. R.** |
| **Cover Page** | : | **Raveesha N.** |
| **Printed at** | : | **SRI SIRI ENTERPRISES, Sringeri.** |

प्रो. पि. एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
( 'ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त )

Prof. P. N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)



# शुभं संदिशामः

"तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ" इति भगवान् श्रीकृष्णः अर्जुनं निमित्तीकृत्य जगतीतले संसरतां सर्वेषां संसारिणां कर्तव्याकर्तव्यविषये शास्त्रमेव प्रमाणं प्रोवाच। शास्त्रानुसारेण प्रवर्तने श्रेयःप्राप्तिः। इतरथा दुर्गतिः। शास्त्राणि समग्राणि संस्कृतभारत्याभूषितानि। अत एव शास्त्रसंस्कृतयोः प्रचुरप्रचारमुखेन **भारतीयसनातनसंस्कृतेः** संरक्षणाय राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितम् यस्य ध्येयं वचः **योऽनूचानः स नो महान्** इति । सम्प्रति त्रयोदशपरिसरैः संवलितं संस्थानं भारते सर्वत्र विदेशेषु च विश्रुतम्। अस्याः संस्थायाः अन्यतमः राजीवगान्धीपरिसरः कर्नाटके पुण्यक्षेत्रे शृङ्गगिरौ विलसति यश्च जगद्गुरु श्री श्री भारतीतीर्थमहास्वामिनां दिव्यानुग्रहेण सर्वेषु परिसरेषु विशिष्टं स्थानं भजते । जिज्ञासवश्छात्राः पठन्ति। अध्यापकाः परिनिष्ठिततया पाठयन्ति।

प्रतिवर्षमिव अस्मिन्नपि वर्षे छात्राणाम् अध्यापकानाञ्च बुद्धिविकासाय समायोजितानां मासिकानाम् अध्यापकवाक्यार्थानां, शारदाविशिष्टव्याख्यानमालायां प्रथितकीर्तिभिः पण्डितैः उपन्यस्तानां व्याख्यानानां च सङ्ग्रहः **"वाक्यार्थभारती"** ग्रन्थरूपेण प्रकाशयिष्यत इति महतः प्रमोदस्य विषयः। सेयं वाक्यार्थभारती समेषां विदुषां हस्ते विलसतु। जिज्ञासून् छात्रान् प्रेरयतु। समेधतां परिसरः।

जीयात् गीर्वाणभारती।

( आचार्य परमेश्वरनारायणशास्त्री )
कुलपतिः

56-57, Institutional Area, Janakapuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995, E-Mail: rskspvc@yahoo.com

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139



# “शास्त्रसपर्या तनुतान्मनोज्ञा”

“व्यशेम देवहितं यदायुः” इति भगवती श्रुतिरस्मान् उपदिशति यत् मानुषं जन्म समासाद्य मनुष्यैः इतरजन्तूनामपेक्षया ईश्वरीयगुणान् अवाप्तुं देवहितकार्यसाधने च यत्नशीलैर्भाव्यमिति, तन्मनसि निधाय प्राञ्चो मनीषिणस्तपस्विनो महर्षयो वेदवेद्यविचारान् आकलय्य शास्त्राणि निर्ममिरे । तेषामध्ययनमन्तरा पुरुषार्थानामवाप्तिः कथमपि न सम्भवतीत्यत्र नास्ति संशीतिलेशः। एतल्लक्ष्यपूरणे राष्ट्रियसंस्कृतसंस्थानं शास्त्राणां संरक्षणे विकसने च बद्धादरं सत् निष्प्रत्यूहं कार्यरतमस्ति।

शास्त्राणामध्ययनाध्यापनाभ्याम् अस्मत्परिसरीयाः नानाशास्त्रनदीष्णाः समेऽपि प्राध्यापकाः वाक्यार्थपरिषत्सु च्छात्राणामुपयोगाय वैदुष्यपूर्णव्याख्यानानि विधाय तल्लेखमुखेन समुपस्थापयन्ति इत्ययं विषयः शास्त्रसपर्यायाः वैभवं व्यनक्ति । देशे प्रथितयशस्कानां विद्वत्पूर्णशास्त्रोपस्कृतसुन्दरगिरां समुपासनार्थं शारदाविशिष्टव्याख्यानमाला अपि कल्पिता वर्तते। तत्र बहवो हि विदितवेदितव्या विद्वांसः प्रागल्भ्यवाक्पाटवं सरसमुपन्यस्य विदुषां च्छात्राणां च पूर्वपक्षाणां समाधानान्युपस्थाप्य लेखबद्धतया वाक्यार्थसारं प्रादुरित्यपि हर्षप्रकर्षः । सम्प्रति परिसरप्राध्यापकानां समागतानां विद्वन्मतल्लिकानां च प्रवृत्तवाक्यार्थसङ्ग्रहान्

पुस्तकरूपेण मुद्रयित्वा सफलीकृतवन्तो विद्वांस आचार्याः महाबलेश्वर पि. भट्टवर्याः, डा. रामचन्द्रुल बालाजिवर्याः, डा. चन्द्रशेखरभट्टवर्याः, डा. के. हरिप्रसादवर्याश्च अवश्यम् अभिनन्दनीयाः । कार्येऽस्मिन् सततमस्मान् प्रेरयन्ति प्रवर्तयन्ति विविधशास्त्रमर्मज्ञाः प्रशासनपटवश्च आचार्याः परमेश्वर-नारायणशास्त्रिवर्याः तेभ्यः प्रणामपुरस्सरं कार्तज्ञ्यं बिभर्मि।

अस्मत्कुलसचिवानां कृपया वाक्यार्थनिबन्धमालेऽयम् आविष्क्रियत इति विद्वद्भ्यः आचार्येभ्यः एस्. सुब्रह्मण्यशर्मवर्येभ्यः प्रणामाञ्जलिं समर्पयामः। एतादृशवाक्यार्थप्रसूनानां विकसने स्वीयैः अनुग्रहविशेषैः अस्माकं सर्वतोभिमुखाभिवृद्धिं कामयन्ते **जगद्गुरवः श्री श्री भारतीतीर्थमहास्वामिनः** एवं तत्करकमलसञ्जाताः **जगद्गुरवः श्री श्री विधुशेखरभारतीतीर्थमहास्वामिनश्च**, अतस्तेषाम् उभयेषां चरणनलिनेषु सभक्तिश्रद्धं साष्टाङ्गप्रणामान् निवेदयामहे । **क्षेत्राधिष्ठात्र्याः वाग्देव्याः शारदाम्बायाः** पादारविन्दयोः प्रणतिततीः वितन्महे।

**इत्थं विद्वज्जनविधेयः**

ए. पी. सच्चिदानन्दः

आचार्यः ए. पि. सच्चिदानन्दः

(प्राचार्यः)

# सम्पादकीयम्

"शमार्थं सर्वशास्त्राणि प्रणीतानि महर्षिभिः" इत्यभियुक्तोक्त्याऽनवरतं लोककल्याणार्थं तपस्यद्भिः परमकारुणिकैर्महर्षिभिः लौकिकानामस्मदादीनां मनसः शमार्थं भगवतो वेदस्य तात्पर्यनिर्णायकानि शास्त्राणि प्राणीयन्त। तत्रैकस्यैव शास्त्रस्यानुष्ठानेन मनःशान्तावुपलभ्यमानायामपि भिन्नरुचीनां जननां समुद्धरणाय नैकविधानि शास्त्राणि प्रावर्त्यन्त । वेदोक्तो धर्माधर्मविवेकः शास्त्रैकगम्यः शास्त्रानुमतानुष्ठानतत्परशिष्टव्यवहारानुगम्यश्च । उभयथा शास्त्रज्ञानमेव परमं प्रमाणम् । तदर्थज्ञानं शास्त्राणामामूलाग्रोपासनेनैव सम्भवतीति न तिरोहितम् । एकस्य शास्त्रस्यापादचूडमिदमित्थमिति ज्ञानं शास्त्रान्तरपरिज्ञानं विना न सम्भवति । उक्तं च **काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्** इति । न ह्यनधीतपदशास्त्रः प्रमाणशास्त्रे, अनासादितप्रमाणशास्त्रो वाक्यशास्त्रे, अनधिगतवाक्यशास्त्रो वेदान्तशास्त्रेऽधिकारी भवति। एवमनुपासितशास्त्रनिचयस्य काव्ये प्रवेशो दुष्करः। अनाघ्रातकाव्यगन्धस्यापि शास्त्रे प्रवेशो व्यर्थ एव स्यात् । अतः सर्वेषामपि शास्त्राणां परिचयः अनिवार्यः।"**प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः**" इत्याह भर्तृहरिः। परं सर्वेषामपि शास्त्राणां गुरुमुखादेवाध्ययने महान्काल आवश्यकः स्यात्।तदुक्तं महाभाष्यकारेण "चतुर्भिश्च प्रकारैः विद्या उपयुक्ता भवति आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति। यः सर्वथा चिरं जीवति वर्षशतं जीवति । तत्रागमकालेनैवायुः पर्युपयुक्तं स्यात्" इति। सर्वेषां शास्त्राणामर्थनिर्णयः तदवगमश्च शास्त्रवाक्यार्थचर्चयैव सम्पद्यत इति तादृग्वाक्यार्थगोष्ठ्य एव पारम्परिकशास्त्राध्ययनाध्यापनरतानां विद्यालयानां प्राणा भवन्ति। यद्यपि एकेन शास्त्रेण शास्त्रान्तरीया बहवो विषयाः प्रत्याख्यायन्ते तथापि लक्ष्यं तेषां समानमिति तत्त्वबुभुत्सया विमर्शनेन तत्त्वज्ञानं जायते,येन च सिद्ध्यति बुद्धिवैशद्यं, चित्तशुद्धिः, धर्माधर्मविवेकश्च।

लक्ष्यमिदं मनस्याकलय्य अस्मत्परिसरे अध्येतृणाम् अध्यापयितृणाञ्चोपकाराय शारदाविशिष्टव्याख्यानमाला, वाक्यार्थपरिषद् इति

परिषद्द्वयं पर्यकल्प्यत । राष्ट्रे प्रथितयशसो विदुष आमन्त्र्य विशिष्टं व्याख्यानं व्यवस्थाप्यते शारदाविशिष्टव्याख्यानमालाद्वारा । वाक्यार्थपरिषदा च परिसरीयाध्यापकानां वाक्यार्थसभा प्रतिमासं समायोज्यते । एतत्परिषद्द्वयसञ्चालनोत्तरदायित्वमैषमो वहद्भिरस्माभिः समुपस्थापितवाक्यार्थानां विदुषां सकाशात् प्रबन्धान् सङ्कलय्य "**वाक्यार्थभारती**" इति पत्रिका रजतमहोत्सवस्य शुभावसरे प्राकाश्यं नीयते । यद्यनेन यत्नेन विद्वल्लोकस्तुष्येत्, अध्येतृगणश्च हृष्येत् नूनं तर्हि सफलो नः प्रयासो भवति । स्वीयाशीःपूर्वकसन्देशं प्रदायास्मान् परिसरञ्च सनाथीकृतवद्भ्यो राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिभ्यः आचार्येभ्यः परमेश्वरनरायणशास्त्रिभ्यः सप्रणति धन्यवादान् समर्पयामः। अवसरेस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवेभ्यः आचार्य्येभ्यः सुब्रह्मण्यशर्मभ्यः कार्तज्ञ्यं निवेदयामः। कर्मण्यस्मिन् नोऽनुगृहीतवद्भ्यः, प्रशासनपटुभ्यः परिसरप्राचार्येभ्यः आचार्य ए. पि. सच्चिदानन्दवर्येभ्यः आधमर्ण्यं प्रकटयामः। स्वीयान् प्रबन्धान् समये प्रदाय ग्रन्थप्रकाशने उपकृतवद्भ्यः विद्वद्भ्यः प्रणतिततीः समर्पयामः। ग्रन्थमिमं प्रकाशयितुम् आर्थिकी व्यवस्थां ततवद्भ्यः कार्यालयसदस्येभ्यः धन्यतामाविष्कुर्मः। ग्रन्थस्य अक्षरविन्यासं विधाय सुन्दरं स्वरूपं दत्तवते पृथ्विराजाय, रवीशाय च धन्यवादान् व्याहरामः । सर्वस्यास्य कार्यजातस्य साफल्यं क्षेत्राधिष्ठात्र्याः भगवत्याः शारदामातुः असीमकृपया जगद्गुरूणाम् अप्रकम्प्यानुग्रहेण च प्राप्तमिति **शारदाम्बायाः जगद्गुरूणाञ्च** चरणनलिनेषु साष्टाङ्गप्रणामान् समर्पयामः।

**संयोजकाः**

**आचार्य महाबलेश्वर पि. भट्टः**

**डा. रामचन्द्रुल बालाजी**

**डा. चन्द्रशेखरभट्टः**

**डा. हरिप्रसादः के.**

# संयोजकाः

## वाक्यार्थभारती



आचार्य महाबलेश्वर पि. भट्टः



डा. रामचन्द्रुल बालाजी

## शारदाविशिष्टव्याख्यानमाला



डा. चन्द्रशेखरभट्टः



डा. हरिप्रसादः के.

# विषयानुक्रमणिका

## अद्वैतवेदान्तः


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| 1. उपमानम् | आचार्यः वेम्पटिकुटुम्बशास्त्री | 01 |
| 2. अन्तरधिकरणम् | प्रो. महाबलेश्वर पि. भट्टः | 07 |
| 3. वियदधिकरणम् | डा. गणेश ईश्वर भट्टः | 12 |
| 4. स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम् | श्रीकरः जि.एन् | 20 |
| 5. ज्ञानगतप्रत्यक्षविचारः | डा. गणपति वि. हेगडे | 24 |


## नव्यव्याकरणम्


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| 6. अपवादः | डा.सि.एस्.एस्.नरसिंहमूर्तिः | 29 |
| 7. विशेषणं विशेष्येण बहुलम् | डा.चन्द्रशेखरभट्टः | 37 |
| 8. भोभगो अधो अपूर्वस्य योऽशि | डा. प्रमोद भट्टः | 42 |
| 9. लुटः प्रथमस्य डारौरसः | एल् .सविता आर्या | 46 |


## मीमांसा


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| 10. मीमांसापरिभाषायाः रैखिकप्रतिनिरूपणम् | श्रीमता आचार्यप्यारीमोहनपट्टनायकः | 50 |
| 11. तमः किं द्रव्यम् ? | प्रो. सुब्राय वि. भट्टः | 64 |
| 12. स्मृतिप्रमाणविमर्शः | डा. सूर्यनारायणभट्टः | 71 |
| 13. एकप्रसरताविचारः | डा. वेङ्कटेश ताताचार्यः | 77 |

## नव्यन्यायः


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| 14. न्यायवैशेषिकमतयोः हेत्वाभासभेदविचारः | | |
| | प्रो. राजारामशुक्लः | 81 |
| 15. अन्विताभिधानवादः | आचार्यः मधुसूदनन् | 105 |
| 16. शक्तिविमर्शः | डा. नवीन होळ्ळः | 112 |
| 17. सविषयकार्थकधातुयोगे | | |
| द्वितीयार्थविचारः | विद्वान् श्यामसुन्दरः ए | 124 |
| 18. ईश्वरसङ्केतस्वरूपविचारः | डा.आर . नवीनः | 128 |


## साहित्यम्


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| 19. यः कौमारहर इत्यादिपद्ये अस्फुटालङ्कारविचारः | | |
| | डा. राघवेन्द्रभट्टः | 132 |
| 20. काव्यत्वस्य शब्दार्थोभयनिष्ठत्वम् | डा. चन्द्रकला आर्. कोण्डी | 140 |
| 21. अनौचित्यप्रकारेषु विधेयाविमर्शः | डा. कोम्पेल्लि विनयकुमारः | 147 |
| 22. श्रीमद्रामायणे अङ्गिरसविचारः | डा. श्रीनिवासमूर्तिः | 155 |


## फलितज्यौतिषम्


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| 23. प्रव्रज्यायोगाः | डा. रामकृष्णपेजत्तायः | 162 |
| 24. कर्तृदोषाः | डा. मुरलिकृष्ण टि. | 168 |
| 25. उदयान्तरम् | श्री. अनिरुद्धनारायणशुक्लः | 172 |

## शिक्षाशास्त्रम्


| विषयाः | लेखकाः | पृ.सं. |
|---|---|---|
| 26. निर्देशनमनोविज्ञानम् | डा. चन्द्रकान्तः | 176 |
| 27. स्मृतिः विस्मृतिः (Memory and Forgetting) | डा. रामचन्द्रुल बालाजी | 180 |
| 28. क्रियात्मकानुसन्धानम् - Action Research | डा. हरिप्रसादः के. | 190 |
| 29. स्वप्ने सर्वं प्रतिष्ठितम् | डा. गणेश ति. पण्डितः | 196 |
| 30. पाठयोजना | डा.वेङ्कटरमणभट्टः | 200 |
| 31. प्राक्कल्पना: | डा.नारायण वैद्य | 204 |
| 32. प्राच्यमनोविज्ञानप्रतिष्ठापनम् | डा. प्रमोद कुमार बुटोलिया | 210 |


**********

# उपमानम्

आचार्यः वेम्पटिकुटुम्बशास्त्री

उपमितिर्नाम सादृश्यज्ञानम् । "उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान् रञ्जयन्ती काव्यरङ्गे नृत्यन्ती तद्विदां चेतः" इति अप्पय्यदीक्षितानां वचनम् । त्रिंशत् चत्वारिंशत् अलङ्कारेषु उपमायाः पृष्टभूमिं दर्शयन्तः सुमहतीं व्याख्यां च अकुर्वन् । भारतीयवाङ्मयात् इतरवाङ्मये उपमायाः उपयोगः अधिकतया न दृश्यते । किञ्चित्प्रमाणेन वर्तत एव । परं उपमायाः भेदप्रदर्शन पूर्वकम् इतरवाङ्मयेषु न दृश्यते, यथा भारतीयवाङ्मये वयं द्रष्टुं शक्नुमः ।

सादृश्यदर्शनानुकूलश्चक्षुः केवलं भारतीयेषु अधिकतया दृश्यते इत्यत्र नास्ति संशयः । उदाहरणार्थं गजस्य महिलायाश्च न कोऽपि सम्बन्धः दृश्यते लोके । परं अनयोरपि सम्बन्धं भारतीय चक्षुः पश्यति । गजवत् मन्दं चलति इति गजगमना इति महिलायाः वर्णनं कविः अकरोत् । चन्द्रमिव मुखं, कमलमिव नयनं इत्यादीनि उपमायाः उदाहरणानि भवन्ति ।

प्रथमतया उपमानं प्रमाणत्वेन स्वीकरणीयं न वा इत्येव संशयः । सर्वे अवैदिकदर्शनकाराः उपमानं प्रमाणत्वेन नाङ्ग्यकुर्वन् । वैदिकदर्शनकारेष्वपि साङ्ख्य-योग-वैशेषिकाः उपमानं प्रमाणत्वेन नाङ्गीकृतवन्तः । परिशेषात् नैय्यायिकाः,मीमांसकाः, वेदान्तिनश्च उपमानं प्रमाणत्वेन अङ्ग्यकुर्वन् । तत्र नैय्यायिकमीमांसकमतयोः उपमाननिरूपणं विलक्षणं भवति ।

उपमायाः प्रमाणान्तरत्वं किमर्थं अङ्गीक्रियते इति प्रश्नः । यत्किमपि ज्ञानं अन्यप्रमाणेन असिद्धम् चेत् तत्र प्रमाणान्तरस्य स्वीकारः । नैय्यायिकानां मते संज्ञासंज्ञिसम्बन्धज्ञानं उपमितिः । गवयः गवयपदवाच्यः इति यत् ज्ञानं तत् उपमितिः इति एतेषां मतम् । उपमानप्रमाणं अन्ये किमर्थं न स्वीकृतवन्तः


ISSN: 2249-538X

इति चेत् तैरङ्गीकृतप्रमाणैरेव अयमनुभवः निर्वोढुं शक्यत इति । अत एव उपमानं पृथक्प्रमाणत्वेन अन्यमतैः न स्वीकृतम् । ये च स्वीकुर्वन्ति ते तु अन्यप्रमाणेषु एतस्य अनुभवस्य अन्तर्भावं न कुर्वन्ति ।

एकः आरण्यकः देवदत्तं गोसदृशो गवय इति ब्रूते । एतदेव अतिदेशवाक्यमिति कथ्यते । देवदत्तः प्रदेशान्तरे गोसदृशं पश्यति । तदा आरण्यकेन उक्तवाक्यार्थस्य स्मरणमपि भवति । एतत् अतिदेशवाक्यार्थस्मरणम् । तदा देवदत्तः "गवयः गवयपदवाच्य" इति ज्ञानं प्राप्नोति । एषा एव उपमितिः ।

क्वचित् प्राचीनन्यायग्रन्थेषु वैधर्म्यमुपमितिः इति द्वितीयः प्रकारः अपि दर्शितः । चैत्रः मैत्रं उष्ट्रः गोसदृशः भवति इति वदति । द्वयोरपि तत्र सादृश्यं न दृश्यते । एवं गोः वैसादृश्यं उष्ट्रे प्रतिपादयति । एतत् पूर्वोक्तरीत्या अतिदेशवाक्यं भवति । तदनन्तरं दीर्घग्रीवं, वक्रग्रीवं कञ्चित् जीवं देवदत्तः अवलोकयति । तस्मिन् सन्दर्भे मैत्रः चैत्रस्य वाक्यं स्मरति, उष्ट्रः गोः विसदृशः इति । अनुक्षणमेव मैत्रः वैसादृश्यं स्वतः अनुभवति । अतिदेशवाक्यार्थस्य स्मरणेन ज्ञानमुत्पद्यते ।

तृतीयानुभवप्रकारोऽपि ग्रन्थेषु क्वचिदुक्तः । तत्र चैत्रः मैत्रं प्रति उष्ट्रस्य असाधरणधर्मान् प्रतिपादयति । असाधारणधर्मो नाम केवलं उष्ट्रे एव वर्तमानः धर्मः अन्यजीवेषु अदृश्यमानः । उष्ट्रस्य च असाधारणधर्माः भवन्ति दीर्घग्रीवः, वक्रग्रीवः, विषमपृष्ठः लम्बमान ओष्ठसहितः इति । प्रमुखतया उष्ट्रस्य असाधारणधर्मः भवति कण्टकाहारः इति । कण्टक एव तस्य आहारः इत्यर्थः । एतादृश असाधारणधर्मविशिष्टं जन्तुं कस्मिंश्चित् प्रदेशे मैत्रः दृष्ट्वा चैत्रस्य वाक्यं स्मरति । तदनन्तरं फलभूतम् ज्ञानं प्राप्नोति ।

"यथा मुद्गस्तम्भः विषाद्युपशामकः तथा मुद्गपर्णी अपि विषाद्युपशामक एव" इति चतुर्थः अनुभवप्रकारः अपि प्रदर्शितः । एतस्य असाधारणधर्मः वृश्चिकदंशादिविषाद्युपशामकः भवति । कालान्तरे यदा एकः


ISSN: 2249-538X

जनः मुद्गपर्णीं पश्यति, तदा पूर्वोक्तं वाक्यं स्मरति । मुद्गस्तम्भवत् मुद्गपर्णस्यापि विषाद्युपशामकत्वं वर्तत एव इति ज्ञास्यति । अथवा स्वयं उपयुज्य तस्य अनुभवं प्राप्नोति । एतदेव फलभूतं ज्ञानम्। एषः विषयः विश्वनाथकृतन्यायसूत्रवृत्तौ ज्ञातुं शक्यते । एवं रीत्या चतुर्षु स्थलेषु उपमानं व्याख्यातम् । प्राचीननैय्यायिकमतानुसारं अतिदेशवाक्यं उपमितिं प्रति करणमिति । सादृश्यज्ञानं करणमिति नव्यन्यायमतम् । उभयत्रापि अतिदेशवाक्यार्थस्मरणमेव व्यापारः भवति । फलभूतज्ञानं तु "अमुकः अमुकपदवाच्यः" इति भवति ।

विश्वनाथमते अगृहीतः कश्चन गुणः धर्मः वा उपमितौ भासते अङ्गीकृतम् । पूर्वमेकः जनः मुद्गपर्णीं तथा मुद्गस्तम्भं जानाति स्म । परं मुद्गस्तम्भवत् मुद्गपर्णी अपि विषाद्युपशामकः इति अज्ञातविषयः । यदा अतिदेशवाक्यं श्रुत्वा सन्दर्भे वाक्यं स्मरति, तदा मुद्गपर्णी अपि विषाद्युपशामकगुणवती इति ज्ञास्यति इति कश्चन विशेषः।

प्रथमतया उपमितेः कृते मुख्यं भवति अतिदेशवाक्यश्रवणं, तस्य अतिदेशवाक्यस्य पदार्थस्य साक्षात् दर्शनम्, एवञ्च अतिदेशवाक्यस्य स्मरणम् । एतत् त्रयं विना उपमितिर्न भवति । प्रत्यक्षेण एतत् कथं गतार्थं न भवति इति चेत्, अत्र यद्यपि गवयो बहुवारं दृष्टः , तथापि गवयपदवाच्यत्वं प्रत्यक्षेण न गृहीतम् । अतः प्रत्यक्षप्रमाणात् एतत्प्रमाणं भिन्नमेव ।

अनुमितिरपि अत्र न सम्भवति । यतोहि गोसादृश्यं गवि वर्तते, गवान्तरे अपि भवति । अतः अत्र अनुमितिः भवितुं नार्हति । शब्देनापि उपमानं गतार्थं न भवति । यतः शब्दे गवयदर्शनं नापेक्षितम् । परं उपमितौ तु गवयदर्शनम् अपेक्षितम् एव । अत एव एतादृशानुभवः भिन्नप्रमाणसिद्धो भवति, न तु प्रत्यक्षानुमानशब्दप्रमाणैः इति सिद्धान्तः ।

गवयो गवयपदवाच्यः इत्यादिवाक्यानि सामान्यतया उच्यमान सादृश्यज्ञानमित्यत्र किञ्चिदपि न सम्बध्यत एव ।चतुर्षु अनुभवेषु सादृश्यज्ञानस्य


ISSN: 2249-538X

प्रसक्तिरेव न दृश्यते ।

“अनवगतसङ्गतिसंज्ञासमभिव्याहृतवाक्यार्थप्रतीतिः उपमितिः, तत्करणम् उपमानम्” इति नव्यन्यायमते उक्तम् । अत्र एकः प्रश्नः उदेति, गवयः गवयपदवाच्यः इति प्रतीतिः यदि उपमितिः स्यात् तर्हि अन्या कापि प्रतीतिः स्वीकरणीया भवेत् इति ।

इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति इति वाक्ये कस्यचित् जनस्य मधुकर इति नाम कस्य इति न जानाति । मधुकरो नाम एकः कीटः इति न जानातीत्यर्थः । परं कमलोदरे मधूनि पिबति इति पदत्रयसानिध्यवशात् पद्मे विद्यमानमधुपानरूपधर्मः भृङ्गे वर्तते इति कारणात् मधुकरशब्दस्य भृङ्गरूपकीटविशेषे सः संज्ञासंज्ञिसम्बन्धज्ञानं प्राप्नोति । अत्र प्रश्नः तथैव अवतिष्ठते यत् असौ उपमितिः कथं न इति । अत्रापि मधुकरः मधुकरशब्दवाच्यः इति प्रतीतिः जायते । एतदपि संज्ञासंज्ञिसम्बन्धज्ञानमेव । शक्तिग्रहोपायाः बहवः सन्ति

**शक्तिग्रहं व्याकरणोपमनकोशाप्तवक्यात् व्यवहारतश्च ।**

**वाक्यस्य शेषात् विवृतेर्वदन्ति सानिध्यतः सिद्धपदस्य वृद्धाः** ।। इति ।

एवं एतैः उपायैः संज्ञासंज्ञिसम्बन्धज्ञानमेव साध्यते । तर्हि प्रसिद्धपदसान्निध्यमपि उपमितिः इति भवतु इति पूर्वपक्षः । अथवा सर्वेषां शक्तिग्रहोपायानामपि उपमितिसंज्ञा इति भवतु । अथवा भवदभिमतोपमानप्रमाणमपि शक्तिग्रहोपायेषु अन्यतमं भवतु इति । अत्र समाधानं सम्यक्तया वक्तुं न शक्यते ।

नैय्यायिकमते अन्यः एकः क्लेशः उदेति, अयं घटः इति प्रत्यक्षम् । अत्र अनुव्यवसायः कथं भवतीति चेत्, “घटमहम् अनुभवामि” इति । पर्वतो वह्निमानिति अनुमितेः स्वरूपम् । अनुव्यवसायः अत्र पर्वते वह्निम् अनुमिनोमि इति । एवं उपमानप्रमाणसन्दर्भे गवयं उपमिनोमीति अनुभवः कस्यचित् भवेदेव, स तु अनुव्यवसाये एव अन्तर्गतः । शब्दे अपि अनुव्यवसायः दृश्यते ।


ISSN: 2249-538X

एवं गवयं गवयपदवाच्यम् अहं जानामि इति अनुव्यवसायस्वरूपं सिद्धम् । अत एव अनुमिनोमीति अनुव्यवसायः भवितुं नार्हति । अनुभवात् दूरमेव भवति न्यायमतरीतिः ।

इदानीं भाट्टमतं पश्यामः । वामचक्षुरपेक्षया दक्षिणचक्षुः योग्यतरम् इतिवत् । एतेषां प्रथमतया अतिदेशवाक्यस्य अपेक्षा एव नास्ति । गवयस्य असाधारणधर्मान् अतिदेशवाक्येन, भूयो भूयो दर्शनेन, ग्रन्थपठनेन वा जानाति। द्वितीये तु वने गोः सादृश्यं पश्यति, तदा स्वकीयायाः गोः सादृश्यमत्र स्मरति । अत्र अनुमितिप्रकारे भाट्टानां वैशिष्ट्यं वर्तते । एतदाकारविशिष्टा मदीया गौरिति उपमितिज्ञानं सिद्ध्यति । परं एषा प्रतीतिः लोकप्रसिद्धा नास्ति, केवलं शास्त्रप्रसिद्धा एव । कमलेन लोचनम् उपमिनोमीति मीमांसकानां प्रतीतिः । लोचनगतकमले, कमलगत लोचनं सादृश्यज्ञानकरणम् । नेत्रे विद्यमानकमलज्ञानम् उपमितिः । लोचने विद्यमानं कमलसादृश्यम् उपमेयमिति एतेषां सिद्धान्तः । तथा च लोके उभयथा प्रतीतिः क्वाचित्कतया वर्तते इति मीमांसकग्रन्थेषु दृश्यते । अत्र सादृश्यज्ञान-उपस्थम्बितः एषः अनुभवः । फलभूतज्ञानपर्यन्तमपि एष एव अनुभवः । परन्तु प्राचीनन्यायग्रन्थेषु न्यायसूत्रे किमस्तीति विचारिते सति साधर्म्यशब्दः,सादृश्यशब्दः सूत्रेषु दृश्यते । बहुविधौपमावाचकशब्दाः तेषां तन्त्रेषु प्रसिद्धाः सन्ति । परन्तु उपमितिस्वरूपे सादृश्यस्य प्रसङ्ग एव नास्ति इति आपत्तिः । वस्तुतः उपमितिरिति असौ शब्दः उपकरणार्थे इति वक्तुम् इच्छामि। यतो हि लोके आचार्यः - उपाचार्यः, कुलपतिः - उपकुलपतिः इति उपोपसर्गस्य अर्थस्तु प्रसिद्धः । मितिर्नाम ज्ञानं, प्रमेयं, प्रमितिः । एषा प्रमितिरेव न । प्रमितिषु गणना नास्ति । अस्याः प्रत्यक्षानुमानशब्दादिभ्यः एव प्रमितयः । एषा तु उपमितिः । नव्यनैय्ययिकमतेन कथम् उपमितिः इत्युक्ते शाब्दप्रमित्युपायतया शक्तिग्रहः अपेक्ष्यते, अत एव तादृशशक्तिग्रहं सम्पादयितुं एषा उपमितिः इति तत्रान्वयं कुर्मः । अत्रापि गोज्ञानमपि वर्तते गोसदृश


ISSN: 2249-538X

ज्ञानमपि वर्तते । गवयपदवच्या मदीया गौ एतत्सदृशी इति प्रमितिः वर्तते, अत्र पूर्वं यदनवगतं गोसादृश्यं स्वकीये गवि तावन्मात्रप्रतिपादकत्वेन गवयसदृशी मदीया गौः इति ज्ञानस्य उपकारं कुर्वती उपप्रमाणरूपेण (Subsidiary pramanam) अस्य प्रमाणस्य स्वीकारे उपमितिशब्दस्य एतादृशार्थकल्पनमिति कदाचित् सर्वेष्वपि अनुभवेषु सरलतया स शब्दः समन्वेतुं शक्यत इति ।

**********


ISSN: 2249-538X

# अन्तरधिकरणम्

प्रो. महाबलेश्वर पि. भट्टः

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

अथ चतुर्लक्षण्यां शारीरकमीमांसायां समन्वयाध्याये प्रथमपादे सप्तमं अन्तरधिकरणमधिकृत्य किञ्चित् प्रस्तूयते ।

तत्र प्राचीनैराचर्यैरधिकरणलक्षणमित्थं निरटङ्कि –

विषयो विशयश्चैव पूर्वपक्षस्ततोत्तरः
प्रयोजनं सङ्गतिश्च शास्त्रेऽधिकरणं मतम् ॥ इति ।

अथ य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः । तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद । इत्यधिदैवतम् अथाध्यात्मम् । अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते" इत्यादि । छान्दोग्योपनिषदि समाम्नातं वाक्यकदम्बं विषयः । तत्र अन्तरादित्ये अन्तरक्षिणि च दृश्यमानः पुरुषः जीवो वा परमेश्वरो वा इति विषयः । पूर्वोत्तरपक्षगतानां युक्तीनां प्राबल्यदौर्बल्यविचारनिर्णयात् प्रागनिश्चयात् संशयः। पूर्वपक्षे विद्याकर्मातिशयवशात् प्राप्ताणिमाद्यैश्वर्यशक्तिसम्पन्नः कश्चन संसारी उपास्य इति । सर्वात्मा परमात्मैव उपास्य इति राद्धान्तः । पूर्वपक्षे जीवोपास्ति, उत्तरपक्षे देवोपास्तिः प्रयोजनम् । पूर्वाधिकरणेन दृष्टान्तसङ्गतिः यथा – ब्रह्मपद - आनन्दमय पद – आनन्दाभ्यास-रूपबहुभिर्हेतुभिः "ब्रह्मपुच्छं प्रतिष्ठा" इत्यत्र ब्रह्मैव प्राधान्येन प्रतिपाद्यते इति प्रत्यपादि । अत्रापि अन्तरादित्ये चक्षुषि च इति आधारत्वश्रवणात्, हिरण्यश्मश्रुत्वादिरूपत्वश्रवणात्, उपरितनानाम् अधस्तनानां च लोकानां भोगानां च विभक्ताधिपत्यश्रवणाच्च बहुभिर्हेतुभिः


ISSN: 2249-538X

संसारी एव उपास्य इति दृष्टान्तसङ्गतिः । परमेश्वर एव उपस्य न इतरः इति उत्तरपक्षः ।

यद्यपि सर्वे वेदान्ताः निर्गुणब्रह्मैकपराः । शुद्धमेव ब्रह्म मुमुक्षुजनवेद्यं हृद्यम् । न तु सगुणं सोपाधिकम् । अथापि मन्दमतीनां मानवानाम् उपकाराय चित्तैकाग्रतासम्पादनद्वारा निर्गुणब्रह्मविज्ञानसामर्थ्यलाभाय उपास्यं सगुणं ब्रह्म प्रतिपाद्यते । सततोपासनया प्राप्तायां विद्यायाम् अपसृतायामविद्यायां सगुणमेव निर्गुणायते ब्रह्म तथाचाकथयन् कल्पतरुकृतः

निर्विशेषं परं ब्रह्म साक्षात् कर्तुमनीश्वराः
ये मन्दास्तेनुकम्प्यन्ते सविशेषविशेषणैः ।
वशीकृते मनस्येषां सगुणब्रह्मशीलनात्
तदेवाविर्भवेत् साक्षादपेतोपाधिकल्पनम् ॥

अत्रायं पूर्वपक्षसंक्षेपः –

आदित्ये दृश्यमानस्य पुरुषस्य हिरण्यश्मश्रुत्वादिरूपं श्रूयते इदमेव रूपं चाक्षुषस्य पुरुषस्याभिमतं 'तस्यैतस्य तदेव रूपं यदमुष्यरूप'मिति । संसारिणः एव रूपवत्ता प्रथिता न परमेश्वरस्य । "अशब्दमस्पर्शमरूपमव्ययम्" इति नैगामिकं वचः रूपं निषेधति ब्रह्मणः।

अन्तरादित्ये अन्तरक्षिणि इति सप्तमीविभक्त्या आधारश्रवणात् संसारिण एव ग्रहणमुचितम् । गृहे निवसति, कटे आस्ते इत्येवं प्रसिद्धिः संसारिण एव युज्यते । सर्वगतस्य अनाधारस्य परमेश्वरस्य स्वेमहिम्नि प्रतिष्ठितस्य आधारवत्वं न युज्यते । "स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नि इति" छान्दोग्ये भूमविद्यावचनप्रामाण्यात् । आद्यारत्वश्रवणं परमेश्वरपक्षस्य प्रतिकूलमेव ।

किञ्च – आदित्यान्तर्गतः उपरितनलोकानां भोगनां च अधिपतिः, नयनान्तर्गतस्तु अधस्तनानां लोकभोगानां स्वामीति श्रूयते "स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां च इत्यादित्यपुरुषस्यैश्वर्यमर्यादा ।


ISSN: 2249-538X

स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च । इदं कलिङ्गस्य इदं मगधस्य इत्येवं प्रविभक्तमैश्वर्यं श्रूयते । एष सर्वेश्वर एष भूताधिपतिः एष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय इति । ईशभूतपाल इति अखण्डम् ऐष्वर्यम् ईश्वरस्य प्रसिद्धम् अतः मर्यादावदैश्वर्यश्रवणमपि ईश्वरपक्षं न सहते। तथा च भामत्यां संग्रहः –

मर्यादाधाररूपाणि संसारिणि परे न तु ।
तस्मादुपास्यः संसारी कर्मानधिकृतोरविः । इति ॥

सर्वेभ्यः पापपुण्यकर्म अलिप्तत्त्वं श्रूयते सूर्ये वर्तमानस्य सर्वपाप्मोदितत्वं कर्मानधिकारत्वं विवक्षति । कर्मणि मनुष्याणामेवाधिकारो न देवानाम् । इतरेषां प्रबल लिङ्गानां बलात् इदं लिङ्गगुणदृत्यानेय्यम् अनधिकारिणां कर्म नलिप्यते । तस्मात् नेत्रादित्ययोः अन्तस्तः यः पुरुषः सः न परमात्मा किन्तु संसारी अत्रोच्यते –

अन्तस्तद्धर्मोपदेशात् इति । अन्तः तद्धर्मोपदेशात् । तस्य धर्माः तद्धर्माः तेषामुपदेशात् । आदित्ये चक्षुषि च श्रूयमाणः पुरुषः परमेश्वर एव । न संसारी जीवः । यतो हि परमेश्वरस्य धर्मा अत्रोपदिष्टाः सन्ति । 'य आत्माऽपहतपाप्मा' न मां कर्मणी लिम्पन्ति' इत्यादिश्रुतिस्मृतिवचनानि पापपुण्यकर्मलेपशून्यतां परमात्मनो ब्रुवते । अत्रापि सन्दर्भे तस्योदितिनाम इति प्रस्तुत्य "स एष सर्वेभ्यः पाप्मभ्यः उदितः" इति नाम्नो निर्वचनं करेति तदेव नाम अक्षिपुरुषस्यापि समानं दर्शयति 'यन्नाम तन्नाम' इति न केवलमेतत् उपासकस्यापि कर्मलेपराहित्यं फलं श्रावयति । 'उदेति हवै सर्वेभ्यः पाप्मभ्यः "य एवं वेद" इति । सुतरां तात्पर्यवतीं श्रुतिं कर्मालिप्ततां बुवन्तीं कर्मानधिकारमात्रार्थे संकोचकल्पना वैदिकानां नहृद्या ।

किञ्च देवतात्मनां सम्प्रति कर्मानधिकारेऽपि अनादिभवसञ्चितकर्मवासना नास्तीति निषेद्धुं शक्रेणापि न शक्या । विद्याकर्मोत्कर्षेण देवत्वप्राप्तेः सद्भावात् । अतः अपापविद्धत्वं


ISSN: 2249-538X

कर्मतत्फललेपशून्यता परमेश्वरस्य अनन्यथा लिङ्गम् । इदं जीवे देवतात्मनि च अनन्वेति । न केवलमेतत् आदित्यान्तर्गतः पुरुषः त्रयीमयः । चाक्षुषं पुरुषमधिकृत्य "सैवर्क्तत्साम तदुक्थं तद्यजुस्तब्रह्म इत्यृक्सामाद्यात्मकतां उपदिशति । पृथिव्ग्न्यात्मकं अधिदेवतं वाक्प्राणात्मकं अध्यात्मिकं तस्य ऋक्क सामचगेष्णौ इति उभयोः त्रयीमयतां दर्शयति । परमात्मा समग्रस्य प्रपञ्चस्य अभिन्ननिमित्तोपादानकारणमिति औपनिषत्सिद्धान्तः । स सर्वात्मकारणं कार्याकारेण समस्ति/सति चैवं परमेश्वरः ऋक्सामस्वरूप इति निश्चप्रचम् । तेन सूर्ये चक्षुषि च उपास्य पुरुषः वेदात्मा परमात्मैव न संसारी ।

अपि च "तद्य इमे वीणायां गायन्ति एतं ते गायन्ति "तस्मात्ते धनसनयः" इति लौकिकेषु गानेशु परमात्मनः गीयमानत्वं विवक्षति यस्तु आदित्ये चक्षुषि चोपास्यः । तथाचोक्तं गीतायाम् –

यद् यद् विभूति मत्सत्वं श्रीमदूर्जितमेव वा
तत्तदेवावगच्छत्वं मम तेजोंऽश सम्भवम् "

धनसनयः धनिकाः कलाविदः । तेषु भगवतः विभूतिविशेषः स्फुरति।

यत्तूक्तं रूपवत्वं आधारवत्वं परिमितैश्वर्यं परमेश्वरस्य नेपपद्यत इति तन्नसाधु । परमार्थतः परमात्मनः रूपाभावेऽपि साधकानुग्रहाय स्वां मायां वशीकृत्य बहुरूपाणि धत्ते परमेश्वरः । जीवास्तु कर्मानुसारं रूपाणि दधते । स्वेच्छया अभीष्टरूपं स्वीकरोति त्यजति च महेश्वरः तथा चोक्तं -

माया ह्येव मया सृष्टा यन्मां पश्यसि नारद ।
सर्वभूतगुणैर्युक्तं मैवं मां ज्ञातुमर्हसि' । इति ॥

यत्र निर्गुणब्रह्म प्रतिपिपादयिषितं तत्र 'अशब्दमस्पर्शमरूपमव्यम्' इत्येवमादीनि वचांसि प्रवर्तन्ते ।

आधारश्रवणमपि अनाधारस्य ब्रह्मणः उपासनार्थमेव ।

अध्यात्माधिदैवतरूपेण उपरितनानां अधस्तनानां लोकानां भोगानां विभागप्रदर्शनमपि परमेश्वरस्य उपासनार्थं उपपद्यते । अतः परमेश्वरलिङ्गानां


ISSN: 2249-538X

अनन्यथासिद्धानां बलिष्ठत्वात् जीवलङ्गानां अन्यथा नेतुं शक्यत्वात् आदित्यचक्षुषोरन्तरुपास्य परमेश्वर एव ।

अपि च अन्तर्यामिब्राह्मणे "य आदित्ये तिष्ठन्नादित्यादन्तरोयमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति येष त अन्तर्याम्यमृतः" इति श्रुतौ आदित्यदेवतापेक्षया अन्तर्यामी पृथगाम्नातः । य अदित्यो न वेद इति। एवं चक्षुष्वपि जीवातिरेकेण पृथगाम्नानात् आधिभौतिकाधि-दैविकाध्यात्मिकभेदेन सर्वान्तर्यामी परमेश्वरो उपदिष्ट । स एव उपास्यः इति सिद्धान्तः।

**********



ISSN: 2249-538X

# वियदधिकरणम्

डा. गणेश ईश्वर भट्टः

वियदधिकरणं शारीरकमीमांसाशास्त्रे द्वितीयाध्यायस्य तृतीये पादे प्रथमम् अधिकरणम् । इदं सप्तसूत्रीघटितम् । एवं हि अत्र विचारः प्रसक्तः- पूर्वं ब्रह्मणि कृतस्य वेदान्तसमन्वस्य प्रमाणान्तरेण विरोधः आशङ्कितः परिहृतश्च । तत्र तार्किकाणां सिद्धान्तानां मिथो विरुद्धत्वात् अप्रामाण्यमुक्तम् । तद्वत् वेदान्तेष्वपि पञ्चभूतानाम् उत्पत्तौ उत्पत्तिक्रमे च विरोधः प्रतीयते । अतः विरुद्धार्थप्रतिपादकवेदान्तमूलकशास्त्रमपि अप्रमाणम् इत्याशङ्का जायते । इमं विरोधं परिहर्तुकामः सूत्रकारः अस्मिन् वियत्पादे आदौ वियदधिकरणे वियदुत्पत्तिविषयकानि वाक्यानि विचारयति । तत्र वियत उत्पत्तिरस्ति न वेति सन्देहः ।

प्रथमम् एकदेशिमतम् उपन्यस्तं "**न वियदश्रुतेः**"[1] इति । कस्यचित् पदार्थस्य उत्पत्तौ अनुत्पत्तौ वा श्रुतिरेव प्रमाणम् । श्रुतौ अर्थात् छान्दोग्यषष्ठाध्याये उत्पत्तिप्रकरणे "**सदेव सोम्येदमग्र आसीदेकमवाद्वतीयम्**"[2] इत्युपक्रम्य "**तत्तेजोऽसृजत तदपोऽसृजत ता आप असृजन्त**"[3] इति त्रयाणामेव भूतानाम् उत्पत्तिः श्राविता । तत्र आकाशस्य उत्पत्तेः अश्रवणात् न तस्य उत्पत्तिरस्ति इत्येकदेशी मनुते ।

तदा पूर्वपक्षी प्राह "**अस्ति तु**"[4] इति । छान्दोग्ये उत्पत्तेः अश्रवणेऽपि तैत्तिरीयकाः "**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः**"[5] इत्याकाशस्य उत्पत्तिं समामनन्ति । तथा च श्रुत्योः विप्रतिषेधः जातः । यद्यपि श्रुत्योः एकवाक्यता वक्तव्या । तथापि प्रकृते सा न सम्भवति । यतः "**तत्तेजोऽसृजत**" इति सकृत् श्रुतस्य स्रष्टुः तत्तेजोऽसृजत तदाकाशमसृजत इति स्रष्टव्यद्वयेन सम्बन्धो नोपपद्यते । यदि, सूपं पक्त्वा ओदनं पचति इत्यादाविव अत्रापि, आकाशं सृष्ट्वा तेजोऽसृजत इति योजना क्रियते, तदपि न युज्यते, द्वयोरपि प्रत्येकं


ISSN: 2249-538X

श्रुतस्य प्रथमजत्वस्य भङ्गापत्तेः । एकत्र आकाशस्य प्रथमजत्वं भवति अपरत्र तेजसः । द्वयोरपि प्राथम्यं तु न सम्भवति । किञ्च, तेजसः उपादानतया छान्दोग्ये सत्पदार्थः आत्मा श्रूयते । तत्र हि **"तदैक्षत बहु स्यां प्रजायेय तत्तेजोऽसृजत"**[6] इति सत्पदार्थस्य ईक्षितुः बहुभवनसङ्कल्पपूर्वकं तेजसः सृष्टिः श्राविता । तैत्तिरीये तु "**वायोरग्निः**"[7] इति वायोः उपादानत्वं श्रुतम् । एवमेकवाक्यताऽसम्भवेन विरोधस्य अपरिहार्यत्वात् श्रुत्योः अप्रामाण्यम् इति पूर्वपक्षः प्राप्तः ।

तदा एकदेशी पुनराह "**गौण्यसम्भवात्**"[8] इति । तदर्थस्तु, नास्ति आकाशस्य उत्पत्तिः, अश्रुतत्वात् । या तु उत्पत्तिः श्रूयते, सा गौणी, आकाशस्य उत्पत्तेरसम्भवात् । तदुक्तं भाष्ये "**न ह्याकाशस्य उत्पत्तिः सम्भावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु**" इति । समवाय्यसमवायिनिमित्तकारणेभ्यो हि कार्यमुत्पद्यते । तत्र एकजातीयकम् अनेकं यद्द्रव्यारम्भकं समवायिकारणम्, तदाकाशस्य नास्ति । तदभावे, असमवायिकारणस्य निमित्तकारणस्य चाप्यभावः । किञ्च प्रागभावः कार्योत्पत्तौ कारणम् । स च नास्त्याकाशस्य । तेजःप्रभृतीनां पूर्वोत्तरकालयोः विशेषः सम्भाव्यते, प्राक्तेजस उत्पत्तेः प्रकाशनादिकार्यं न बभूव, पश्चाद्भवति इति, न तथा आकाशस्य उत्पत्तेः पूर्वं किञ्चिदनाकाशम् आसीत् इति प्रागभावः सम्भावयितुं शक्यते ।

आकाशस्य उत्पत्तिः श्रुतितः अपि ज्ञायत इत्यर्थः "**शब्दाच्च**"[9] इति सूत्रेण सूत्रितः । "**वायुश्चान्तरिक्षं चैतदमृतम्**"[10] इति श्रुतिः आकाशस्य अमृतत्वं श्रावयन्ती तस्य नित्यत्वं ज्ञापयति । अपरा श्रुतिः "**आकाशवत्सर्वगतश्च नित्यः**"[11] इति विभुत्वनित्यत्वाभ्याम् आकाशेन सह ब्रह्म उपमिमाना आकाशस्यापि नित्यत्वं विभुत्वं च सूचयति । तथा चात्र अनुमानम् आकाशो नोत्पद्यते, विभुत्वात् आत्मवत् इति । तस्माद्यथा वेदे "**आरण्यान् आकाशष्वालभेरन्**"[12] इत आकाशस्य बहुत्वं गौणम्, यथा च लोके आकाशं कुरु


ISSN: 2249-538X

आकाशो जातः इत्येवं गौणः प्रयोगः दृश्यते, तथैव तैत्तिरीये सम्भूत इति आकाशस्य उत्पत्तिश्रुतिरपि गौणी इति मन्तव्यम् ।

अत्रैवमाशङ्का- एक एव सम्भूतशब्दः श्रूयमाणः तेजःप्रभृतिषु मुख्यः, आकाशे तु गौणः इति कथं भिन्नमर्थं वदेत् इति । तत्रोच्यते- "**स्याच्चैकस्य ब्रह्मशब्दवत्**"[13] इति । एकस्यापि सम्भूतशब्दस्य विषयविशेषवशात् अर्थद्वयं भवितुमर्हति ब्रह्मशब्दवत् । यथा तैत्तिरीये "**तपो ब्रह्म**"[14] इति ब्रह्मज्ञानसाधने तपसि ब्रह्मशब्दः गौणः, "**तपसा ब्रह्म विजिज्ञासस्व**"[15] इति परब्रह्मणि मुख्यः । यथा वा तत्रैव "**अन्नं ब्रह्मेति व्यजानात्**"[16] इत्यादौ अन्नादिषु ब्रह्मशब्दः गौणः । "**आनन्दो ब्रह्म**"[17] इति परब्रह्मणि मुख्यः । एवं संभूतशब्दोऽपि तेजःप्रभृतिषु मुख्यः, आकाशे च गौण इति युज्यत एव । तस्मात् आकाशोत्पत्तिश्रुतिः गौणी इति पूर्वः पक्षः ।

अत्रायं सिद्धान्तः "**प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः**"[18] इति । प्रतिवेदान्तं कारणविज्ञानेन कार्यविज्ञानमिति प्रतिज्ञा श्रूयते । यथा "**येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्** "[19] इति छान्दोग्ये, "**कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति**"[20] इति मुण्डके । "**आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्**"[21] इति बृहदारण्यके। सर्वस्यापि जगतः ब्रह्माव्यतिरेके सत्येव सा प्रतिज्ञा निराबाधा तिष्ठति । श्रुतयः अपि तत्र कार्यकरणयोः अनन्यत्वन्यायेनैव अव्यतिरेकम् उपपादयन्ति । यथा छान्दोग्ये "**सदेव सोम्येदमग्र आसीदेकमवाद्वितीयम्**" इत्यवधार्य, सृष्टिं चाम्नाय, अन्ते अद्वितीयब्रह्मणैव प्रकरणम् उपसंहृतम् "**ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा**"[22] इति । सर्वस्यापि प्रपञ्चस्य ब्रह्मकार्यत्वात्, कार्यस्य च कारणाभिन्नत्वात् कारणे ब्रह्मणि ज्ञाते कार्यं सर्वं विज्ञातं भवति । अयमेव क्रमः इतरासु उपनिषत्सु अपि दृश्यते। एवं सति आकाशो यदि नोत्पद्येत, तर्हि तस्य ब्रह्मभिन्नत्वेन ब्रह्मज्ञाने जातेऽपि आकाशज्ञानं न स्यात् । ततश्च प्रतिज्ञायाः भङ्गः। अतः आकाशस्य उत्पत्तिः वक्तव्या ।


ISSN: 2249-538X

अत्राशङ्का- अन्यथाऽपि अत्र उपपादनं सम्भवति । यथा- एकमवाद्वितीयम् इत्यत्र कार्यरूपद्वितीयशून्यत्वम् अवधारणार्थः । यथा लोके कश्चित् कुलालगृहे पूर्वेद्युः मृद्दण्डचक्रादीन्युपलभ्य अपरेद्युः नानाविधानि मृन्मयपात्राणि चोपलभ्य प्राह पूर्वेद्युः मृदेवासीत् इति । तत्र अवधारणेन मृत्कार्यजातमेव व्यावर्त्यते, न दण्डचक्रादिकम् । एवम् एकमेव इत्यवधारणं कार्यजातव्यावर्तकम् । अद्वितीयम् इति श्रुतिः अधिष्ठात्रन्तरं वारयति । वस्तुतस्तु, आकाशस्य ब्रह्मापेक्षया द्वितीयत्वमेव नास्ति । लक्षणान्यत्वं हि नानात्वे निमित्तम् । प्रागुत्पत्तेः क्षीरोदकयोरिव संसृष्टयोः ब्रह्माकाशयोः व्यापित्वामूर्तत्वादिधर्मसाम्यात् लक्षणान्यत्वमेव नास्ति । इदानीं प्रागुक्ता प्रतिज्ञाऽपि उपपादयितुं शक्या । यथा- सर्वं कार्यं यदा यस्मिंश्च उत्पद्यते, तद तत्र आकाशो भवत्येव इति सर्वम् आकाशेन अव्यतिरिक्तदेशकालम् । तच्च आकाशं ब्रह्मणा सह समानदेशकालम् । एवं सति, यथा क्षीरपूर्णे घटे जलबिन्दूनां प्रक्षेपे सति क्षीरग्रहणेनैव जलबिन्दवोऽपि गृहीताः भवन्ति, तथैव ब्रह्मज्ञानेन ब्रह्मसमानदेशकालम् आकाशमपि ज्ञातं भवति इति ।

समाधानम्- क्षीरोदकन्यायः नात्र प्रवर्तते । यतः प्रतिज्ञासाधनाय स्वयं श्रुतिः **"यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्"**[23] इत्येवं दृष्टान्तानपि उपन्यस्यति । तेन प्रकृतिविकारयोः अनन्यत्वन्यायेनैव प्रतिज्ञाया उपपादनं श्रुत्या विवक्ष्यत इति ज्ञायते । किञ्च, क्षीरोदकन्यायेन सर्वविज्ञानं न सम्यग्ज्ञानम् । क्षीरग्रहणेन क्षीरसंयुक्तम् उदकम् न सम्यग्गृहीतं भवति । तथापि सम्यग्विज्ञानं यदि श्रुत्या उच्येत तर्हि लौकिकपुरुषाणामिव श्रुतेरपि वचनं भ्रमवञ्चनादिमूलं स्यात् । अपि च स्वकार्यापेक्षया अद्वितीयत्वं पृथ्व्यादीनामपि अस्ति । तदा ब्रह्मविषये **"उत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवति"** [24] इति अपूर्ववदुपन्यासः नाभविष्यत् । तस्मात् प्रकृतिविकारयोः अनन्यत्वन्यायेनैव प्रतिज्ञा उपपादनीया । अद्वितीयपदार्थश्च ब्रह्मव्यतिरिक्तस्य सर्वस्यापि अभाव इति तेजःप्रभृतीनामिव आकाशोऽपि उत्पद्यत इति ज्ञायते । कण्ठत एव


ISSN: 2249-538X

तैत्तिरीयश्रुतिः आकाशस्य उत्पत्तिं श्रावयति "**आत्मन आकाशः सम्भूतः**"[25] इति ।

एवमपि छन्दोग्ये उत्पत्तेः अश्रवणात् श्रुत्योः विरोधात् एकवाक्यता न सम्भवति इति यदुक्तम्, तत्रोच्यते- श्रुत्योर्विरोधे प्रबलश्रुत्या दुर्बलश्रुतिः अन्यथा नीयते । प्रबला च तैत्तिरीयश्रुतिः, आत्मन इत्यादौ प्रकृत्यर्थकपञ्चम्या पौर्वापर्याख्यस्य क्रमस्य ज्ञायमानत्वात् । छान्दोग्ये तु तेजसः सृष्टिमात्रं श्रूयते, न तु तस्य प्राथम्यम् । अतः तत् आकाशं वायुं च सृष्ट्वा तेजोऽसृजत इत्यर्थवर्णनेऽपि न कोऽपि विरोधः । किञ्च सा छान्दोग्यश्रुतिः तेजसः उत्पत्तिमात्रपरा सती न श्रुत्यन्तरप्रसिद्धाम् आकाशस्य उत्पत्तिं वारयति, व्यापारद्वयपरत्वे वाक्यभेदापत्तेः । कर्तुर्हि एकस्य अनेकाकार्यसम्बन्धो दृष्टः, न तु वाक्यस्यैकस्य अनेकार्थत्वम् । अतः अनुक्तमन्यतो ग्राह्यम् इति न्यायेन तैत्तिरीयश्रुत्यनुरोधात् तदाकाशमसृजत इति छान्दोग्ये वाक्यान्तरं कल्प्यते । अपि च उत्पत्तिप्रकरणे तेजःप्राथम्यानुरोधेन श्रुत्यन्तरप्रसिद्धस्य आकाशस्य परित्यागे तु, पदार्थ एव परित्यक्तो भवति । तत्र प्रधानधर्मित्यागात् वरं तेजःप्राथम्याख्यस्य धर्मस्य परित्यागः ।

यत्पूर्वमुक्तम् सामग्रीशून्यत्वात् आकाशो नोत्पद्यत इति, तत्रेदं सूत्रं कृतम् "**यावद्विकारं तु विभागो लोकवत्**"[26] इति । यः वस्त्वन्तराद्विभक्तः स विकार इति व्याप्तिः लोके दृष्टा । यथा घटपटादयः विभक्ताः, विकारा अपि । यस्त्वविकारः स न विभक्तः यथा आत्मा । आकाशोऽपि विभक्तः । अत एव सः विकारोऽपि । न चास्याः व्याप्तेः दिक्कालपरमाण्वादिषु व्यभिचारः, तेषामपि विकारत्वात् । अत्र हेतौ अज्ञानान्यद्रव्यत्वं विशेषणं दीयते । तेन अज्ञानतत्सम्बन्धादौ न व्यभिचारः । एवमपि आत्माऽपि आकाशादिभ्यो विभक्त इति तस्मिन् व्यभिचारः इति त न शङ्कनीयम् । यतः अत्र धर्मिसमसत्ताकः विभागः विवक्षितः । पारमार्थिके आत्मनि तत्समसत्ताकविभागः नास्ति, विभागस्य कल्पितत्वात् । अपि च आत्मा विकारः विभक्तत्वात् वस्तुत्वाद्वा


ISSN: 2249-538X

घटवत् इति प्रत्यनुमानं नात्र सम्भवति । यतः परमकारणत्वेन श्रुतस्य आत्मनः अपि कार्यत्वे शून्यवादप्रसङ्गः । न चात्मा निराकर्तुं शक्यते, निराकर्तुरेव आत्मत्वात् इत्यन्यत्र विस्तरः । एवं च बाधकसत्त्वात् आत्मविकारत्वानुमानम् अप्रमाणम् । आकाशस्य तु कार्यत्वे न किञ्चिद्बाधकमस्ति । प्रत्युत आकर्यत्व एव नित्यानेकद्रव्यकल्पना श्रौतप्रतिज्ञाविरोधः इत्यादिबाधकाः सन्तीति वैलक्षण्यम्।

यच्चोक्तम् आकाशस्य समानजातीयम् अनेकं कारणद्रव्यं नास्तीति, तत्रोच्यते, न तावत् समानजातीयमेव कार्यमारभते, न विजातीयमिति नियमोऽस्ति, पटारम्भकाणां तन्तुतत्संयोगतुरिवेमादीनां समानजातीयत्वाभावात्। यद्ययं नियमः समवायिकारणविषय इत्युच्यते, तत्र यदि समवायितावच्छेदकधर्मेण साजात्यमुच्यते, तर्हि व्यभिचारः, अनेकजातीयैः सूत्रगोवालैः एकजातीयरज्जुनिर्माणदर्शनात् । एवमेव लोके सूत्रैः ऊर्णादिभिश्च विचित्रकम्बलनर्माणं दृष्टम्। यदि रज्वादिकं न कार्यान्तरम्, किन्तु तत् सूत्रवालादिसमुदायमात्रम् इत्युच्यते, तर्हि पटादेरपि तन्त्वादीनां समुदायमात्रत्वेन द्रव्यान्तरत्वं न स्यात् । यदि तु सत्त्वद्रव्यत्वादिना काराणे साजात्यं विवक्ष्यते, तर्हि यया कयाचिद्विधया सर्वत्र साजात्यसम्पादनस्य सुकरत्वात् नियमः अनर्थकः । तथा च समानजातीयकमेव आरम्भकमिति नास्ति नियमः ।

एवमेव अनेकमेव आरभते न एकम् इत्यपि नियमो नास्ति । तथा हि किमारम्भकामात्रस्य अयं नियम उत द्रव्यारम्भकस्य । नाद्यः, द्व्यणुकस्य असमवायिकारणीभूतम् आद्यं यत्कर्म, तदारम्भकस्य परमाणोः एकस्यैव कारणत्वात् । एतद्दोषवारणाय यदि द्रव्यारम्भ एव कारणानेकत्वनियम इत्युच्यते, तदप्ययुक्तम्, आरम्भवादस्यैव अनङ्गीकारात् । कार्यं नाम एकस्यैव द्रव्यस्य रूपान्तरेण अवस्थानम् । स एव परिणाम इत्युच्यते । क्वचिदनेकं परिणमते, यथा मृद्बीजादिकम् अङ्कुरादिभावेन । क्वचिदेकं परिणमते यथा क्षीरादिकं


ISSN: 2249-538X

दध्यादिभावेन । अनेकमेव परिणमते न एकमिति नास्ति ईश्वरशासनम् । प्रकृते च श्रुतिप्रामाण्यात् एकमेव ब्रह्म आकाशादिक्रमेण जगदुत्पद्यत इति निश्चीयते ।

यच्चोक्तम्, आकाशस्य उत्पत्त्यभ्युपगम न पूर्वोत्तरकालयोः विशेषः सम्भावयितुं शक्यत इति तदयुक्तम् । यतः शब्दाश्रयत्वरूपः विशेषः योऽयमिदानीम् उपलभ्यत, सः उत्पत्तेः पूर्वं नासीत् । तथा च श्रुतिः **"नासीद्रजो नो व्योम"**[27] इति । यच्च आकाशस्य पृथिव्यादिवैलक्षण्यात् उत्पत्त्यभावः ज्ञायत इत्युच्यते तदपि तुच्छम् । विभुत्वास्पर्शद्रव्यत्वनिरवयवद्रव्यत्वादिलिङ्गानि विभक्तत्वादिलिङ्गसहितात् आगमात् बाध्यन्ते । अनुमानान्तरं च आकाशः अनित्यः अनित्यगुणाश्रयत्वात् घटादिवत् इति । न चा अत्मनि व्यभिचारः आत्मनः निर्गुणत्वात् । एवं सति विभुत्वं चाकाशस्य असिद्धम्, उत्पत्तिमत्त्वेन कालतः परिच्छिन्नत्वात् । **"आकाशवत्सर्वगतश्च नित्यः"**[28] इत्यत्रापि आकाशस्य महत्त्वस्य लोके प्रसिद्धत्वात् ब्रह्मणः निरतिशयमहत्त्वसाधनाय आकाशेन ब्रह्म उपमीयते न आकाशसमत्वाय । अत एव "**ज्यानाकाशात्**" [29] इति श्रूयते । यथा इषुरिव सविता धावति इति सूर्यस्य क्षिप्रगतित्वमुच्यते, न इषुतुल्यगतित्वम्, तद्वत् । श्रुत्यन्तरं च ब्रह्मणः उपमेयत्वमेव वारयति **"न तस्य प्रतिमाऽस्ति**"[30] इति । आकाशस्य श्रुतम् अमृतत्वमपि आपेक्षिकम्, यथा देवानाम् अमृतत्वम् ।

यच्च पूर्वमुक्तम्, मुख्ये ब्रह्मणि ब्रह्मज्ञानसाधने च यथा ब्रह्मशब्दः तथा सम्भूतशब्दः आकाशे गौणः तेजःप्रभृतिषु मुख्यः इति, तदपि न, उक्तरीत्या आकाशस्य उत्पत्तिमत्त्वात् आकाशे सम्भूतशब्दस्य मुख्यार्थस्यैव सम्भवात् । तथा च एकवाक्यताऽपन्नयोः छान्दोग्यतैत्तिरीयश्रुत्योः जगत्स्रष्टरि ब्रह्मणि समन्वय इति शम् ।


ISSN: 2249-538X

सङ्केतसूची:-

१. ब्रह्मसूत्रम् २-३-१
२. छान्दोग्योपनिषत् ६-२-१
३. छान्दोग्योपनिषत् ६-२-३
४. ब्रह्मसूत्रम् २-३-२
५. तैत्तिरीयोपनिषत् २-१
६. छान्दोग्योपनिषत् ६-२-३
७. तैत्तिरीयोपनिषत् २-१
८. ब्रह्मसूत्रम् २-३-३
९. ब्रह्मसूत्रम् २-३-४
१०. बृहदारण्यकोपनिषत् २-३-३
११. शतपथब्राह्मणम् १०-६-३-२
१२. शतपथब्राह्मणम् १३-५-१-५
१३. ब्रह्मसूत्रम् २-३-५
१४. तैत्तिरीयोपनिषत् ३-२
१५. तैत्तिरीयोपनिषत् ३-२
१६. तैत्तिरीयोपनिषत् ३-३
१७. तैत्तिरीयोपनिषत् ३-७
१८. ब्रह्मसूत्रम् २-३-६
१९. छान्दोग्योपनिषत् ६-१-१
२०. मुण्डकोपनिषत् १-१-३
२१. बृहदारण्यकोपनिषत् ४-५-६
२२. छान्दोग्योपनिषत् ६-८-७
२३. छान्दोग्योपनिषत् ६-१-१
२४. छान्दोग्योपनिषत् ६-१-१
२५. तैत्तिरीयोपनिषत् २-१
२६. ब्रह्मसूत्रम् २-३-७
२७. ऋग्वेदसंहिता १०-१२९-१
२८. शतपथब्राह्मणम् १०-६-३-२
२९. शतपथब्राह्मणम् १०-६-३-२
३०. श्वेताश्वतरोपनिषत् ४-१९

**********


ISSN: 2249-538X

# स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्

डा. श्रीकरः जि. एन्

एकमेवाद्वितीयं ब्रह्म प्रतिपादयितुं प्रवृत्ता श्रुतिः अध्यारोपापवादन्यायेन 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यादिश्रुत्या ब्रह्मणि प्रपञ्चमारोप्य 'नेति नेति' इत्यादिश्रुत्या च आरोपितस्य प्रपञ्चस्य निषेधमुखेन निष्प्रपञ्चं ब्रह्म प्रतिपादयति । निर्विशेषाखण्डाद्वितीयचैतन्यमात्रं ब्रह्म पारमार्थिकं सत्यम् । द्वैतात्माकः सर्वोऽपि प्रपञ्चः मिथ्या इति अद्वैतवेदान्तिनां सम्मतं मतम् । अत एव प्राचीनानां प्रयोगाः यथा – विमतं मिथ्या दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवदिति ।

अद्वैतवेदान्तस्य नैके प्राचीनाचार्याः पञ्च विभिन्नानि मिथ्यात्वस्य लक्षणानि प्रत्यपादयन् । तत्र चित्सुखाचार्यसम्मतं मिथ्यात्वलक्षणमिदम् – 'स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वम्' इति । लक्षणेऽस्मिन् 'स्व'पदं यस्य वस्तुनः मिथ्यात्वं साधयितुमिष्यते तत्परम् । स्वाश्रयशब्दः स्वाश्रयत्वेन प्रतीयमानपरः । तथा च स्वाश्रयत्वेन प्रतीयमाननिष्ठो यः स्वस्यात्यन्ताभावः नासीत् नास्ति न भविष्यतीति सर्वदा विद्यमानः यः अत्यन्ताभावः तस्य प्रतियोगित्वं स्वस्य मिथ्यात्वमिति ।

अत्र शङ्कते पूर्वपक्षी – मिथ्यात्वलक्षणघटकतया यः अत्यन्ताभाव उक्तः सः तात्त्विको वा प्रातिभासिको वा व्यावहारिको वा । विकल्पत्रयेऽपि पूर्वोक्तात्यन्ताभावः न सङ्गच्छते । यतः प्रपञ्चात्यन्ताभावस्य तात्त्विकत्वाङ्गीकारे अद्वैतहानिः स्यात् । ब्रह्मप्रपञ्चात्यन्ताभावयोः उभयोरपि तात्त्विकत्वेन पारमार्थिकवस्तुद्वयसद्भावात् एकमेवाद्वितीयं ब्रह्म इति अद्वैतसिद्धान्तः भज्येत ।

नापि द्वितीयः – अत्यान्ताभावस्य प्रातिभासिकत्वे सिद्धसाधनं दोषः । अत्यान्ताभावस्य प्रातिभासिकत्वे तत्प्रतियोगिनः प्रातिभासिकत्वासम्भवात् ब्रह्मणि प्रपञ्चस्य प्रातिभासिकात्यन्ताभावप्रतियोगित्वे तत्प्रतियोगिनः प्रपञ्चस्य


ISSN: 2249-538X

सत्यत्वाविरोधेन तादृशप्रतियोगित्वसाधने पूर्वपक्षाभिमतप्रपञ्चसत्यत्वस्यैव साधनं स्यादिति सिद्धसाधनापत्तिः ।

नापि तृतीयः विकल्पः – उक्तात्यन्ताभावस्य व्यावहारिकत्वे अर्थान्तरं स्यात् । प्रकृतादर्थात् अन्यार्थसाधनमर्थान्तरम् । तद्यथा – ब्रह्मज्ञानमात्रबाध्यत्वं व्यावहारिकत्वम् । तथा च प्रपञ्चात्यन्ताभावस्य व्यावहारिकत्वे ब्रह्मज्ञानबाध्यत्वेन तत्प्रतियोगिनः प्रपञ्चस्य त्रैकालिकाबध्यत्वरूप-पारमार्थिकत्वात् सत्यात्वापत्तिः । तथा च प्रपञ्चस्य मिथ्यात्वं साधयितुं प्रवृत्तमनुमानं मिथ्यात्वविरोधिसद्रूपं साधयतीति अर्थान्तरं दोषः ।

अपि च उक्तात्यन्ताभावस्य व्यावहारिकत्वपक्षे अद्वैतश्रुतेः अतत्त्वावेदकत्वेन अप्रामाण्यप्रसङ्गः । अत्र 'नेह नानास्ति किञ्चन' इत्यादिश्रुत्या स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वं मिथ्यात्वमुक्तम् । किन्तु अत्यन्ताभावस्य व्यावहारिकत्वपक्षे ब्रह्मज्ञानबाध्यत्वेन मिथ्यात्वात् मिथ्याभूतस्य अत्यन्ताभावस्य प्रतिपादकत्वेन 'नेह नानास्ति किञ्चन' इत्याद्यद्वैतश्रुतेः अबाधितार्थप्रतिपादकत्वाभावेन अप्रामाण्यप्रसङ्ग इति । तस्मात् विकल्पत्रयेऽपि प्रपञ्चात्यन्ताभावस्य असम्भवात् प्रपञ्चस्य न मिथ्यात्वमिति ।

अत्रोच्यते सिद्धान्तः – पूर्वपक्षिणा अत्यान्ताभावस्य तात्त्विकत्वे अद्वैतहानिरिति यदुक्तं तन्न, यतः अभावस्य अधिकरणस्वरूपत्वात् ब्रह्मणि विद्यमानः यः प्रपञ्चात्यन्ताभावः सः ब्रह्मस्वरूप एव, तथा च अत्यान्ताभावस्य ब्रह्माभिन्नत्वात् ब्रह्मातिरिक्ततात्त्विकवस्तुनः असत्वेन न अद्वैतहानिः ।

अत्र पुनः प्रकारान्तरेण अद्वैतहानिं शङ्कते पूर्ववादी – प्रपञ्चः तात्त्विकः तात्त्विकाभावनिरूपितत्वात्, यत् यन्निरूप्यं तत् तत्समानसत्ताकम्, यथा शुक्तिरजतसादृश्यं शुक्तिरजतसमानसत्ताकमिति तात्त्विकाभावनिरूप्यस्य तात्त्विकाभावप्रतियोगिनः प्रपञ्चस्य तात्त्विकापत्य पुनः अद्वैतहानिप्रसङ्ग इति चेत्, उच्यते – शुक्तौ कल्पितस्य प्रातिभासिकरजतस्य अधिष्ठानतत्त्वसाक्षात्कारेण यः अत्यन्ताभावः निरूप्यते सः यदि व्यावहारिकः


ISSN: 2249-538X

यदि वा पारमार्थिकः उभयथापि तदभावनिरूप्यस्य प्रातिभासिकरजतस्य व्यावहारिकपारमार्थिकत्वयोरभावेन यत् यन्निरूप्यं तत् तत्समानसत्ताकमिति पूर्वपक्षिप्रदर्शितव्याप्तेः व्यभिचारात्, प्रकृते अभावस्य तात्त्विकत्वेऽपि तात्त्विकाभावप्रतियोगिनः प्रपञ्चस्य न तात्त्विकत्वापत्तिः । तथा च न अद्वैतहानिप्रसङ्गः ।

एवमेव मिथ्यात्वलक्षणघटितात्यन्ताभावस्य व्यावहारिकत्वेऽपि न कोपि दोषः । तद्यथा – अत्यन्ताभावस्य व्यावहारिकत्वे अत्यन्ताभावस्य ब्रह्मज्ञानबाध्यत्वेन तत्प्रतियोगिनः प्रपञ्चस्य तात्त्विकत्वाविरोधित्वात् अर्थान्तरत्वमिति नाशङ्कनीयम् । यतः यत्र यत्र अभावस्य बाध्यत्वं तत्र तत्र अभावप्रतियोगिनः पारमार्थिकत्वमिति पूर्वपक्ष्यभिमतव्याप्तेः स्वाप्नपदार्थस्य स्वाप्ननिषेधे व्यभिचारात् । तद्यथा – स्वप्ने आरोपितानां गजादीनां स्वप्ननिषेधे सति मिथ्यात्वव्यवहारदर्शनात् निषेधस्य व्यावहारिकत्वेऽपि न गजादीनां तात्त्विकत्वम् । तथा च निषेधस्य बाध्यत्वं तात्त्विकसत्त्वाविरोधित्वे न प्रयोजकम्। किन्तु निषेध्यपेक्षया न्यूनसत्ताकत्वम्। अर्थात् अभावप्रतियोग्यपेक्षया अभावस्य न्यूनसत्ताकत्वम् अभावप्रतियोगिनः पारमार्थिकत्वाविरोधित्वव्याप्यम् । प्रकृते अत्यन्ताभावः अभावप्रतियोगिनः प्रपञ्चस्य समानसत्ताकः व्यावहारिकः इत्यङ्गीकारात् अभावतत्प्रतियोगिनः तुल्यसत्ताकत्वात् न पारमार्थिकसत्त्वाविरोधित्वेन अर्थान्तरत्वम् ।

बाधितार्थप्रतिपादकत्वेन अद्वैतश्रुतीनामप्रामाण्यत्वं पूर्वपक्षिणा यदुक्तं तत्रोच्यते – तद्वति तत्प्रकारकबोधजनकत्वं प्रामाण्यम् ।तच्च अद्वैतश्रुतीनामस्तीति न अप्रामाण्यशङ्का । यतः प्रपञ्चतदभावयोः ब्रह्मभिन्नत्वेन मिथ्यात्वम् । तच्च तथैव मिथ्यात्वेनैव बोधयन्त्याः श्रुतेः न अप्रामाण्यम् ।

पुनः शङ्कते पूर्ववादी – संयोगिनि देशे समवायिनि वा देशे प्रकृतलक्षणघटितात्यन्ताभावः न सम्भवति प्रत्यक्षविरोधादिति । यथा घटसंयोगिनि भूतले घटात्यन्ताभावासम्भवात् संयोगसम्बन्धेन

ISSN: 2249-538X

घटात्यन्ताभावानुमाने बाधः भवति । एवमेव घटसमवायिनि कपाले समवायेन घटात्यन्ताभावानुमाने बाधः भवति । यदि कालभेदेन कपालादौ घट-तदत्यन्ताभावयोः सम्भववत् एककालेऽपि घटतदभावयोः सम्भवोऽस्तु इत्याङ्गीकारेऽपि तत्तत्कार्यस्य कारणे वस्तुनि नियतोपादानत्वं नोपपद्यते । तथा च सर्वदा घटादिशून्यस्यापि कपालादेः घटादिकारणत्वाङ्गीकारे सर्वदा घटशून्यस्यापि तन्त्वादेः घटकारणत्वकथनापत्तिः स्यात् । तच्च लोकविरुद्धम् ।

अत्रोच्यते – यथा काले कालिकसम्बन्धेन प्रतियोगितदत्यन्ताभावयोः सहसम्भववत् संयोगिनि समवायिनि वा देशेऽपि तदत्यन्ताभावाङ्गीकारे न विरुध्यते । अनेन उपादानत्वादिव्यवहारस्य लोप इति न च वाच्यम्, यतः लोके घटप्रागभावाधिकरणे कपाले घटोपादानव्यवहारः वर्तत एव ।

अत्र पुनः शङ्का क्रियते – पूर्वपक्षिणा संयोगिनि समवायिनि वा देशे अत्यन्ताभावाङ्गीकारे अनुपपत्तिः प्रदर्शिता, सिद्धान्तिना तु प्रागभावस्थलं प्रदर्श्य प्रत्युत्तरमुक्तम् । अपि च अत्यन्ताभावाधिकरणे प्रागभावाङ्गीकारश्च नोपपद्यत इति ।

अत्र समाधानमित्थं भवति – यथा 'इदानीं घटः' 'इदानीं घटाभावः' 'घटो भविष्यति' 'घटो नास्ति' इत्यादिप्रमाणेन समानकाले प्रगभावात्यन्ताभावयोः प्रतियोगितदभावयोर्वा कालिकसम्बन्धेन सामानाधिकरण्यं सिद्धम् । एवमेव संयोगिनि समवायिनि वा देशे स्वात्यन्ताभावप्रतीतौ अद्वैतश्रुतयः प्रपञ्चमिथ्यात्वसाधाकमनुमानादिकं प्रमाणं भवति । इति शम् ।

**********


ISSN: 2249-538X

# ज्ञानगतप्रत्यक्षविचारः

डा. गणपति वि. हेगडे

दार्शनिकप्रपञ्चे प्रमाणानां विषये मतभेद आबहोः कालात् वर्तत एव, तत्रायं श्लोक उच्यते -

**प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।**
**अनुमानञ्च तच्चाथ साङ्ख्याः शब्दं च ते अपि ॥**
**न्यायैकदेशिनोप्येवमुपमानञ्च केचन ।**
**अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः॥**
**अभावषष्ठान्येतानि भाट्टावेदान्तिनस्तथा ।**
**सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः ॥ इति ।**

वेदान्ते प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्ध्याख्यानि षट् प्रमाणानि अभ्युपगतानि । यद्यपि दर्शनस्यास्य प्रतिपाद्यविषय आगमप्रमाणजन्यं जीवब्रह्मैक्यं तथापि वेदान्तिभिः लौकिकवैदिकव्यवहारसिद्धये प्रपञ्चमिथ्यात्वप्रतिपादनाय च प्रत्यक्षादिप्रमाणानि अपि अङ्गीकृतानि । एवं च निष्प्रपञ्चं एकमेवाद्वितीयं ब्रह्मसाधयितुं प्रमाणान्तराणाम् अपि परम्परया उपयोगः ।

इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् इति नैयायिकाः अभ्युपगच्छन्ति। तथा सति स्मृत्यनुमित्योः अपि मनोरूपेन्द्रियजन्यत्वेन प्रत्यक्षत्वप्रसङ्गः । येषां मते मनसः इन्द्रियत्वं नास्ति तेषां मते सुखादिप्रत्यक्षे अव्याप्तं स्यात् । अपि च ईश्वरप्रत्यक्षे साक्षिप्रत्यक्षे च इन्द्रियजन्यत्वाभावात् लक्षणमिदम् अपि अव्याप्तं स्यात् । अतो वेदान्तिनः न्यायमतं खण्डयित्वा प्रत्यक्षप्रमाकरणं प्रत्यक्षम् इति लक्षणं स्वीकुर्वन्ति ।

ननु प्रत्यक्षप्रमाणलक्षणे प्रमापदघटितत्वात् प्रत्यक्षप्रमा आदौ निरूपणीया, तदनन्तरं प्रत्यक्षप्रमाणं निरूपणीयम् इति चेदुच्यते


ISSN: 2249-538X

धर्मराजाध्वरीन्द्रैः **“प्रत्यक्षप्रमा तु चैतन्यमेव”** इति । **“यत्साक्षादपरोक्षात् ब्रह्म”**[1] इति श्रुतेः । ब्रह्म साक्षात् प्रमाणव्यापाररूपं व्यवधानं विना अपरोक्षम् इत्यर्थः । तस्मिन् प्रमाणान्तरनैरपेक्ष्येण वर्तमानम् अपरोक्षत्वं चैतन्यस्य स्वभाव एव । ब्रह्माभिन्नत्वात् जीवोऽपि चैतन्यस्वरूपः, अत एव स्वप्रकाशश्च । चैतन्यं स्वयं प्रकाशमानं स्वसंसृष्टम् अस्वप्रकाशं जडमपि अवभासयति । तथा च विषयप्रकाशकवृत्तिप्रतिबिम्बितचैतन्यं, वृत्त्यभिव्यक्तचैतन्यं वा प्रमा इत्यर्थः । अथवा ज्ञानत्वमेव प्रत्यक्षप्रमालक्षणं, ज्ञानञ्च ब्रह्मैव **“सत्यं ज्ञानमनन्तं ब्रह्म”[2]** इति श्रुतेः । चैतन्यरूपमेव ज्ञानम् अबाधितघटादिवृत्यवच्छिन्नं घटादिप्रमेत्युच्यते । अत एव विशिष्टं चैतन्यं प्रति चक्षुरादेः करणत्वात्, चक्षुरादिइन्द्रियं प्रत्यक्षप्रमाणमिति सङ्गच्छते ।

ननु चैतन्यस्य प्रत्यक्षप्रमात्वे तस्य नित्यत्वात् अजन्यत्वाच्च चक्षुरादीनां तत्करणत्वं न स्यात् इति चेदुच्यते । **चैतन्यस्यानादित्वेऽपि चैतन्याभिव्यञ्जकान्तःकरणवृत्तिः इन्द्रियार्थसन्निकर्षेण जायते** इति । अन्तःकरणे वृत्तिविशिष्टं चैतन्यम् आदिमदित्युच्यते । अत एव विवरणकारैः अन्तःकरणवृत्तौ ज्ञानत्वोपचार इत्युच्यते ।

प्रत्यक्षं तावत् ज्ञानगतं विषयगतं चेति द्विविधम् । यथा इदं घटज्ञानम् इति ज्ञानांशे ज्ञानगतप्रत्यक्षम्, अयं घट इति विषयांशे विषयगतप्रत्यक्षं चेति । भामतीकाराः प्रत्यक्षप्रमाणम् अवलम्ब्य प्रत्यक्षज्ञानद्वारा प्रत्यक्षविषयं प्रतिपादयन्ति । तथा च प्रत्यक्षप्रमाणजन्यं ज्ञानं प्रत्यक्षज्ञानम्, एतादृशप्रत्यक्षज्ञानस्य विषयत्वं च विषयगतप्रत्यक्षत्वम् इति भामतीकाराणां मतम् । अपि च वेदान्तश्रवणादिभ्यः यत् ब्रह्मज्ञानम् उदेति तस्य परोक्षशब्दप्रमाणजन्यत्वात् परोक्षत्वमेव । परब्रह्मविषये

---

[1] बृहदारण्यकोपनिषत्-३-४-१

[2] तैत्तिरीयोपनिषत् -२-१-१


ISSN: 2249-538X

निरन्तरनिदिध्यासनादिना तु अन्ते एतत् ब्रह्मज्ञानं प्रत्यक्षात्मकं भवतीति भामतीपन्थिनः ।

विवरणपन्थिनस्तु वैपरीत्येन विषयस्य प्रत्यक्षत्वम् आदौ प्रतिपाद्य तदवलम्ब्य प्रत्यक्षज्ञानं निरूपयन्ति । तथा च साक्षात् अपरोक्षविषयस्यैव विषयगतप्रत्यक्षत्वम् । प्रत्यक्षविषयम् अवलम्ब्य यत् ज्ञानम् उदेति तत् प्रत्यक्षज्ञानम् । एतादृशप्रत्यक्षज्ञानस्य साक्षात् साधनं च प्रत्यक्षप्रमाणम् इति विवरणकाराणां मतम् । अपि च तत्त्वमस्यादिशब्दजन्यब्रह्मज्ञानस्य परोक्षत्वे अज्ञाननाशाभावप्रसङ्गः । तस्मात् विषयस्य प्रत्यक्षज्ञानं, प्रत्यक्षप्रमाणजन्यं वा भवतु, शब्दप्रमाणजन्यं वा भवतु, न कापि हानिरिति शाब्दापरोक्षवादिनः विवरणपन्थिनः ।

धर्मराजाध्वरीन्द्रास्तु मतद्वयमपि अंशतः समादृत्य, भामतीसम्प्रदायानुसारेण ज्ञानगतप्रत्यक्षम् आदौ निरूप्य, तदनन्तरं विवरणसम्प्रदायानुसारेण विषयगतप्रत्यक्षं निरूपयन्ति । वेदान्तपरिभाषाकाराः ज्ञानगतप्रत्यक्षत्वप्रयोजकलक्षणं **“प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः”** इत्याहुः ।

ननु सिद्धान्ते चैतन्यस्य एकत्वे निरुक्तचैतन्ययोः कथम् अभेद इति चेदुच्यते । यथा एकः महानाकाशः घटाकाशमठाकाशाद्युपाधिभेदेन भिद्यते तथा एकमपि चैतन्यम् उपाधिभेदेन त्रिविधं भवति । तथा हि घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यम्, अन्तःकरणवृत्यवच्छिन्नं चैतन्यं प्रमाणचैतन्यम्, अन्तःकरणावच्छिन्नं चैतन्यं प्रमातृचैतन्यम् , चेति चैतन्यं त्रिविधम् ।

घटादिप्रत्यक्षे सावयवं तैजसं च अन्तःकरणं चक्षुरादिद्वारा निर्गत्य विषयदेशं गत्वा, घटादिविषयाकारेण परिणमते । अन्तःकरणस्य विषयाकारेण एतादृशपरिणामः वृत्तिरित्युच्यते । तया च वृत्या घटादिविषयाधिष्ठानचैतन्यस्य अविद्यात्मकम् आवरणं निरस्यते । ततश्च वृत्यवच्छिन्नचैतन्यविषयावच्छिन्नचैतन्ययोः अभेदः सञ्जायते ।


ISSN: 2249-538X

भेदव्यवहारजनकयोः उपाध्योः अन्तःकरणवृत्तिघटादिविषययोः बहिः एकदेशस्थितत्वेन भेदव्यवहाराजनकत्वात्, तदुपाध्यवच्छिन्नचैतन्ययोः अभेद इत्यर्थः। यथा घटावच्छिन्नाकाशः मठावच्छिन्नाकाशात् न भिद्यते, तथैव चैतन्यं न भिद्यते।

तथा च अयं घट इति प्रत्यक्षस्थले अन्तःकरणवृत्तेः घटरूपविषयाकारप्राप्तत्वेन एकदेशस्थितत्वम् इति घटावच्छिन्नविषयचैतन्यस्य वृत्यवच्छिन्नप्रमाणचैतन्यस्य च अभिन्नतया घटज्ञानस्य घटांशे वृत्यभिव्यक्तघटावच्छिन्नचैतन्यांशे वा ज्ञानगतप्रत्यक्षत्वम् इति लक्षणसमन्वयः।

ननु सुखादीनां बाह्यविषयत्वाभावात् वृत्तेर्बहिर्निर्गमनाभावात् उक्ताभेदासम्भवाच्च लक्षणमिदं सुखादिप्रत्यक्षे अव्याप्तं स्यात्। अपि च सर्वं ज्ञानं साक्षिवेद्यम्। साक्षिवेद्यत्वन्तु प्रमाणान्तराग्राह्यत्वात् पूर्वोक्तप्रमाणविषयचैतन्ययोः अभेदाभावप्रसङ्गाच्च लक्षणमिदं साक्षीप्रत्यक्षेऽपि अव्याप्तं स्यात्। किञ्च ईश्वरस्य अन्तःकरणाभावात् ईश्वरप्रत्यक्षेऽपि अव्याप्तं स्यादिति चेदुच्यते।

उपाध्योरेकदेशस्थितत्वं क्वचित् स्वतः क्वचित् परत इति द्विविधम्। यथा घटादिबाह्यवस्तुप्रत्यक्षे परतः वृत्तेर्बहिर्निर्गमनद्वारा एकदेशस्थितत्वम्। सुखाद्यवच्छिन्नचैतन्यस्य तदाकाराऽविद्यावृत्तिचैतन्यस्य च स्वत एव एकदेशस्थितोपाधिद्वयावच्छिन्नत्वात् अभेद इति नाव्याप्तिः। **तथा च आन्तरप्रत्यक्षे तु वृत्तिविषययोः सर्वदा एकस्मिन् देशे सम्बन्धात् एकदेशस्थितत्वं स्वत एव**[1]। किञ्च साक्षिवेद्येषु ज्ञानसुखादिषु अविद्यावृत्यच्छिन्नचैतन्याभेदस्य सत्वात् नाव्याप्तिः। ईश्वरप्रत्यक्षविषयेषु मायावृत्यच्छिन्नचैतन्याभेदस्य सत्वात् नाव्याप्तिः।

ननु एवमपि पूर्वम् अहं सुखी इत्यादौ सुखादिविषयस्य तद्गोचरस्मृतिरूपाविद्यावृत्तेश्च एकदेशस्थत्वात् सुखाद्यवच्छिन्नतद्वृत्यवच्छिन्न-चैतन्ययोः अभेदात् स्मृतेः प्रत्यक्षत्वापत्तिः इति चेन्न। तद्वारणाय **'वर्तमानत्वं'**

[1] पञ्चाननशास्त्रिकृतवेदान्तपरिभाषाटीकायां पृष्ठसङ्ख्या -३६

ISSN: 2249-538X

विषयविशेषणम् दीयते । स्मृतेः अतीतकालत्वेन पूर्वोक्तचैतन्ययोः अभेदो न सञ्जायत इति स्मृतेः न प्रत्यक्षत्वापत्तिः ।

ननु यदा **'त्वं धार्मिकः'** इत्यादिवाक्येन अहं धर्मवान् सुखित्वात् इत्याद्यनुमानेन वा वर्तमानौ स्वकीयधर्माधर्मौ ज्ञायेते, तदा तादृशे शब्दजन्ये अनुमानजन्ये वा स्वकीयधर्मादिविषयकपरोक्षज्ञाने प्रत्यक्षत्वप्रयोजकमिदम् अतिप्रसक्तम् स्यात् । यथा धर्माधर्मविषयस्य तदाकारान्तःकरणवृत्तेश्च एकस्मिन्नन्तःकरणे वर्तमानत्वेन च धर्माद्यवच्छिन्नचैतन्यतद्वृत्त्यवच्छिन्न-चैतन्ययोः एकत्वात् प्रत्यक्षत्वापत्तिरिति चेदुच्यते । प्रत्यक्षयोग्यत्वस्यापि विषयविशेषणत्वात् न स्वकीयधर्माधर्मादीनां प्रत्यक्षत्वापत्तिरिति । धर्माधर्मादीनाम् अन्तःकरणधर्मत्वाविशेषेऽपि सुखादीनां प्रत्यक्षयोग्यत्वं, धर्माधर्मादीनां च प्रत्यक्षायोग्यत्वमिति स्वीकारात् नातिव्याप्तिः । किञ्च त्वं सुखीतिवाक्यजन्यज्ञानस्य प्रत्यक्षत्वं स्यादिति चेत् । इष्टापत्तिः दशमस्त्वमसि इत्यादौ सन्निकृष्टविषये शब्दादपि अपरोक्षज्ञानाभ्युपगमात् ।

तस्मादेव पर्वतो वह्निमान् इत्यादिसन्निकृष्टपक्षकानुमितौ पर्वताद्यवच्छिन्नचैतन्यस्य बहिः निःसृतान्तःकरणवृत्यवच्छिन्नचैतन्यस्य च भेदाभावात्, पर्वतांशे अपरोक्षत्वम् । वह्न्यंशे तु वृत्तेर्बहिर्निर्गमनाभावात् परोक्षत्वमेव । अनुभवः अत्र प्रमाणं पर्वतं पश्यामि, वह्निमनुमिनोमि इति । सुरभिचन्दनमित्यत्रापि ज्ञानं चन्दनखण्डांशे अपरोक्षम्, सौरभांशे परोक्षम् । तथा च तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं तत्तदाकारवृत्यवच्छिन्नज्ञानस्य तत्तदंशे प्रत्यक्षत्वम् इति निष्कृष्टलक्षणम् । अत्र इन्द्रिययोग्य इत्यस्य यथाश्रुतार्थग्रहणे सुखादिप्रत्यक्षे ईश्वरप्रत्यक्षे साक्षिप्रत्यक्षे च अव्याप्तिः स्यात् तत्तत्प्रत्यक्षविषयाणाम् इन्द्रिययोग्यत्वाभावात् । तस्मात् इन्द्रिययोग्य इत्यस्य प्रत्यक्षयोग्य इत्यर्थः स्वीकर्तव्यः । तथा च प्रत्यक्षयोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नतत्तदाकारवृत्यवच्छिन्नचैतन्यं ज्ञानगतप्रत्यक्षत्वम् इति फलितम् ।

**********


ISSN: 2249-538X

# अपवादः

डा. सि. एस्. एस्. नरसिंहमूर्तिः

परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति प्राचीनानां वैयाकरणानामेका परिभाषा वर्तते। तया इत्थं बोध्यते - यत्र लक्ष्ये द्वयोः शास्त्रयोः प्राप्तिर्भवति, तत्र तयोर्मध्ये केन शास्त्रेण विधीयमानं कार्यं प्रवर्तनीयमिति सन्देहे इयं पूर्वशास्त्रापेक्षया परशास्त्रं प्रबलमिति, परशास्त्रापेक्षया नित्यशास्त्रं प्रबलमिति, नित्यशास्त्रापेक्षया अन्तरङ्गशास्त्रं प्रबलमिति, अन्तरङ्गापेक्षया अपवादशास्त्रं प्रबलमित्युत्तरोत्तरं विद्यमानस्य शास्त्रस्य प्राबल्यं बोधयति। अनया परिभाषया अपवादशास्त्रस्य सर्वेषामपेक्षया बलवत्त्वं विज्ञायते। सम्प्रति अपवादपदार्थः कः इति विचार्यते -

येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इति अपवादस्वरूपबोधिका परिभाषा। अत्र परिभाषायाम् अंशद्वयं विद्यते।

१. येन नाप्राप्ते यो विधिः आरभ्यते स इति अंशेन अपवादस्वरूपम् उपपादितं भवति।

२. तस्य बाधको भवति इति अंशेन अपवादत्वेन अभिमतस्य बाधकत्वं यल्लोकसिद्धं तदेव अनूद्यते।

दृश्यते च लोकव्यवहारेऽपि क्वचिद् बलवान् व्यक्तिविशेषः स्वापेक्षया दुर्बलं व्यक्तिविशेषं बाधते। एतच्च विरोधे सत्येव। विरोधाभावे बलवत्कर्तृकस्य बाधस्य लोकेऽप्यदर्शनात्। एवं च बलवत्पुरुषस्थानापन्नम् अपवादशास्त्रं दुर्बलपुरुषस्थानापन्नानि परनित्यान्तरङ्गशास्त्राणि बाधते। तथाच अपवादशास्त्रं परनित्यान्तरङ्गशास्त्राणि बाधते इति लभ्यते।

परिभाषायाः अर्थः इत्थं वर्णनीयः - येन इत्यत्र तृतीया कर्तरि विहिता। प्राप्ते इत्यत्र क्तप्रत्ययः भावे विहितः। भावः नाम धात्वर्थः। धात्वर्थश्च क्रिया। क्तप्रत्ययः भावे विहितः इति हेतोः कर्ता अनभिहितः। कर्तुः


ISSN: 2249-538X

अनभिहितत्वाद् येन इत्यत्र कर्तृकरणयोस्तृतीया (२-३-१८) इत्यनेन कर्तरि तृतीया। तथाच यत्कर्तृकप्राप्तौ सत्याम् इत्यर्थः एतावता सिद्ध्यति। नाप्राप्ते इत्यत्र न प्राप्तः = अप्राप्तः इति नञ्समासः। नञ्तत्पुरुषस्य अप्राप्तः इत्यस्य निषेधार्थकेन न इति शब्देन समासः। नाप्राप्ते इति सिद्ध्यति। अत्र द्वितीयः यः समासः उक्तः स तावत् नञ्समासो न, किन्तु सह सुपा (२-१-४) इत्यनेन समासः। अतः नलोपो नञः (६-३-७३) इति नकारलोपो न भवति। तथाच नाप्राप्त इति रूपम्। तस्मिन् नाप्राप्ते। भाष्यकारवचनसामर्थ्यात् पृषोदरादित्वाद्वा समासः। स्पष्टा चेयं रीतिः नञ्सूत्रे भाष्ये ।

नञ्द्वयं प्रकृतार्थदार्ढ्यबोधनाय इति अभियुक्तोक्तेः, प्राप्तिरूपस्य अर्थस्य प्रकृतत्वेन तस्यैव दार्ढ्यम् अनेन नञ्द्वयेन बोध्यते। तथाच यत्कर्तृक-अवश्यप्राप्तौ इत्यर्थः फलति। परिभाषायाः अर्थः - यत्कर्तृक-अवश्यप्राप्तौ यो विधिः आरभ्यते स तस्य बाधकः भवति इति सिद्ध्यति। एवं च सामान्यशास्त्रस्य अवश्यप्राप्तौ सत्याम् आरभ्यमाणं विशेषशास्त्रम्, तस्य = सामान्यशास्त्रस्य, बाधकं भवति इत्यर्थः सिद्ध्यति। कर्मवाचके उपपदे धातोः अण् प्रत्ययः भवति इति बोधयति कर्मण्यण् (३-२-१) इति सूत्रम्। एवं सामान्यसूत्रेण कर्मण्यण् इत्यनेन अवश्यप्राप्ते अणप्रत्यये आरभ्यमाणः विधिः = आतोऽनुपसर्गे कः (३-२-३) कर्मवाचके उपपदे आदन्ताद् धातोः कः भवति इत्यर्थबोधकः कप्रत्ययविधिः उत्सर्गस्य अणप्रत्ययविधेः बाधकः भवति।

**अपवादस्य प्राबल्ये हेतुः**

पूर्वपरनित्यान्तरङ्गेभ्यः अपवादशास्त्रस्य प्राबल्यम् अस्तीति परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः इति परिभाषया ज्ञायते। किन्तु अपवादशास्त्रस्य प्राबल्ये किं कारणम् इति पूर्वं न विचारितम्। अपवादशास्त्रस्य प्राबल्ये कारणं किम् इति प्रकृते विचार्यते। अपवादशास्त्रस्य प्राबल्यं कुतः इति प्रकृतपरिभाषायाः स्वरूपदर्शनेन ज्ञातुं शक्यते। तथाहि - अवश्यप्राप्तविधौ सति


ISSN: 2249-538X

आरभ्यमाणं विध्यन्तरम् अवश्यप्राप्तविधिं बाधते। यथा गुणशास्त्रस्य अपवादः वृद्धिशास्त्रम्। आद्गुणः (६-१-८७), वृद्धिरेचि (६-१-८८) इति सूत्रेण विधीयमानया वृद्ध्या बाध्यते। आद्गुणः इति सूत्रे इको यणचि (६-१-७७) इति सूत्राद् अचि इति पदम् अनुवर्तते। आद्गुणः इति सूत्रेण अवर्णादचि परे गुणः एकादेशः विधीयते। वृद्धिरेचि इति सूत्रेण अवर्णादेचि परे वृद्धिरेकादेशः विधीयते। आद्गुणः इत्यस्य प्रवृत्तिं प्रति अकाराव्यवहितपरः अच् निमित्तम्। वृद्धिरेचि इति वृद्धिं प्रति अकाराव्यवहितपरः एच् निमित्तम् अस्ति। एच्च अक्ष्वन्तर्भूतः। अतः अवर्णादचि परे गुणः एकादेशः भवति इति वृद्धिप्राप्तियोग्यस्थलेऽपि गुणस्यैव प्रसक्त्या वृद्धेः निरवकाशता स्यात्। आद्गुणः इति शास्त्रस्य रमा + ईशः = रमेशः इत्यादौ चारितार्थ्यम् अस्ति। तत्र वृद्धिशास्त्रस्य प्रसक्तिः नास्ति। कृष्ण + एकत्वम् = कृष्णैकत्वम् इति वृद्धिरेचि इत्यस्य प्राप्तियोग्यं स्थलम्। अत्र कृष्णैकत्वम् इति उदाहरणे आद्गुणः इत्यस्य अपि प्राप्तिरस्ति। यद्याद्गुणः इत्यस्य प्रवृत्तिः स्यात् तर्हि वृद्धिशास्त्रस्य निरवकाशता स्यात्। यतो हि यत्र यत्र वृद्धिरेचि इत्यस्य प्राप्तिः भवति तत्र सर्वत्रापि आद्गुणः इत्यस्यापि प्राप्तिः भवत्येव। आद्गुणः इति शास्त्रकर्तृकावश्यप्राप्तौ सत्याम् आरभ्यमाणं शास्त्रं वृद्धिरेचि इति शास्त्रम्, तत् , तस्य = आद्गुणः इति अवश्यप्राप्तशास्त्रस्य बाधकम् इति निर्गलितः अर्थः। तथा सति निरवकाशं वृद्धिशास्त्रं रमेशः इत्यादौ सावकाशम् आद्गुणः इति शास्त्रं बाधते। अतः कृष्णैकत्वम् इत्यत्र वृद्धिशास्त्रम् एव प्रवर्तते।

**अपवादस्वरूपविमर्शः**

अपवादस्य बाधकत्वे निरवकाशत्वं कारणं भवति। तदुक्तं मूले ग्रन्थकृता विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मावच्छिन्नोद्देश्य-कशास्त्रस्य विशेषशास्त्रेण बाधः इति। विशेषशास्त्रोद्देश्यं च इदं विशेषधर्मावच्छिन्नम् इति कर्मधारयः। विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्ने वृत्तिः यस्य इति व्यधिकरणबहुव्रीहिः। अन्यपदार्थः सामान्यधर्मः।


ISSN: 2249-538X

विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिः चासौ सामान्यधर्मः = विशेषशास्त्रोद्देश्यविशेषधर्मावच्छिन्नवृत्तिसामान्यधर्मः तेन अवच्छिन्नम् उद्देश्यं यस्य तत् सामान्यशास्त्रम्। तस्य शास्त्रस्य विशेषशास्त्रेण बाधः।

विशेषशास्त्रम् = आतोऽनुपसर्गे कः

तस्य उद्देश्यम् = कर्मोपपदक-अनुपसर्गक-आदन्तधातुः

तत्र वृत्तिः यः सामान्यधर्मः = कर्मोपपदक-धातुत्वधर्मः

तदवच्छिन्नोद्देश्यकं शास्त्रम् = कर्मण्यण् इति शास्त्रम् , अस्य शास्त्रस्य

विशेषधर्मावच्छिन्नोद्देश्यकशास्त्रेण = कर्मोपपदक-अनुपसर्गक-आदन्तधातूद्देश्यकेन आतोऽनुपसर्गे कः इत्यनेन बाधः।

**अपवादस्य बाधकत्वे किं बीजम् इति विचारः**

उत्सर्गशास्त्रस्य अप्राप्तियोग्यस्थले यस्य शास्त्रस्य चारितार्थ्यं न भवति तदपवादशास्त्रं भवति। यथा - आद्गुणः, वृद्धिरेचि। अत्र आद्गुणः इत्यस्य अप्राप्तियोग्यस्थले कृष्ण + एकत्वम् इत्यत्र वृद्धिरेचि इत्यस्य अचारितार्थ्यम् एव वृद्धिरेचि इत्यस्य बाधकत्वे बीजम्। गुणस्य अप्राप्तियोग्ये वृद्धेः चारितार्थ्याभावः वृद्धेः बाधकत्वे कारणम् इति तात्पर्यम्। एवमेव आतोऽनुपसर्गे कः (३-२-३) इति शास्त्रेण कर्मण्यण् (३-२-१) इति उत्सर्गशास्त्रस्य बाधः। कर्मण्यण् इत्यस्य अप्राप्तिस्थले आतोऽनुपसर्गे क: इति कप्रत्ययस्य चारितार्थ्याभावात्। एतादृशस्थले हि उत्सर्गशास्त्रस्योद्देश्ये अपवादशास्त्रस्य प्रवृत्तियोग्यलक्ष्यातिरिक्तविषयकत्वेन संकोच: क्रियते। तेन कर्मण्यण् इति शास्त्रस्य कर्मण्युपपदे अनुपसर्गक-आदन्तेतरधातो: अण् भवतीत्यर्थ: वर्णनीय:।

येन नाप्राप्तिन्यायेन उत्सर्गशास्त्रप्रवृत्त्युत्तरम्, तत्पूर्वकालम्, समकालं वा यत्र अपवादशास्त्रस्य प्राप्ति: तत्रापि बाधकत्वम् अङ्गीक्रियते। यथा - सर्वेषाम् इति। सर्व+ आम् इति स्थिते ह्रस्वनद्यापो नुट् (७-१-५४) इति नुट: प्राप्तिरस्ति। इदञ्च उत्सर्गशास्त्रं भवति। अस्याप्राप्तिस्थले अपवादशास्त्रस्य आमि सर्वनाम्न:


ISSN: 2249-538X

सुट् (७-१-५२) इत्यस्याचारितार्थ्यमस्ति। यद्यपि उत्सर्गशास्त्रस्य नुटः प्रवृत्त्यनन्तरं यदागमन्यायेन नुड्विशिष्टस्यामो ग्रहणेन ग्रहणात् सुटः चारितार्थ्यं वक्तुं शक्यम्। तथापि सुटा नुटः बाधात् सुडनन्तरं नुड् न भवति। इत्थं बाधकत्वानङ्गीकारे अनवकाशत्वेनैव व्याप्यशास्त्रेण व्यापकशास्त्रस्य बाधे सिद्धे येन नाप्राप्तिन्यायस्य पृथक्कथनस्य किं वैशिष्ट्यम्? लौकिकस्य तक्रकौण्डिन्यन्यायप्रदर्शनस्य किं प्रयोजनम्? ब्राह्मणेभ्यो दधि दीयताम्, तक्रं कौण्डिन्याय इति। अत्र सर्वथा चारितार्थ्याभावस्यैव बाधकत्वाङ्गीकारे तक्रदानेन दधिदानस्य बाधः न स्यात्, दधिदानोत्तरम्, दधिदानात्पूर्वं वा तक्रदानस्य चारितार्थ्यात्।

यथा प्रथमद्विर्वचनस्य तदुत्तरं सावकाशेनापि द्वितीयद्विर्वचनेन बाधः। अत एव ऊर्णुनाव इत्यत्र न प्रथमस्यैकाचः द्वित्वम्। तत्र प्रथमस्यैकाचः एकाचो द्वे प्रथमस्य (६-१-१) इति द्वित्वे कृतेऽपि अजादेर्द्वितीयस्य (६-१-२) इत्यपवादस्य चारितार्थ्यमस्ति। तथापि अपवादत्वमङ्गीकृत्य बाधः कथ्यते। एवमेव आदेरपि प्रवृत्त्या चारितार्थ्येन आदेः परस्य इत्यनेन अलोन्त्यस्य इति शास्त्रस्य बाधः अङ्गीक्रियते। यथा - उत्थानम् इत्यत्र उद् + स्थानम् इति स्थिते उदः स्थास्तम्भोः पूर्वस्य (८-४-६१) इत्यनेन पूर्वसवर्णः कर्तव्यः। स च अलोऽन्त्यस्य(१-१-५२) इत्यनेन अन्त्यस्य स्थाने प्राप्नोति, आदेः परस्य(१-१-५४) इत्यनेन आदेः वर्णस्य स्थाने प्राप्नोति। अत्र अलोऽन्त्यस्य इत्यनेन अन्त्यस्य पूर्वसवर्णप्रवृत्त्यनन्तरमपि आदेः परस्येत्यस्य प्रवृत्तिः वक्तुं शक्यते। तथापि आदेः परस्य इत्यनेन अलोऽन्त्यस्य इति शास्त्रस्य बाधः अङ्गीकृतः। उक्तं च मिदचोऽन्त्यात्परः (१-१-४७) इति सूत्रे भाष्यकारेण - नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति - अपवादैः उत्सर्गाः बाध्यन्तामिति। किं तर्हि? लौकिकोऽयं दृष्टान्तः - लोके हि सत्यपि सम्भवे बाधनं भवति। तद्यथा दधि ब्राह्मणेभ्यो दीयताम् तक्रं कौण्डिन्याय इति।

कृते चारितार्थ्ये सत्यपि तदप्राप्तियोग्येऽचारितार्थ्यमात्रेणानेन

ISSN: 2249-538X

बाधकत्वाङ्गीकारे आयादय आर्धधातुके वा (३-१-३१ ) इति सूत्रस्थं भाष्यमपि प्रमाणं वर्तते। **तत्रहि - स्यादिबलीयस्त्वन्तु विप्रतिषेधेन तुल्यनिमित्तत्वात्। स्यादिभिस्त्वायादीनां बाधनं प्राप्नोति, किं कारणम्? विप्रतिषेधेन तुल्यनिमित्तत्वात्। तुल्यं वा निमित्तमायादीनां स्यादीनाञ्च। स्यादीनामवकाशः - करिष्यति, हरिष्यति। आयादीनामवकाशः - गोपायति, धूपायति इति। इहोभयं प्राप्नोति - गोपायिष्यति , धूपायिष्यति इत्यत्र आयादीन्बाधित्वा परत्वात् स्यादयः प्राप्नुवन्ति** इत्याशङ्क्य **"अनवकाशाः आयादयः"** इत्युक्तम्। स्याद्यप्राप्तियोग्ये लिटि, आशीर्लि ङि च तत्सूत्रविहितानाम् आयादीनां चारितार्थ्यात्। एवञ्च शपि कृते चरितार्थानामपि आयादीनामनवकाशत्वप्रतिपादनपरेण अनेन भाष्येण उत्सर्गशास्त्रप्रवृत्तिकालिकलक्ष्यशून्यत्वलक्षणम् अनवकाशत्वम् उभयसाधारणं बाधकताबीजमिति भाष्यकाराणामाशयः।

**विषयभेदे अपवादत्वं वर्तते इति विचारः**

विषयभेदेऽपि अपवादत्वं शास्त्रे स्वीक्रियते। अत्र च प्रमाणम् - न तिसृचतसृ (६-४-४) इति नामि परे तिसृ, चतसृ एतयोः दीर्घनिषेधविधायकं सूत्रम्। तथाहि - त्रिशब्दस्य स्त्रीलिङ्गे षष्ठीबहुवचने आम्प्रत्यये त्रिचतुरोः स्त्रियां तिसृचतसृ (७-२-९९) इत्यनेन तिस्रादेशे तिसृ + आम् इति जाते अचि र ऋतः(७-२-१००) इति रादेशः प्राप्नोति, ह्रस्वनद्यापो नुट् (७-१-५४) इति नुडागमश्च प्राप्नोति। नुडागमं बाधित्वाऽपवादत्वात् रादेशे प्राप्ते **नुमचिरतृज्वद्भावगुणेभ्यो नुट् पूर्वविप्रतिषेधेन** इति वचनेन नुडागमे तिसृ + नाम् नामि इत्यनेन दीर्घे प्राप्ते तद्वारणाय न तिसृ - इत्यादिनिषेधः, णत्वे तिसृणाम् इति रूपं भवति। अत्र रादेशः प्रकृतेः विधीयते, नुडागमः प्रत्ययस्य विधीयते। एवं विषयभेदः वर्तते। तथापि अपवादत्वं स्वीकृतम्। अन्यथा नुटं बाधित्वा परत्वात् रादेशे तिस्र् +आम् इति जाते नुटः अप्राप्त्या तिसृचतस्रोः नाम्परत्वासम्भवेन दीर्घस्य प्राप्तेरेवाभावेन नामि परे तयोः दीर्घनिषेधविधानं


ISSN: 2249-538X

व्यर्थम्। आचार्यप्रवृत्तिः ज्ञापयति - न रादेशो नुटं बाधत इति यदयं न तिसृचतसृ इति प्रतिषेधं शास्ति नामि दीर्घत्वस्य इति। विषयभेदे बाध्यबाधकभावानङ्गीकारे तयोः बाध्यबाधकशङ्कां कृत्वा ज्ञापकेन तद्वारणं सुतराम् असङ्गतं स्यात्।

**विषयभेदे अपवादत्वाभावः इत्याशयवर्णनम्**

केचन एवं वदन्ति - न तिसृचतसृ इति निषेधेन विषयभेदेऽपवादत्वाभावः बोध्यते इति। तेषामयमाशयः - तिसृ + आम् इति स्थिते अचि र ऋतः(७-२-१००  ) इति रादेशः प्राप्नोति, ह्रस्वनद्यापो नुट् (७-१-५४) इति नुडागमश्च प्राप्नोति। विषयभेदेऽपि बाध्यबाधकभावस्वीकारे अपवादत्वात् रादेशे तिस्र् +आम् इति जाते नुटः अप्राप्त्या तिसृचतस्रोः नाम्परत्वासम्भवेन दीर्घस्य प्राप्तेरेवाभावेन नामि परे तयोः दीर्घनिषेधविधानं व्यर्थम्। तद्व्यर्थीभूय विषयभेदे न बाध्यबाधकभावः इति ज्ञापयति। अतः रादेश-नुटोः न बाध्यबाधकभावः। अतः पूर्वं नुटि नाम्परकत्वाद् दीर्घे प्राप्ते तद्वारणाय स्वांशे सूत्रं चरितार्थम्।

**तन्मतखण्डनम्**

स्रजिष्ठः इति रूपसिद्धिः भाष्ये एवं प्रदर्शिता - अतिशयेन स्रग्वी = स्रजिष्ठः। स्रग्विन् + इष्ठ इति स्थिते नस्तद्धिते इति टिलोपः प्राप्नोति, विन्मतोर्लुक् इत्यनेन विनः लुक् प्राप्नोति। विन्मतोर्लुक् विशिष्य विनः विधानात् टिलोपस्य अपवादः भवति। अतः विनः लुक् भवति। स्रज् + इष्ठ इति स्थिते इदानीं पुनः टेः इत्यनेन टिलोपः (अज्) प्राप्नोति इत्याशङ्क्य विन्मतोर्लुक् टिलोपसामान्यस्य बाधकः भवति इत्युक्तम्। अत्र विन्मतोर्लुक् विन् इत्यस्य, प्रथमटिलोपः इन् इत्यस्य, अनन्तरं टिलोपः अज् इत्यस्य। अथापि अत्र बाध्यबाधकभावः अङ्गीकृतः भाष्यकारेण। अतः विषयभेदेऽपि अपवादत्वं भाष्याभिमतमस्ति।

**कैयटाशयः - तत्परिशीलनञ्च**


ISSN: 2249-538X

दयतेर्दिगि लिटि (७-४-९) इति सूत्रेण देङ् धातोः लिटि दिगि इत्यादेशः विहितः। देङ् - धातोः कर्तरि लिटि प्रथमपुरुषैकवचने आत्मनेपदे तप्रत्यये दे+त इति स्थिते द्वित्वं प्राप्नोति, दिग्यादेशश्च प्राप्नोति। द्वित्वं बाधित्वा अपवादत्वाद् दिग्यादेशः भवति। अतः दिग्ये इति रूपं भवति। अत्र द्वित्वोत्तरं दिग्यादेशस्य चारितार्थ्यं कैयटेन इत्थमुक्तम् - **नन्ववश्यमनवकाशेन बाधकेन भाव्यम्। नैवायमनवकाशः। कृतेऽपि द्विर्वचने प्रवृत्त्यविघाताद्** इति। अस्यायमाशयः - द्वित्वोत्तरं चरितार्थस्य दिग्यादेशस्य द्वित्वबाधकत्वं नोपपद्यते।

सत्यपि सम्भवे तदप्राप्तिविषये चारितार्थ्याभावमात्रेण बाधकतायाः भाष्यकृता तत्र तत्र उक्तत्वात्। अतः कैयटोक्तं व्याख्यानम् अयुक्तम्। अनन्तरभाष्यव्याख्यानसन्दर्भे कैयटः एवमलिखत् - अथ पुनरेवमप्यनवकाशं मन्यसे। तदा लक्ष्यदोषप्रसङ्गः। बभूवेति। इति तदुत्तरग्रन्थेन पूर्वग्रन्थः स्वानभिमत इति निश्चीयते।

**बाधकत्वविषये निष्कर्षः**

असम्भव एव बाधकत्वं विरोधस्य तद्बीजत्वाद् इति वार्तिककारमतम्। सत्यपि सम्भवे बाधनं भवतीति भाष्यकारस्याशयः। वार्तिककाररीत्या दिग्यादेशेन द्वित्वबाधनं वक्तुं न शक्यम्, यतः तदुत्तरमपि द्वित्वस्य प्राप्तेः। अतः वार्तिककारमतं लक्ष्यसिद्ध्युपयोगि न भवतीति भाष्यकारेण त्यक्तम्। उक्तं हि मिदचोऽन्त्यात्परः (१-१-४७) इति सूत्रे भाष्यकारेण - **नैवेश्वर आज्ञापयति, नापि धर्मसूत्रकाराः पठन्ति - अपवादैः उत्सर्गाः बाध्यन्तामिति। किं तर्हि? लौकिकोऽयं दृष्टान्तः - लोके हि सत्यपि सम्भवे बाधनं भवति। तद्यथा दधि ब्राह्मणेभ्यो दीयताम् तक्रं कौण्डिन्याय इति।**

तक्रकौण्डिन्यन्यायमूलकः बाधः निरवकाशत्वेन बाधश्च उभावपि बाधौ येन नाप्राप्तन्यायबाधे एवान्तर्भवतः। अतः उभयोरपि समानविषयकत्वं विद्यते। तक्रकौण्डिन्यन्यायः, इयं परिभाषा च विधेयविषयः, तदप्राप्तियोग्याऽचारितार्थ्यविषयः इति परिभाषेन्दुशेखरकाराशयः।

**********


ISSN: 2249-538X

# विशेषणं विशेष्येण बहुलम्

डा.चन्द्रशेखरभट्टः

नमस्कुर्मो मुनित्रयाय। द्वितीयाध्यायस्य प्रथमपादे सप्तपञ्चाशं सूत्रमिदं समानाधिकरणसमासविधायकम्। पूर्वकालैक इत्यादिसूत्रात्समानाधिकरणेन इति सुबामन्त्रिते पराङ्गवत्स्वरे इति सूत्रात् सुपा इति सह सुपा इति सूत्रात् सुपा इति पदञ्चानुवर्तते। विशिष्यतेऽनेन इत्यर्थे विपूर्वात् शिष् धातोः ल्युटि निष्पन्नो विशेषणशब्दः। यत्साधारणाकारेण प्रतिपन्नं बहुप्रकारकं वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्य एकस्मिन्प्रकारे व्यवस्थापयति तद्विशेषणम्। भेदकमित्यर्थः। विशिष्यत इति विशेष्यः। विपूर्वकशिषधातोः कर्मणि ण्यत्प्रत्ययः। तथा च विशेषणसमर्पकं(भेदकम्) सुबन्तं विशेष्यसमर्पकेण (भेद्येन) सुबन्तेन समस्यते, तत्पुरुषश्च समासो भवति। अयञ्च कर्मधारयव्यपदेश्यः तत्पुरुषः समानाधिकरणः कर्मधारयः इति सूत्रात्। नीलोत्पलमित्युदाहरणम्। इह नीलपदम् उत्पलम् अनीलेभ्यो व्यावर्तयतीति विशेषणसमर्पकम्। उत्पलशब्दो विशेष्यः। विशेषणशब्दस्य समासविधायकशास्त्रे प्रथमानिर्दिष्टत्वेन उपसर्जनत्वात् तदुपस्थाप्यस्य नीलपदस्य पूर्वनिपातः।

ननु सूत्रे विशेषणविशेष्ययोरुभयोपादानं कुतः? सम्बन्धिशब्दावेतौ, सति विशेषणे विशेष्यं, सति च विशेष्ये विशेषणम्। तथाचान्यतरोपादानेनेष्टसिद्धिरिति भावः। अत्र कैयट आह उभयोपादानं स्पष्टार्थम् इति। परं न्यास-पदमञ्जरीकृतौ पूर्वोत्तरप्दयोरुभयोरपि प्रत्येकं विशेषणविशेष्यभावः तत्रैव समासो यथा स्यादित्युभयोपादानम् इत्याहतुः। अयमाशयः - यदा पूर्वपदं विशेष्यं तदोत्तरपदं विशेषणम्, यदा चोत्तरपदं विशेष्यं तदा पूर्वपदं विशेषणमिति परस्परस्वधर्मव्यभिचारित्व एव समासप्रवृत्तिः। यथा नीलोत्पलम्। अत्र हि नीलार्थः भ्रमरकोकिलादिसाधारणरूपेण प्रतिपन्नः उत्पलार्थेन उत्पले व्यवस्थाप्यते यदा तदा नीलमिति विशेष्यम् उत्पलञ्च

ISSN: 2249-538X

विशेषणम्। अथ उत्पलार्थः रक्तादिसाधारणरूपेण प्रतिपन्नः नीलार्थेन नीले व्यवस्थाप्यते तदा नीलमिति विशेषणम्, उत्पलमिति विशेष्यम् इत्येवं भवत्युभयोरुभयभावः। यत्र तु स्वधर्मव्यभिचारो नास्ति न तत्र समासोऽस्ति। यथा तक्षकः सर्प इति। तक्षको नाम सर्पविशेषः, स च सर्पत्वं न कदापि व्यभिचरति। अतो नोभयभाव इति । श्रीमन्तो दीक्षितास्तु कैयटाशयस्य युक्तत्वं मन्वानाः हरदत्तमतं दूषयामासुः। तथा हि परस्परव्यभिचारित्वे एव समास इति तक्षकः सर्प इत्यत्र समासाभावं ब्रुवता हरदत्तेनैव शिंशपावृक्ष इत्यत्र समास उपापादि। तद्रीत्या तु तन्न तुक्तम्। वृक्षः शिंशपात्वं व्यभिचरति किन्तु शिंशपा न कदापि वृक्षत्वं व्यभिचरति। शिंशपा हि पलाशादिसाधारणाकारेण प्रतिपन्नं वृक्षपदार्थं पलाशादिभ्यो व्यवच्छिनत्ति। अतश्च तद्विशेषणमेव। शिंशपा तु वृक्षत्वं न व्यभिचरतीति वृक्षो विशेषणं भवितुं नार्हति।अतस्तन्मते तक्षकः सर्प इत्यतः शिंशपावृक्षः इत्येतन्नातिरिच्यते। तस्मात् व्यस्त एव प्रयोगः कार्यः वृक्षः शिंशपा इति।

यद्युच्यते शिंशपाशब्दस्य फलेऽपि दर्शनात् वृक्षत्वव्यभिचारात् समासो भवत्येवेति तदपि न समञ्जसम्। तत्र शिंशपायाः फलं शिंशपा इति व्युत्पत्तिर्वाच्या। शिंशपाशब्दात् विकारार्थे (फले) उत्पन्नस्य प्रत्ययस्य हरीतक्यादिभ्यश्च इति लुब्वक्तव्यः। ततो लुपि युक्तवद्व्यक्तिवचने इति युक्तवद्भावे सति शिंशपा इत्येव रूपं भवति। अत्रापि वृक्षप्रतीतिपूर्वकैव फलप्रतीतिरिति फलप्रतीतेर्बहिरङ्गत्वादन्तरङ्गवृक्षप्रतीतेरेव ग्राह्यतया न व्यभिचरति वृक्षत्वं शिंशपा इति समासो दुर्लभ एव।

अथोच्येत लुब्योगाप्रख्यानादिति शास्त्रस्वरसात् शिंशपाशब्दस्य फले एव मुख्या वृत्तिः। तथा च सूत्रकारेण तदशिष्यंसंज्ञाप्रमाणत्वात् इति युक्तवद्भावस्यानावश्यकतामुक्त्वा लुब्योगाप्रख्यानादित्युक्तम्। लुब्विधायकान्यपि शास्त्राणि नारम्भणीयानि योगस्य अवयवार्थस्य अप्रख्यानात् अप्रतीतेः। पञ्चाला अङ्गा वङ्गा इत्यादयः शब्दाः यथा क्षत्रियादिषु रूढास्तथा जनपदेऽपि रूढाः इति


ISSN: 2249-538X

तस्य निवासः, अदूरभवश्च इति तद्धितो नैवोत्पद्यते। अतो लुप् न विधेयः। एवमिहापि शिंशपाशब्दो यथा वृक्षे रूढस्तथा फलेऽपि इति न तस्य वृक्षसम्बन्धात् फले वृत्तिः। एवञ्च शिंशपा वृक्षत्वं व्यभिचरतीति भवति विशेषणमिति समाससिद्धिरिति चेत्, अत्रोच्यते- तक्षकशब्देऽपि तुल्यमेतत्। तक्षको नाग वर्धक्योः इति नानार्थकोशात् तक्षकशब्दस्य वर्धकावपि रूढत्वात् सर्पत्वव्यभिचारोऽस्तीति समासप्रसङ्गात्। न च सर्पत्वव्याप्यं तक्षकतत्वं भिन्नमेव, तच्च न सर्पत्वं व्यभिचरतीति वाच्यम्; शिंशपात्वस्यापि वृक्षत्वफलत्वव्याप्यस्य भिन्नत्वेन समत्वात्। यदि तु शिंशपात्वं फले वृक्षे च एकमेव तर्हि शिंशपात्वस्य नानार्थत्वोच्छेदापत्तिः। तुल्यन्यायेन सर्पवर्धक्योरपि विद्यमानं तक्षकत्वमेकमेवेति वक्तव्यमापद्येत येन समासप्रस्ङ्गः। तस्मात् कैयटमतमेव युक्तमिति दीक्षिताशयः। एवञ्च उभयोः परस्परस्वधर्मव्यभिचारित्व एव समास इति मतमयुक्तम् । अन्यथा कैलासाद्रिःमन्दराद्रिः, भावपदार्थः, तर्कविद्या, व्याकरणशास्त्रम् इत्यादि प्रयोगा न सिध्येयुः। शिंशपावृक्षः इत्यत्र समास इष्ट एव। तक्षकः सर्प इत्यत्र तु बहुलग्रहणात्समासाभावः।

**उपसर्जनव्यवस्था**

ननु समस्यमानपदयोः उभयोः प्रत्येकं विशेषणविशेष्यभावे,अन्यतरस्य विशेषणत्वे वा समास इति स्वीकारे यत्र उभयोरुभयभावस्तत्र उपसर्जन्व्यवस्था न प्रकल्पेत। यथा- कृष्णतिलाः। कृष्णाश्च ते तिलाश्च इति विग्रहः।इह तिलशब्देनाभिसम्बध्यमानः कृष्णशब्दो विशेषणं सम्पद्यते।एवं कृष्णशब्देनाभिसम्बध्यमानस्तिलशब्दो विशेषणवचनः सम्पद्यते।कृष्णशब्द उच्चारितः भ्रमरकोकिलादिसर्वपदार्थं बोधयन् यदा तिलशब्देनाभिसम्बध्यते तदा तिलेष्वेव नियम्यते। अत्र कृष्णशब्दो विशेष्यः, तिलशब्दो विशेषणम्।एवं तिलशब्द उच्चारितस्तिलमात्रं बोधयन् यदा कृष्णशब्देनाभिसम्बध्यते तदा कृष्णवर्णेष्वेव नियम्यते। अत्र च तिलशब्दो विशेष्यः, कृष्णशब्दो विशेषणम्।


ISSN: 2249-538X

ततश्च उभयोर्विशेषणत्वेन उभयोरुपसर्जनत्वात् पूर्वनिपाता-नियमप्रसङ्गः। पक्षे तिलकृष्णा इत्यनिष्टं प्राप्तम्। अत्रोच्यते- अन्यतरस्य प्रधानभावादिष्टा व्यवस्था सिध्यति। अन्यतरदत्र प्रधानम्,अपरञ्च तद्विशेषणम्। यदा तिलानां प्राधान्येन विवक्षा तद् कृष्णो विशेषणम् तिलशब्दो विशेष्यः। अतश्च विशेषणवाचकस्य कृष्णशब्दस्य उपसर्जनत्वात्पूर्वनिपाते सिद्धं कृष्णतिला इति। परं यदा विपरीतविवक्षा तदा तिलकृष्णा इति प्राप्नोति।

अत्रेदं चिन्तनं भाष्ये प्रवृत्तम्- तिलकृष्णा इति समासो न साधुः। तथा हि तिलाश्च कृष्णाश्चेति विग्रहे द्वन्द्वसमासो न भवति गुनवाचिनो द्रव्यसापेक्षत्वेन द्रव्यगुणवाचिनोस्तद्वत्क्रुमशक्यत्वात्। तिलानां कृष्णास्तिकृष्णा इति षष्ठीसमासोऽपि न भवति गुणवचनेन षष्ठीसमासनिषेधात्।परं द्वाविमौ स्वतन्त्रशब्दौ युगपदेकस्मिन्नर्थे प्रयुज्येते। न हि द्वयोः प्रधानशब्दयोर्युगपदेकस्मिन्नर्थे प्रयुज्यमानयोः (विशेषणविशेष्यभावानापन्नयोः) परस्परानुपकारित्वे किञ्चित्प्रयोजनमस्ति। परं प्रयुज्येते च तौ। तत्र प्रयोगादेतद्गन्तव्यं नूनमत्रान्यतरत्प्रधानं तद्विशेषकञ्चापरमिति।एतावान् तत्र सन्देहः किं प्रधानं, किं विशेषणमिति। तत्र त्वेवं निर्णयःगुणद्रव्ययोः सन्निपाते द्रव्यं प्रधानम् गुणो विशेषणम्। तद्यथा श्वेतमालभेत, कृष्णमालभेत इति। न ह्यत्र पिष्टपिण्डीमालभ्य कृती भवति, अवश्यं गुणो द्रव्यमाकाङ्क्षति। द्रव्यं हि क्रियासिद्धौ साक्षादुपयुज्यते। गुणस्तु द्रव्यद्वाराक्रियायामन्वेति।एवञ्च कृष्णतिला इति सम्प्रतिपन्नः प्रयोगः। उपसर्जनमिति महासंज्ञाकरणमप्यत्र गमकम्। महासंज्ञाकरणसामर्थ्यादन्वर्थसंज्ञा विज्ञायते उपसर्जनमप्रधानमिति।तदित्थं जातिगुणयोः सन्निपाते गुणो विशेषणम्। यथा- नीलोत्पलम्। अत्र जातिशब्देन जात्यत्मकं द्रव्यमेव विवक्षितम्। उत्पत्तिप्रभृत्याविनाशाज्जातिर्द्रव्यं न जहाति। क्रियाजात्योः सन्निपाते क्रियैव विशेषणम्। यथा-पाचकश्चासौ ब्राह्मणश्च पाचकब्रह्मणः। गुणक्रिययोः सन्निपाते गुण एव विशेषणम्। यथा- खञ्जश्चासौ पाचकश्च खञ्जपाचकः।गुणवाचकयोः सन्निपाते अनियमः। कञ्जश्चासौ कुब्जश्च


ISSN: 2249-538X

खञ्जकुब्जः कुब्जखञ्जो वा। क्रियावाचकयोः सन्निपातेऽप्यनियमः। यथा- पाचकश्चासौ पाठकश्च पाचकपाठकः पाठकपाचको वा। सामान्यविशेशयोः सन्निपाते विशेषस्य विशेषणत्वम्। यथा- शिंशपावृक्षः। यत्र तु उभयोरपि परस्परापेक्षया सामान्यविशेषभावः तत्रानियमः। यथा- ब्राह्मणदेवदत्तः देवदत्तब्राह्मणो वा। बहुलग्रहणात् क्वचिन्न। यथा- तक्षकः सर्पः। इति शम् ।

**आधारः**

- वैयाकरणसिद्धान्तकौमुदी
- बालमनोरमातत्त्वबोधिनीव्याख्ये
- काशिका
- पदमञ्जरी-न्यासव्याख्ये
- प्रौढमनोरमा
- महाभाष्यम् (कैयटोद्योतसहितम्)

**********


ISSN: 2249-538X

# भोभगोअघोअपूर्वस्य योऽशि

डा. प्रमोद भट्टः

सूत्रमिदमष्टाध्याय्याम् अष्टमाध्याये तृतीयपादे सप्तदशतमं वर्तते । भोभगोअघोअपूर्वस्य यः अशि इति पदच्छेदः, त्रिपदं सूत्रम् । भोश्च भगोश्च अघोश्च अश्च, भोभगोअधोअम् इति समाहारद्वन्द्वः । भो भगोअघोअम् पूर्वं अस्मात् भोभगोघोअपूर्वम् इति बहुव्रीहिः । तस्य भोभगोघोअपूर्वस्य इति षष्ठीविभक्त्येकवचनम् । द्वन्द्वान्ते श्रूयमाणस्य पूर्वशब्दस्य 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकं प्रत्येकम् अभिसम्बध्यते इति न्यायेन प्रत्येकमन्वयः । सूत्रे यः इति पदं प्रथमाविभक्त्येकवचनान्तम् । विधीयमानम् । सूत्रे यकारादकारः उच्चारणार्थकः। सूत्रे अशि इति सप्तमीविभक्त्येकवचनम् । अश् अत्र प्रत्याहारः । 'रोस्सुपि' इति सूत्रात् रोः इति षष्ठ्येकवचनान्तं पदमनुवर्तते । एवञ्च सूत्रार्थः अस्य इत्थं फलति भोभगोअधोअपूर्वस्य रोर्यादेशः स्यादशि पदे इति ।

सूत्रे भो भगो अघो इति निस्सान्ताः निपाताः । भोस्, भगोस्, अघोस्, सान्ताः निपाताः इति पक्षद्वयम् । तत्र भो भगो अघो इति निस्सान्ताः इति पक्षे भगो अघो इत्यत्र अघो अपूर्वस्य इत्यत्र च ओकाराकारयोः "एङः पदान्तादति" इति पूर्वरूपं प्राप्नोति । किन्तु सौत्रत्वात् पूर्वरूपसन्धिः नैव क्रियते । भोसित्यादिः सान्तः इति पक्षे तु तेषां पदत्वात् रुत्वे भोर् भगोर्, अघोर्, अपूर्वस्य इत्यवस्थायां 'भोभगोअघोअपूर्वस्य योऽशि' इत्यनेनैव यत्वे कृते ततः भोय् भगोय्, अघोय् अपूर्वस्य इति स्थिते भोय् भगोय् इत्यत्र 'हलि सर्वेषाम्' इति सूत्रेण यलोपः, भगोय् अघोय् इत्यत्र भगोय् इति यकारः यदि अलघुप्रयत्नकः तदा 'ओतो गार्ग्यस्य' इत्यनेन नित्यं यलोपः भवति । लघुप्रयत्ने तु भगोयघोस् इति भवत्येव। एवमेव अघोय् अपूर्वस्य इत्यत्रापि द्रष्टव्यम् । अत्र यलोपे सति पूर्वरूपसन्धेः प्रसक्तिः नास्ति । यतो हि लोपशास्त्रं त्रिपाद्यां वर्तते सन्धिकार्यं तु सपादसप्ताध्याय्यामस्तीत्यतः 'पूर्वत्रासिद्धम्' इत्यनेन लोपशास्त्रस्य असिद्धत्वम्।


ISSN: 2249-538X

दीक्षितः प्रौढमनोरमायां द्वयोः पक्षयोः सान्तनिपातपक्षस्यैव ज्यायस्त्वं मनुते । यदि निस्सान्तस्य सूत्रे ग्रहणं स्यात् तदा दोषत्रयमुद्भावितं तेन । तत्र प्रथमः दोषः यथा – विभोरिदमित्यत्रापि यत्वप्रसक्तिः स्यादिति । तथा हि विभोरिदमित्यवस्थायाम् अत्रापि रेफात्पूर्वं भोशब्दसत्वात् तदुत्तरवर्तिनः रोः भोभगो इति सूत्रेण यत्वापत्तिः उद्भविता । निस्सान्तनिपातस्य द्वितीयः दोषः यथा सुप्रभगोरिदमिति । सुप्रभा गौः यस्य सः उच्यते सुप्रभगुः इति तस्य इदं सुप्रभगोरिदम् इति । अत्रापि सुप्रभगोर् इदमित्यवस्थायां रोः पूर्वं भगोशब्दसत्वात् तदुत्तरवर्तिनः रोः यत्वापत्तिर्दोषः द्वितीयः ।

निस्सान्तनिपातस्य तृतीयः दोषः यथा रघोरिदमिति । अत्र रघोर् इदमिति स्थिते रोः पूर्वम् अघोशब्दसत्वात् तदुत्तरवर्तिनः रोः यत्वापत्तिर्दोषः । अतः सूत्रे सान्तनिपातपक्षः आश्रितः ग्रन्थकत्रा । सान्तत्वे विभोर्, सुप्रभगोर्, रघोर् इत्युदाहृतस्थलेषु सान्तनिपातत्वाभावात् न रोर्यत्वापत्तिदोषः ।

ननु निस्सान्तत्वपक्षस्वीकारेऽपि इमे दोषाः न भवन्ति । यतो हि अस्ति परिभाषा “लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्” इति विभोरिदमित्यादिरूपं सूत्रनिष्पन्नत्वात् भवति लाक्षणिकम् । सूत्रे यः भो आदिशब्दः गृहीतः सः निपातः प्रतिपदोक्तः अत्र सूत्रोपात्तः निस्सान्तभवादिशब्दः ग्राह्यः तया परिभाषया इति चेत् उच्यते सूत्रोपात्तभोशब्दोऽपि वार्तिकनिष्पन्न एव न तु निपातः । तथा हि ‘मतुवसोरुसम्बुद्धौ छन्दसि’ (७-३-१) इति सूत्रे भाष्ये पठ्यते’ विभाषा भवद्भगवदघवतामोच्चावस्य’ इति वार्तिकम् । छन्दसि भाषायाञ्च सम्बुद्धौ भवत्, भगवत्, अघवत्, इत्येतेषां विभाषा अवस्य ओकारश्च वक्तव्यः इति वार्तिकार्थः । भोः, भवन्, भगो, भगवन्, अघो अघवन्, इति क्रमेणोदाहरणानि । अतः सूत्रोपात्तभोशब्दस्यापि लाक्षणीकत्वात् उभयं तुल्यम् ।

यदि भो भगो इत्यादिसूत्रे निर्दिष्टाः भोआदिशब्दाः निपाताः तर्हि चादेराकृतिगणत्वात् तत्र ते बोध्याः । तदा विभाषा भवद्भगवत् ..... इति वार्तिकं


ISSN: 2249-538X

नारम्भणीयम् । वार्तिकस्याश्रयणे पुल्लिङ्गैकवचनमात्रे भो हरे इत्यादिरूपमेव सिद्ध्येत् वार्तिके पुल्लिङ्गसम्बोधनभवदादिशब्दग्रहणात् । न तु भो हरिहरौ, भो विद्वद्वृन्द, भो गङ्गे इत्यदिरूपाणि । यतो हि इमानि स्त्रीनपुंसकलिङ्गद्विवचने च सन्ति । अतः भो हरिहरौ इत्यदिरूपसाधनार्थमवश्यमेव निपातभोशब्दः स्वीकार्यः । स एव निपातः भो हरे इत्यत्रापि भवतीति वार्तिकं नारम्भणीयमिति वृत्तिहरदत्तादिमतम् ।

भाष्यमते वार्तिकम् आरब्धव्यमेव । निपातः अपि भोः शब्दः अस्ति, तेन भो हरिहरौ इति द्विवचने, भो विद्वद्वृन्द, भो गङ्गे इत्यत्र द्विवचनस्त्रीनपुंसकानां न दोषः । विभाषा भवद्भग ... इति वार्तिकारम्भादेव हे भवन् इतिवत् हे भो इति रूपमपि सिध्यति । अपि च 'स्युः प्याडङ्गहैहेभोः' इत्यमरोक्त-सम्बोधनार्थानां निपातानां सहप्रयोगः नास्ति । अतः सहप्रयोगप्रयोजनमपि वार्तिकसिद्धानां भवादीनां शब्दानां प्रयोजनमस्ति ।

अपि च 'इतराभ्योऽपि दृश्यन्ते' इति सूत्रेण भवदादियोगे सर्वविभक्त्यन्तात् त्रल्, तसिल् प्रत्ययः विधीयते तत्र भवान् हरिः, अत्र भवान् हरिः ततो भवान् हरिः, अतो भवान् हरिः इत्यादीनि उदाहरणानि। अत्रोदाहरणे प्रथमान्तात् तच्छब्दात् त्रतसिलौ विहितौ । एवं तत्र भोः, अत्र भोः इत्यत्र भवच्छब्दप्रकृतिकभवादिशब्दः वार्तिकारम्भे एव सिध्यति । तत्र भोः इत्यादौ प्रयोगे भवच्छब्द प्रकृतिकत्वात् त्रतसिलौ भवतः ।

अपि च वार्तिकनिष्पन्नभवदादिशब्दस्वीकारादेव 'आमन्त्रितं पूर्वम् अविद्यमानवत्' इति अविद्यमानवद्भावः, वार्तिकनिष्पन्नस्य भवादिशब्दस्य आमन्त्रितत्वे पदात्परस्यामन्त्रितनिघातः, आम एकान्तरमामन्त्रितमनन्तिके' इति स्वरविधिः, 'वाक्यादेरामन्त्रितस्य' इति द्विर्भावः 'सुबामन्त्रिते पराङ्गवत् स्वरे' इति पराङ्गवद्भावोऽपि वार्तिकारम्भे एव सिध्यति ।

भगो अघो इति निपातौ अपि यदि प्रामाणिकौ तर्हि भवतां नाम । त्रतसिल्विध्यान्त्रितकार्याणि तु वार्तिकायन्तैव । केचित्तु भोस्

ISSN: 2249-538X

इत्यादिसकारान्तान् एव एतान् निपातान् आश्रित्य वार्तिकेन विधीयमाने रूत्वौत्वे भाष्ये प्रत्याख्याते इति मन्वते । अन्ये तु निपातानामभ्युपगमे भोभगो इत्यादिसूत्रे निपाताः एव प्रतिपदोक्तत्वात् गृह्येरन् न तु लाक्षणिकत्वात् सम्बुध्यन्ताः इति मन्यन्ते । तदुभयमपि असदिति मनुते भट्टोजिदीक्षितः, तथा हि 'स्वरितेनाधिकारः' 'इत्यत्र अधिकः कारः अधिकारः इति व्याख्यानमाश्रित्य लक्ष्यानुरोधेन स्वरितत्वमाश्रित्य निपातानाम् एवं वार्तिकनिष्पन्नानामुभयोरपि ग्रहणमिति । यत्तु लक्षणप्रतिपदोक्तन्यायमाश्रित्य निपातानामेव ग्रहणमिति । तदपि 'भुवश्च महाव्याहृतेः' इति सूत्रे महाव्याहृतिग्रहणात् स च न्यायः अनित्यः इत्युक्त्या अपि सूत्रे उभयेषां ग्रहणम्।

ननु लक्षणप्रतिपदोक्तन्यायस्यानित्यत्वे विभोरिदमित्यादौ दोषः तदवस्थ इति चेत् परस्परसाहचर्यमाश्रित्य निपातानां वार्तिकनिष्पन्नानाम् एव ग्रहणं कर्तव्यं तेषामेवार्थवत्वाच्च इत्यलम्।

**********


ISSN: 2249-538X

# लुटः प्रथमस्य डारौरसः

एल्. सविता आर्या

मुखं व्याकरणं स्मृतम्, प्रथमे हि विद्वांसो वैय्याकरणाः इत्यादीनि वाक्यानि अधिव्याकरणं श्रुतिगोचरमेव सर्वेषाम् । **लुटः प्रथमस्य डारौरसः**[1] इति पाणिनीयं सूत्रं सुभाषितरीत्या विचार्य पाणिनीयमपि सुभाषितं काव्यं सुभाषितं व्याकरणमिति प्रतीषिषामि ।वस्तुतः व्याकरणाध्ययनशीलानां वैय्याकरणानां कृते अध्ययनकाले तु व्याकरणमत्यन्तं क्लिष्टं दुरूहं दुर्गमञ्च भवति । सुभाषितं नाम सरलं मधुरं मनोहरं मनोरमं च भवेत् । नीरसतरुरिहविलसतिपुरतः इतिवत् । कथञ्च व्याकरणं सुभाषितं भवितुमर्हति ? इति जिज्ञासा जायेत एव । मिते सुभाषितभृङ्गारेऽमितो रसो विद्यते इति विदितं विदाम् । अतएव सुभाषितं रत्नमिति स्तुवन्ति कवयः । तद्यथा –

**पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्**[2] । इति ।

चराचरे असारेऽस्मिन् संसारे शान्ति-सुख-समृद्धयः सदाचारमूला धर्मार्थकामाद्याश्रिता च । तच्चतुर्विधपुरुषार्थसिद्धये सद्भिर्महद्भिराश्रिता नीतिशिक्षादिभिरेषा सुभाषितपरम्परा ।

व्याकरणबोधोऽपि सरलतया सुगमतया भवेत् लौकिकं हासोपहासात्मकञ्च भवेत् इति विचार्य सुभाषितरीत्या रामचन्द्रोक्तं पद्यमेकमत्र उपस्थाप्यते । उदारप्रकृतिकानां सज्जनानां सादृश्यं **लुटः प्रथमस्य डारौरसः** इति सूत्रेण विहितैः डारौरसादेशैः सह क्रियते -

**परात्मसाधारणता महोदारे महोदया ।**
**डारौरसादेश इव स्वभावादेव शोभते**[1] ।।

---

[1] अष्टा2.4.85 .सं.सू.

[2] चाणक्यनीतिदर्पणम् 14.9


ISSN: 2249-538X

परो नाम अन्यः आत्मा नाम स्वयं आत्मीय इति । उदात्तशीलानां उदात्तप्रकृतिकानां सदैव परात्मीययोः साधारणता उत्सर्गतः विद्वत्सु प्रसिद्धमेव। अङ्कितञ्च कविना –

**अयं निजः परो वेति गणना लघु चेतसाम् ।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्[2] ।।इति।।**

उपकारविधौ भेदाभेदविचारतिरस्करणशीलता महोदारेषु उदारप्रकृतिकेषु स्वभावात् नाम पूर्वजन्मार्जितसुकृतसंस्कारात् सौकर्यातिशयेन कृतोपकारविधिरेव शोभते, न तु अनिच्छयाकृत्रिमाङ्गीकारेण कृत उपकारः । तेन उपकारेण भवति कश्चित् महोदयः । कीदृशोऽसौ महोदयः?

**विद्या तपो धनं शौर्यं कुलीनत्वमरोगिता ।**

**राज्यं स्वर्गश्च मोक्षश्च सर्वं धर्मादवाप्यते[3] ।।इति।।**

एवञ्च स्वर्गादिधर्मावाप्तये सुखसम्प्राप्तये च उपकारविधिषु उदारचरितानां उदारचित्तं स्वाभाविकमेव शोभते । अयं निजः परो वा इति परात्म-असाधारणता येषु, तेषां कृत्रिमौदार्यं तु नैव शोभते । क इव ? डारौरसादेश इव इत्युपमीयते । डारौरसादेशे यथा परात्मसाधारणता । ननु कथं वा डारौरसामादेशानां परात्मसाधारणता भवेत् ? इति चेत्, **लुटः प्रथमस्य डारौरसः** इति पाणिनिसूत्रेण "लुडादेशस्य प्रथमपुरुषस्य डारौरस् इत्येते आदेशाः क्रमात् स्युः" इति सूत्रार्थः । अमी च आदेशाः आत्मनेपदेऽपि प्रवर्तन्ते परस्मैपदेऽपि । एवञ्च डारौरसां त्रयाणामादेशानां परस्मैपद-आत्मनेपदसाधारणता अस्त्येव दृष्टिपथे । तद्यथा उक्तञ्च कविना पद्ये- **परात्मसाधारणता डारौरसादेश इवेति** । उभयपदे च लुटि प्रथमपुरुषे कर्त्ता कर्त्तारौ कर्त्तारः इत्येव रूपम् । भू धातोः भविता भवितारौ भवितारः, एध् धातोः- एधिता एधितारौ एधितारः इत्येवं आत्मनेपद-परस्मैपदसाधारणता डारौरसामादेशानां स्पष्टं दृश्यते ।

[1] सभ्याभरणम् ......

[2] मित्रलाभः श्लोकसं71.

[3] दश) ,स्कन्ध-धर्म-जैनधर्मग्रन्थ71.सं (

ISSN: 2249-538X

अत्र शङ्कते पूर्वपक्षी- ननु परस्मैपदे त्रयः प्रथमपुरुषसंज्ञकास्तिबादयः आत्मनेपदेऽपि त्रयः इतीत्थं षट् स्थानिनः आदेशाश्च त्रयः इति वैषम्यात् **यथासंख्यमनुदेशः समानाम्** [1] इति सूत्रेण संख्यातानुदेशाभावेन कथं उभयपदसाधारणता गन्तुं शक्यमिति चेत्, सत्यम् ।

आन्तर्यतो व्यवस्था कल्प्यते । आन्तर्यञ्च चतुर्विधं – स्थानार्थगुणप्रमाणतः इति **स्थानेऽन्तरतमः** [2] इति सूत्रे भाष्ये व्याख्यातम्। अर्थतश्च व्यवस्था कल्पनीया । यथा- एकार्थस्य एकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थको आदेशः भवेत् ।

कथं पुनर्डादीनामादेशानाम् ऐकार्थ्याध्यवसायः ? प्रथमस्य डारौरस इत्युक्ते सति तिबादीनां स्थाने विहितत्वात् आदेशानामपि एकार्थकादित्वं बोद्धुं शक्यम् । एकार्थत्वाद्यवगतिं विना तिबादीनां स्थाने कर्तुमशक्यत्वात् । प्रयोगदर्शनाच्च एकार्थमध्यवसितुं शक्यम् इति हरदत्तः पदमञ्जर्यामाह ।

अथवा आदेशा अपि षडेव निर्दिश्यन्ते । एकशेषनिर्देशात् डारौरसश्च डारौरसश्च, डारौरस इति कृतद्वन्द्वानामेकशेषोऽयम्। केचित्तु – डाश्च डाश्च रौ च रौ च रश्च रश्च इत्येवं कृतैकशेषाणां द्वन्द्वमाहुः । तच्च अशुद्धम् । यद्येवं संख्यातानुदेशः अनिष्टः स्यात् । तथाहि, तिप्-तसोः डा इत्येक आदेशः, झि-तयोः रौ इत्येक आदेशः, आताम्-झ-प्रत्यययोः रस् इत्येक आदेशः स्यात् । तस्मात् कृतद्वन्द्वानामेकशेषव्यवस्था श्रेयसी न तु कृतैकशेषाणां द्वन्द्व इति भाष्ये समाहितम् ।

एवञ्च परस्मैपद-आत्मनेपदे च विहितानां डारौरसामादेशानाम् उभयपदसाधारणत्वात् **लुटः प्रथमस्य डारौरसः** [3] इति सूत्रस्यास्य साधुत्वे सिद्धे साधुशब्दोच्चारणात् साधुशब्दोच्चारणशीलानां महोदयत्वमपि सिध्यति । तद्यथा

---

[1] अष्टा1.3.10.सं.सू.

[2] अष्टा1.1.50.सं.सू.

[3] पा2.4.85 .सं.सू.


ISSN: 2249-538X

परात्मसाधारणत्वात् उदारचित्तानां महोदाराणां महोदयत्वं सिद्धम् । अथ वैय्याकरणानां कीदृशः स महोदयः इत्याशङ्कायाम् –

**एकश्शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग् भवति मातापितरौ चास्य स्वर्गे लोके महीयते[1]**, इत्येतादृशः महोदयः अभ्युदयः वैय्याकरणानां व्याकरणाध्ययनशीलानां मुक्तकण्ठेन भाष्यकारः पतञ्जलिरुवाच॥


**********

[1] महा.पस्प.


ISSN: 2249-538X


# मीमांसापरिभाषायाः रैखिकप्रतिनिरूपणम्


श्रीमता आचार्यप्यारीमोहनपट्टनायकः






ISSN: 2249-538X







ISSN: 2249-538X








ISSN: 2249-538X







ISSN: 2249-538X







ISSN: 2249-538X








ISSN: 2249-538X







ISSN: 2249-538X






ISSN: 2249-538X








ISSN: 2249-538X







ISSN: 2249-538X







ISSN: 2249-538X







ISSN: 2249-538X







ISSN: 2249-538X




**********


ISSN: 2249-538X

# तमः किं द्रव्यम् ?

प्रो. सुब्राय वि. भट्टः

जगतीतलेऽस्मिन् मनुकुलस्य नित्यसुखसाधनमार्गदर्शकः अपौरुषेयः वेदः । पौरुषेयाणां दर्शनादीनां तन्मूलकतयैव तत्र प्रवृत्तिः । तत्रान्यतमं मीमांसादर्शनम् । वेदवाक्यानां तात्पर्यार्थनिर्णयद्वारा धर्माधर्मविवेचनार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् । भगवान् जौमिनिः मीमांसाशास्त्रारम्भे "अथातो धर्मजिज्ञासा" इत्यनेन धर्मजिज्ञासां प्रतिज्ञाय आद्वादशाध्यायं धर्ममेव विवेचयामास ।

धर्मविचारविवेचने प्रवृत्तानां मीमांसकानां तमोविचारविमर्शने का सङ्गतिः ? इति चिन्तायां – दध्ना जुहोति, पयसा जुहोतीत्यादौ दध्यादीनां होमसाधनत्वं श्रुत्या विहितम् । तच्च दध्यादिकं लोकसिद्धमेव । लोकसिद्धत्वेऽपि श्रुतिबोधितत्वेन कर्माङ्गत्वेन विधानाच्च तेषां भौतिकस्वरूपचिन्तनस्य अवसरः प्राप्तः ।

अपि च "दध्नेन्द्रियकामस्य जुहुयात्" इत्यादौ दध्यादीनां धर्मत्वमुक्तम्। तत्र तेषां धर्मत्वं न स्वरूपतः किन्तु श्रेयस्साधनत्वेन रूपेण । अन्यथा दध्यादीनां प्रत्यक्षत्वेन धर्मस्य प्रत्यक्षत्वापत्तिः । तदुक्तं भट्टपादैः वार्तिके–

द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते ।<br>
तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्मता ॥<br>
श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रतीयते ।<br>
ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥ इति। (श्लो.वा.–चो. सू.)

दध्नेन्द्रियकामस्य जुहुयात् इत्यादौ दध्यादिद्रव्याणां धर्मत्वम् । समिधो यजति इत्यादौ यागादिक्रियाणां धर्मत्वम् । वायव्यं श्वेतमालभेत इत्यादौ श्वेतादिगुणानां धर्मत्वम् ।


ISSN: 2249-538X

यदा द्रव्यक्रियादीनां धर्मत्वेन प्रसङ्गः प्राप्तः तदा द्रव्यादीनां लक्षणस्वरूपप्रभेदादिविचारः कृतः ।

भाट्टमीमांसकमते एकादश द्रव्याण्यङ्गीकृतानि । यथा –

पृथिवी सलिलं तेजः पवमानस्तमस्तथा ।
व्योमकालदिगात्मानो मनः शब्द इति क्रमात् ॥
एकादशविधं चैतत् कुमारिलमते मतम् । इति ।

(मा.मे.प्र. परिच्छेदः)

तत्र तमोऽपि अन्यतमम् । कर्माङ्गत्वाभावेऽपि श्रुतिबोधितत्वात् तस्य स्वरूपचिन्तनं चक्रुः ।

तथाहि – अस्पर्शत्वे सति रूपवत्तमः । तच्च नेत्रेन्द्रियमात्रग्राह्यमालोकाभावप्रकाश्यं कृष्णरूपम् ।

कलायकोमलच्छायं दर्शनीयं भृशं दृशाम् ।
तमः कृष्णं विजानीयादागमप्रतिपादितम् ॥
गुणकर्मादिसद्भावादस्तीति प्रतिभासतः ।
प्रतियोग्यस्मृतेश्चैव भावरूपं ध्रुवं तमः ॥

अपि च –

"तमः खलु चलं नीलं परापरविभागवत् ।
प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति" ॥

खलुशब्दः निश्चयार्थकः । तमः चलं चलनक्रियावत् । नीलं – नीलरूपवत् । परापरविभागवत् – परत्वापरत्वविभागगुणवत् । प्रसिद्धपृथिव्यादिनवद्रव्याणां वैधर्म्यात् – तद्वृत्तिगन्धादिशून्यत्ववत्वात् । पृथिव्यादिभ्यो नवभ्यो भेत्तुं भिन्नं दशमं द्रव्यं भवितुमर्हतीति समुदितार्थः । यथा घटस्य क्रियावत्वेन प्रागुत्पन्नघटापेक्षयाऽपरत्वेन प्रसिद्धजलादिद्रव्यगतविशेषधर्मस्नेहादिशून्यत्वेन च जलाद्यष्टभिन्नद्रव्यत्वं तथा तमसोऽपि नवद्रव्यभिन्नत्वं बोध्यम् । तमसः द्रव्यत्वं च नीलरूपाश्रयतया क्रियाश्रयतया च ।


ISSN: 2249-538X

तथाहि – तमः द्रव्यं समवायेन नीलरूपवत्वात् नीलघटवत् । तमः द्रव्यं समवायेन क्रियावत्वात्, अस्मदादिशरीरवत् । तमः आकाशादिपञ्चकेऽनन्तर्भूतं समवायेन रूपवत्वात्, घटवत् । नीलरूपवत्वात् तमसः आकाशादिपञ्चकेऽनन्तर्भावः । आकाशादिपञ्चकस्य रूपानधिकरणत्वात्। तमः वाय्वनन्तर्भूतं स्पर्शाभावात् आकाशवत् । तमः तेजोऽनन्तर्भूतं भास्वररूपाभावात् घटवत् । तमः जलानन्तर्भूतं शीतस्पर्शाभावात् घटवत् । तमः पृथिव्यनन्तर्भूतं गन्धाधिकरणत्वाभावात्, सुवर्णवत् । तस्मात् तमः अतिरिक्तं द्रव्यम् ।

तमः तेजो विरोधि । अतः तेजसि कार्यं नारभते इति चेत् जलमपि तेजो विरोधि । तथापि सालोके देशे दृष्टं कार्यारम्भकमिति चेत् जलस्य स्वाधिष्ठानतेजोविरोधेऽप्यालोकविरोधित्वं नास्ति । तमसस्तु उभयविरोधित्वात् तेजसि न कार्यारम्भं कुर्यात् । अन्यत्र रूपवतामेवारम्भकत्वस्पन्दकत्वनियमेऽपि यथा स्पष्टदृष्टकार्यानुरोधाद्वायोररूपस्यैव तदुभययोगित्वम्, तथैव स्पष्टदृष्टकार्यानुरोधादस्पर्शस्यापि तमसो रूपवत्वेन तदुभययोगित्वम् । तत्सिद्धं रूपसंख्यादिगुणानामुत्क्षेपणादिकर्मणां चाश्रयस्तमो द्रव्यान्तरमिति । इदं च विलक्षणम् । आलोकासहकृतचक्षुर्ग्राह्यमिति स्वभावसिद्धम् ।

**नैयायिका तमसः तेजोऽभावरूपत्वमङ्गीकुर्वन्ति** । आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् । रूपवत्ताप्रतीतिस्तु भ्रमरूपा, कर्मवत्ताप्रतीतिरपि आलोकापसरणौपाधिकी भ्रान्तिरेव । तमसोऽतिरिक्तद्रव्यत्वेऽनन्तावयवादिकल्पनागौरवं च स्यात् । इति तेषामाशयः ।

**अत्र किञ्चिद्विचार्यते** । रूपवत्ताप्रतीतेः भ्रान्तित्वं कल्पयितुं न शक्यते । अबाधितप्रत्यक्षप्रतीतिबलात् । तत्र भ्रान्तिरङ्गीक्रियते यत्रोत्तरकाले बाधप्रतीतिः। नात्र काचित् प्रामाणिकानां बाधबुद्धिः । ऋष्यनुभवस्यैव प्रमाणत्वात् । तमश्चलतीति कर्मवत्ताप्रतीतिरपि अबाधिता ।


ISSN: 2249-538X

आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनं गौरवमिति तथा अतिरिक्तद्रव्यत्वेऽनन्तावयवादिकल्पनागौरवञ्चेति कल्पनं न युक्तियुक्तम् । लाघवं न स्वतन्त्रं प्रमाणम् । किन्तु सहकारिमात्रम् । श्रुतिसिद्धस्य अनुभवसिद्धस्य युक्तिसिद्धस्य च अपलापः लाघवमात्रेण कर्तुं न शक्यते । अपि च नैल्यस्य भावरूपस्य अभावरूपे तमसि आरोपानुपपत्तेः । प्रतियोगिस्मृत्यनपेक्षावगमस्याभावरूपत्वायोगाच्च । तमसि रूपवत्ताप्रतीतिः भ्रान्तिरेव गगनमण्डले नीलिमाभ्रान्तिवत् इति विवरणमपि न सङ्गतं भवेत् गगने मेघसंबन्धवशात् नीलिमाबुद्धिर्भवितुमर्हति । तादृशमत्र न किञ्चिदस्ति ।

तमः न रूपवद्द्रव्यं आलोकासहकृतचक्षुर्ग्राह्यत्वात् । आलोकाभाववत् । इत्यनुमानेन तमसः अभावरूपत्वं सिध्यति । तस्मात् प्रौढप्रकाशकतेजःसामान्याभावस्तमः । आलोकाभावो यथा प्रकाशशून्ये देशे प्रकाशं विनैव चक्षुषा गृह्यते अत एव न रूपवद्द्रव्यात्मकः तथा तमोऽपि प्रकाशरहितदेशे प्रकाशं विनैव चक्षुषा गृह्यते । अतः तमोऽपि न रूपवद्द्रव्यम् । रूपवद्द्रव्यप्रत्यक्षे आलोकसहकृतचक्षुषः कारणत्वनियमात् इति । नायं नियमः सार्वत्रिकः । व्यभिचारदर्शनात् । एकदेशग्रहणेन व्याप्तिः न सिध्यति ।

तथाहि – वस्तुस्वभावादेव तमसश्चाक्षुषे आलोकनिरपेक्षस्यैव चक्षुषः कारणत्वम् । इदं च तमः विलक्षणं द्रव्यम् । आलोकाभावसहकृत चक्षुर्ग्राह्यत्वमात्रेण रूपवद्द्रव्यत्वस्यापलापः न युक्तिसिद्धः । न वा रूपवद्द्रव्यप्रत्यक्षे सर्वत्र आलोकसहकृतचक्षुषः कारणत्वमिति नियमः ।

तदुक्तं मार्कण्डेय पुराणे-भगवता व्यासेन – **दिवान्धाः प्राणिनः केचित् रात्रावन्धास्तथापरे । केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः** । इति । (मा.पु.)

"दिवान्धाः प्राणिनः केचित्" इत्यनेन रात्रौ दृष्टिमच्चक्षवः भवन्तीति यावत् । "रात्रावन्धास्तथापरे" इति समभिव्याहारात् । यथा उलूकादयः । उभयगतिसिद्धा केचन भवन्ति- मूषकबिडालादयः । मूषकः तण्डुलादिरूपं स्वस्याहारं रात्रावेव अन्विष्य प्राप्नोति । अत्र रात्रिपदं प्रकाशाभावोपलक्षकम् ।


ISSN: 2249-538X

अथवा तावता प्रकाशासहकृतचक्षुर्ग्राह्यत्वात् तण्डुलादेः अभावरूपत्वं वा रूपवद्द्रव्याभावरूपत्वं वा निर्णेतुं न शक्यते ।

उलूकस्तु-रात्रावेव (आलोकाभावे एव) आहारं (रूपवद्द्रव्यं) प्राप्नोति ।

मार्जालः रात्रौ स्वस्याहारं मूषकं हन्ति । तावता मार्जालाहाररूपमूषकादेः आलोकासहकृत चक्षुर्ग्राह्यत्वादरूपिद्रव्यत्वं स्यात् अभावरूपत्वं वा स्यात् । एतच्च प्रत्यक्षविरुद्धं शास्त्रविरुद्धं च ।

तमसः तेजोऽभावरूपत्वाङ्गीकारे रामायणादिधर्मप्रमाणग्रन्थविरोधः, स्मृतिविरोधः, श्रुतिविरोधश्च । तथाहि –

I. श्रीमद्रामायणे युद्धकाण्डे अगस्त्यमहर्षिणा श्रीरामायोपदिष्टे आदित्यहृदयस्तोत्रे – "**तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने**" इति वचनं पठ्यते । तमः हन्ति इति तमोघ्नः । यदि तमः अभावरूपं स्यात् तस्य हननं वा नाशकर्मत्वं वा न सङ्गच्छते ।

II. सृष्टेः पूर्वं इदं जगत् कीदृशमासीदिति जिज्ञासायामाह भगवान् मनुः "**आसीदिदं तमोभूतम् अप्रज्ञातमलक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥** इति । (म.स्मृ.1.5) सृष्टेः पूर्वं इदं जगत् तमोभूतमासीत् । तमसा भूतं – आवृतमासीदिति (कुल्लूकभट्टीये) यदि तमः अभावरूपं स्यात् तमसा आवृतमासीदिति बाधितं स्यात् । अभावात्मकस्य तमसः आवरणकरणत्वं न सङ्गच्छते ।

III. भगवती श्रुतिरप्याह – ऋग्वेदीये रात्रिसूक्ते श्रूयते – **ज्योनिषा बाधते तमः** (रा.सू.) इति । अभावरूपत्वे तमसः ज्योतिर्बाध्यत्वमसङ्गतं स्यात् ।

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥** (म.स्मृ) इति ।

आर्षधर्मोपदेशस्य वेदशास्त्राविरोधिना तर्केणानुसंधानं नैयायिकानामपि सम्मतमेव । यतः तेऽपि आस्तिकाः वेदमार्गानुयायिनश्च । अत एव उक्तं भगवत्पाद शंकराचार्यैः "श्रुतिमतः तर्कोऽनुसन्धीयताम्" इति ।

तर्हि कुतः आग्रहः इति चेत् आग्रहो नास्ति । अत्र मूलान्वेषणायां व्याख्यानादिभाष्यसूत्रान्तावलोकनेन च एवमवगम्यते । सूत्रं – **धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानान्निश्रेयसम्** । (वै.सू. 1-1-4) अत्र सूत्रे पदार्थसंख्यानिर्देशो नास्ति । अत्र प्रशस्तपादभाष्यम् – "**द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्वज्ञानं निश्रेयसहेतुः । तच्च ईश्वरचोदनाभिव्यक्ताद्धर्मादेव । अथ के द्रव्यादयः पदार्थाः, किञ्च तेषां साधर्म्यं वैधर्म्यञ्चेति । तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञयोक्तानि नवैवेति । तद्व्यतिरेकेणान्यस्य संज्ञानभिधानात्**" । इति । तथा च भाष्यकारैः "सामान्यविशेषसंज्ञयोक्तानि नवैव अन्यस्यानभिधानात्" इति कथनेन तस्य वचनसंरक्षणार्थं तदनुयायिभिः तदतिरिक्तं नास्तीति कथितम् ।

अस्य अयमभिप्रायः – अस्मिन् प्रपञ्चे नवद्रव्याण्यतिरिच्य द्रव्यान्तरं नास्तीति नार्थः । किन्तु निश्रेयससाधनीभूतानि साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानप्राप्त्यौपयिकानि इमानि इत्येव तात्पर्यम् । तथाहि – सूत्रकाराणां प्रवृत्तिः कुतः ? प्रपञ्चे विद्यमानानां पदार्थानां द्रव्यादीनां वा परिगणनार्थं न । किन्तु धर्मविशेषप्रसूतात् द्रव्यगुण ........... निश्रेयसम् इत्यनेन निश्रेयस (निरतिशयसुखम्) प्राप्ति साधनबोधनाय । तत्र अपेक्षितानि उक्तद्रव्याणि । तदतिरिक्तानि द्रव्याणि प्रपञ्चे सन्तु मा वा । नायं सूत्रकारसंबद्धः विषयः तदर्थं प्रवृत्त्यभावात् । अविवक्षितत्वाच्च ।

भाष्यकाराणां प्रशस्तपादाचार्याणामपि तदतिरिक्तं द्रव्यं नास्तीति तत्खण्डने न तात्पर्यम् । तदेवमवगम्यते – भाष्यस्थपदैः – "तत्र द्रव्याणि पृथिव्यप्तेजो .......... मनांसि सामान्यविशेषसंज्ञयोक्तानि नवैवेति" इति । सामान्यविशेषसंज्ञयोक्तानि नवैव इति तदतिरिक्तं पुरुषार्थोपयोगि न विद्यते इति पुरुषार्थारम्भसामर्थ्यात् अवगम्यते ।


ISSN: 2249-538X

भाष्यव्याख्यायां न्यायकन्दल्यामयमर्थः स्पष्टीकृतः यत् "एवं षट्पदार्थज्ञानस्य पुरुषार्थोपायत्वं प्रतीत्य तेषां प्रत्येकं भेदजिज्ञासायां परिपृच्छति अथ के द्रव्यादय" इति । अत्र "पुरुषार्थोपायत्वं प्रतीत्य" इति कथनेन पुरुषार्थोपयोगि द्रव्यमन्यन्नास्तीति प्रतीयते । अतः परस्परं विरोधो नास्ति । तमः पुरुषार्थोपयोगिद्रव्यमिति कथनं चेत् तदा विरोधस्य प्रसक्तिः । इदानीं विषयभेदात् न विरोधविषयत्वम् ।

सूत्रस्यापि इदमेव तात्पर्यम् – सूत्रं तु –

द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भाभावस्तमः (वै.सू. 5.2.19) इति । द्रव्यं द्विविधम् – नित्यमनित्यं च । नित्ये सावयवत्वं नास्ति । अनित्ये नित्यत्वं नास्ति। एवं वैलक्षण्यसद्भावेऽपि न द्रव्यत्वहानिः । द्रव्यत्वव्याप्यस्य कस्यचित् धर्मस्य तत्तद्रव्ये अभावेऽपि न तत्तद्रव्यस्य द्रव्यत्वासिद्धिः । न्यायकन्दलीकृता भाभावस्तमः इत्यस्य भाभावे सति यत्प्रतीयते तद्रूपं तमः इति सूत्रार्थः स्वीकृतः।

अतिरिक्तद्रव्यत्ववादिनामपि प्रपञ्चे विद्यमानं द्रव्यं तमः न अभावरूपं इत्येवाभिप्रायः । तत्र पुरुषार्थविषयकविचार एव नास्ति । किन्त्वस्त्यत्र श्रुत्यर्थनिर्वाहः । संख्यायास्तु सर्वत्र न्यूनातिरेकव्यवच्छेदार्थकत्वमिति नास्ति । वेदे **तां चतुर्भिरभ्रिमादत्ते** – इत्यादौ क्वचित् गुणबोधकत्वेन क्वचित् परिसंख्याबोधकत्वेन क्वचित् प्रचयशिष्टसंख्यानुवादकत्वेनेति न सर्वत्र न्यूनाधिकव्यवच्छेदार्थिका संख्येति न दोषः । प्रकृते प्रचयशिष्टसंख्यानुवादकत्वेनापि संख्या सार्थिका भवति ।

तस्मात् "तमः कृष्णं व्यक्तमस्थित" इत्यादिश्रुतिबोधितत्वात् तमः द्रव्यान्तरमिति सिद्धम् ।

**"इतिशम्"**

**********


ISSN: 2249-538X

# स्मृतिप्रमाणविमर्शः

डा. सूर्यनारायणभट्टः

भगवता जैमिनिमहर्षिणा प्रणीतायां द्वादशलक्षण्यां प्रथमाध्यायः प्रमाणाध्याय इति प्रसिध्यति । तत्र प्रमेयभूतस्य धर्मस्य प्रमाणानि तेषां प्रामाण्यं च संसाध्यते । अत्र प्रथमाध्यायस्य प्रथमपादे विधिनिषेधयोः धर्मप्रमाजनकत्वं निरूप्य ततो द्वितीयपादे विधिवाक्यातिरिक्तवेदवाक्यानां मन्त्रार्थवादानां धर्मप्रामाण्यं निरूप्य सम्प्रति तृतीये स्मृतिपादे स्मृतिशिष्टाचाराणां धर्मप्रामाण्यं प्रतिपाद्यते ।

मन्त्रार्थवादयोः धर्मप्रामाण्यं निरूप्य स्मृतीनां धर्मप्रामाण्यं निरूप्यते इत्यत्र उपजीव्योपजीवकभावसङ्गतिः । यथा विधिः स्मृतेर्मूलम्, तथैव मन्त्रार्थवादावपि क्वचित् मूलत्वेन अवलोक्येते । अतः तौ मन्त्रार्थवादौ उपजीव्यौ। तौ उपजीव्य स्मृतीनां प्रामाण्यं निरूप्यत इति स्मृतयः उपजीविकाः। अतः सङ्गतिः सा । स्मृतीनां प्रामाण्यनिरूपणमिति स्मृतिपदं सदाचाराणामपि उपलक्षणम् । तथा च स्मृतिपदेन वेदातिरिक्तः सर्वोऽपि प्रमाणभूतो ग्रन्थः स्वीकर्तव्यः । तेन च विद्यास्थानानां ग्रहणमपेक्षितम् । तानि च विद्यास्थानानि

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥" इति ।

(भाट्टदीपिका, स्मृतिपादः)

तत्र सर्गप्रतिसर्गमन्वन्तरवंशानुचरितप्रतिपादकानि भगवता व्यासेन विरचितानि पुराणानि ब्राह्मम्, पाद्मम्, शैवम्, भागवतम्, नारदीयम्, मार्कण्डेयम्, आग्नेयम्, ब्रह्मकैवर्तम्, लैङ्गम्, वाराहम्, ब्रह्माण्डम्, वायुपुराणम्, स्कान्दम्, वामनम्, कौर्मम्, मात्स्यम्, गारुडं चेति क्रमेणाष्टादश । अष्टादशानाम् उपपुराणानामपि पुराणत्वेनैव सङ्ग्रहः । गौतमप्रणीता आन्वीक्षिकी


ISSN: 2249-538X

पञ्चाध्यायी, कणादप्रणीता दशाध्यायी च न्यायपदेन अभिधीयते । मीमांसा इत्यनेन जैमिनिमहर्षिप्रणीता द्वादशाध्यायी कर्ममीमांसेति, व्यासप्रणीता चतुरध्यायी शारीरिकमीमांसेति प्रसिद्धे । धर्मशास्त्रं तु वर्णाश्रमधर्मविशेषाणां विभागेनप्रतिपादकं तत् तत् स्मृतिप्रवर्तकप्रणीतम् । ते च स्मृतिकर्तारस्तु धर्मशास्त्रप्रवर्तकाः । एवमेव साङ्ख्यशास्त्रम्, पातञ्जलम्, पाशुपतम्, महाभारतम्, रामायणम् एतेषामपि धर्मशास्त्रे अन्तर्भावः । वेदाश्चत्वारस्तु अपौरुषेयाः । साक्षात् प्रमाणभूताः । अङ्गानि च

शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा ।

कल्पश्चेति षडङ्गानि वेदस्याहुः मनीषिणः ॥ इति षट् ।

(अमरकोषः)

एवम् अष्टादश विद्यास्थानानि इति पक्षे आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रं चेति सर्वेषामपि विद्यास्थानानां स्मृत्यधिकरणविषयत्वेन अन्तर्भावः तेषां कण्ठतः परिगणनं नासङ्गतम् । अतः एते ग्रन्थाः विचारस्य विषयभूताः ।

एतेषां शिष्टत्रैवर्णिकपरिगृहीतानां मन्वादिस्मृतीनां धर्माधर्मयोः प्रामाण्यमस्ति वा नेति संशयः । इदमत्र संशयबीजम् । स्मृतयः शिष्टत्रैवर्णिकपरिगृहीताः इत्यनेन प्रामाण्यकोटेरुपस्थितिः । मन्वादिप्रणीताः ताः पौरुषेयाः इति अप्रामाण्यकोटेः उपस्थितिः । कोटिद्वयस्याप्युपस्थितौ बलाबलानवधारणात् संशयो जायते किं प्रामाण्यम् उत अप्रामाण्यमिति ।

स्मृतीनाम्प्रामाण्यं प्रतिपादयितुं स्वयुक्तिभिः प्रत्यवतिष्ठते पूर्वपक्षी – सन्मूलकत्वनिश्चायकाभावात् अप्रमाणं स्मृतयः इति । स्मृतयस्तावत् दृढकर्तृस्मरणेन पौरुषेयाः । अतः पुरुषसंसर्गदोषवशात् प्रमादाः जायेरन्नेव । अतः यदि ताः प्रमाणं भवेयुः तर्हि तासां प्रमाणमूलकत्वं वक्तव्यम् । यतो हि अर्थं बुध्वा शब्दरचना इति न्यायेन प्रमाणान्तरेण अधिगत एव अर्थः स्वशब्दैः रचयितुं शक्यते । अतः स्मृतीनां प्रामाण्यं यदि स्वीकर्तव्यं तर्हि तासां


ISSN: 2249-538X

प्रमाणमूलकत्वं वक्तव्यम् । स्मृतयः प्रमाणमूलिकाः इति वक्तुं प्रमाणं नास्ति । तासां प्रत्यक्षादिमूलकत्वं वेदमूलकत्वं वा वक्तव्यम् , प्रत्यक्षादीनां तन्मूलकत्वं नैव सम्भवति । धर्मः वेदैकगम्यः प्रत्यक्षाद्यगम्यः इति 'चोदनालक्षणोऽर्थो धर्मः' (जै.सूत्रम्-१.१.२) इत्यत्रैव प्रत्यक्षादीनां धर्मप्रमाजनकत्वं नास्तीति सिद्धान्तितम्। यस्मात् तेषामेव सामर्थ्यं नास्ति तस्मात् स्मृतिमूलकत्वमपि तेषां नैव सम्भवतीति प्रसिध्यति । वेदस्यैव तत् सम्भवतीति वेदमूलकत्वं वक्तव्यं परं तदपि न सम्भवति । "धर्मस्य शब्दमूलत्वात् अशब्दमनपेक्षं स्यात्" (जै.सूत्रम्-१.३.१) इति सूत्रेण वेदमूलकत्वं निवारयितुं उपक्रमते ।

धर्मस्य शब्दैकगम्यत्वात् अर्थात् वेदैकगम्यत्वात् स्मृतीनां वेदान्तर्भावाभावात् न साक्षात् प्रामाण्यम् । यदि वेदमूलकत्वमुच्यते तर्हि प्रत्यक्षपठितो वेदः उत अनुमितो वेदः प्रमाणम् । प्रत्यक्षपठितो वेदः मूलं भवितुमर्हति परं तादृशस्य उपलब्धिः नास्त्येव । यदि तैः साक्षात् वेदवाक्यं दृष्ट्वा तदधीत्य ततः अर्थावगमेन स्मृतयः प्रणीताः इति उच्यते इति एकः पक्षः सम्भावयितुं शक्यते । तैः वेदः प्रत्यक्षदृष्टश्चेत् सः अद्यापि उपलभ्येत परं नोपलभ्यते । तावत्पर्यन्तं विद्यमानः अकस्मात् लुप्तः इति वक्तुं न शक्यते । अतः स्मृतेः मूलभूतः वेदः न प्रत्यक्षपठितः । कदाचित् इत्थं वक्तुमपि शक्यते यत् यदि स्मृतीनां मूलभूतः प्रत्यक्षवेदो लब्धश्चेत् पुनः स्मृतिप्रणयनस्य किं वा सार्थक्यं स्यात् । सः अर्थः विना स्मृतिं मन्वादिवत् वयमपि ज्ञातुं प्रभवामः न स्मृतेरावश्यकता । अतः प्रत्यक्षपठितवेदः स्मृतेः मूलमिति पक्षः स्वीकर्तुं न योग्यः । स्मृतेः मूलभूतो वेदः प्रत्यक्षपठित एव तदानीं सः वेदः वेदभागः आसीत् इदानीं सः लुप्तः इति यदि उच्यते तर्हि वैदिकैः मात्रामात्र अपरित्यागेन शाखागणनाद्वारा संरक्षितस्य वेदस्य इदानीं लोपसम्भावना नैव युज्यते –

एकविंशत्यध्वयुक्तम् ऋग्वेदम् ऋषयो विदुः ।
सहस्राध्वा सामवेदो यजुरेकशताधिकम् ॥
नवाध्वाथर्वणाख्येति प्राहुः पञ्चदशाध्वकम् ॥ इति ।


ISSN: 2249-538X

(तन्त्रवार्तिकम् १.३.१)

गुरुशिष्यद्वारा तत्तद्वेदीयशाखानां परिगणनात् तासां च सर्वासाम् एकस्मिन् देशेऽपाठेऽपि देशान्तरे पाठसम्भवात् लोपकल्पना योग्या न भवत्येव । अतः प्रत्यक्षपठितं वेदवचनं स्मृतेर्मूलमिति न शक्यते वक्तुम् ।

तर्हि वेदवचनं मन्वादीनामपि अनुमेयं भवतु यथा अस्माकं वेदः अनुमेयः तथैव तेषमपि इति चेत् तदपि सङ्गच्छते । यतो हि न नित्यानुमेयो हि वेदः । न हि सर्वेषां कृते अनुमातुं योग्यः सः वेदः ।

यदि अनुमेयः वेदः तर्हि व्याप्तिः वक्तव्या सा चात्र नास्त्येव । अर्थं बुध्वा शब्दरचना इति तु सत्यम् , परम् अर्थबोधः वेदादेव भवतीति नियमस्तु नास्त्येव । प्रत्यक्षादिप्रमाणेनावगत्यापि शब्दरचना भवितुमर्हति । यत्र यत्र वाक्यत्वं तत्र तत्र वेदमूलकत्वमिति व्याप्तिः न वर्तते । अतः वेदः अस्य मूलमिति अनुमातुं न शक्यते । यथा कथञ्चित् अनुमीयते तदा अन्धपरम्परैव स्यात् । प्रमाणेन ज्ञात्वा अनन्तरं वाक्यरचना चेत् अस्याः प्रमाणमूलकत्वमस्तीति प्रामाण्यम् अत्र तु केवलं स्मृतिं दृष्ट्वैव वेदः अनुमीयते चेत् कदापि स च मूलभूतो वेदः नोपलभ्यत इति स्मृतेः प्रामाण्यं न सिध्यत्येव । अतः स्मृतेः मूलं तु वर्तते मूलं विना वाक्यरचाना कर्तुं न शक्यते । परं वेदः मूलं न भवितुमर्हतीति कृत्वा भ्रान्त्यादिमूलं वक्तव्यम् । प्रमादः विप्रलिप्सा भ्रान्तिः इत्यादि स्मृतेः मूलमतः वेदमूलकत्वाभावात् धर्मप्रमाजनकत्वं स्मृतीनां नास्तीति धर्माधर्मयोः प्रामाण्यासम्भवः इति प्राप्ते –

सिद्धान्तः अभिधीयते –

'अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यादि'ति (१.३.२) जैमिनिसूत्रम् ।

ये च वेदप्रामाण्याभ्युपगन्तारः शिष्टत्रैवर्णिकाः वेदोक्तकर्मानुष्ठातारश्च ते स्मृतिविहितान्यपि कर्माण्यपि अनुतिष्ठन्ति । धर्मबुध्या एव तैः अष्टकाः कर्तव्या इत्यादिस्मृत्युक्तानि कर्माणि ज्योतिष्टोमादिवत् अनुष्ठीयन्ते । अधर्मबुध्या च न


ISSN: 2249-538X

कलञ्जं भक्षयेदित्यादि स्मृत्युक्तानि कर्माणि श्येनादिवत् परिह्रीयते । अर्थात् वेदोक्तकर्मसु यथा परिग्रहः शिष्टत्रैवर्णिकानां मन्वादीनां वर्तते तथैव स्मृत्युक्तेषु कर्मस्वपि अद्य यावत् वर्तत एव । तस्मात् अनुमीयते यत् स्मृतयः धर्मबोधकप्रमाणमूलिकाः इति । अष्टकाः कर्तव्याः इत्यादिवाक्यं प्रमाणं शिष्टानुष्ठानदर्शनात् ज्योतिष्टोमादिवत् । अतः स्मृतीनां मूलं वेद एव इति परिशेषात् सिध्यति ।

मन्वादीनां यदि वेददर्शनं सम्भवति तर्हि इदानीं तत् कुतो न इति सन्देहे– 'स्वाध्यायोऽध्येतव्यः' (जै.न्यायमाला-१.१.१) इत्यत्र स्वाध्यायपदस्वारस्यात् एकस्या एव शाखायाः अध्ययनं नियम्यते । स्वकुलगुरुपरम्पराप्राप्ता शाखा अध्येतव्या । शाखान्तरध्ययनं तु न वैधम् । अतः एकस्यामेव शाखायामधीतायां केवलमितरासां शाखानां परिज्ञानं सङ्ख्यामात्रेण ज्ञायते न तु विषयज्ञानेन ।एवं सति यस्याः शाखायाः अध्येतारः लुप्ताः सा शाखा क्रमेण लुप्ता भवत्येव । अध्येतृषु सत्सु वैदिकैः परिपालयितुं शक्यते । अध्येतृणामभावे तु शाखाः लुप्ताः लुप्तप्रायाः भवेयुरेव ।अध्येतृणां लोपात् कासाञ्चित् शाखानां लोपः सम्भाव्यते । अतः मन्वादिभिः प्रत्यक्षपठिताः अपि वेदभागाः अध्येतृलोपादिदानीमस्माभिः नोपलभ्यत इत्यत्र कापि असम्भावना नास्ति ।

अतः मन्वादीनां भ्रान्त्या स्मृतिप्रणयनमाशङ्कितम् आदौ पूर्वपक्षिणा – तस्याः समाधानम् – यदि मन्वादिभिः भ्रान्त्या स्म्रुतिप्रणयनं भवति तर्हि – अद्य यावत् तत् कुतो न ज्ञातम् । कस्मात् कारणात् तेषु भ्रमो जातः इति वा विप्रलिप्सा भ्रमकारणादिना प्रणीतं चेत् तेषां लाभः कः इत्यादीनां प्रश्नानामुत्तरमद्य यावत् कुतो न प्राप्तम् । अस्य समाधानं केनापि न ज्ञायते । अतः एतेषां कारणं ज्ञातव्यम् । अतः अस्य कारणस्य कल्पने गौरवं वेदमूलकत्वकल्पने लाघवाच्च वेदमूलकत्वकल्पनमेव युक्तम् । श्रुतिरपि प्रत्यक्षपठितैव तन्मूलम् । तेन च स्मृतिप्रणयनवैयर्थ्यमपि न शङ्कनीयम् ।

ISSN: 2249-538X

अनुष्ठानवेलायां स्वशाखोक्तप्रयोगानुष्ठाने एव समर्थो भवति । कुत्रचित् शाखान्तरोक्ताः अर्थाः अपि अनुष्ठेया भवन्ति । तदा शाखान्तरज्ञानाभावात् अनुष्ठानं पूर्णं स्यादेव । अतः स्मृतिप्रणेतारः प्रयोगानुष्ठानसिध्यर्थं सर्वत्र शाखासु विद्यमानान् अनुष्ठेयार्थान् सङ्गृह्य स्मृतीः प्रणिन्युः । स्वशाखायामविद्यमानः अनुष्ठेयांशः शाखान्तरे अस्ति चेत् ततो ग्राह्यः एव सः ।

यथा – एकस्यां शाखायां 'पुरोडाशं चतुर्धा करोति' इति वर्तते । अन्यस्यां शाखायामस्मिन्नेव प्रकरणे 'आग्नेयं चतुर्धा करोति' इति च वर्तते । यदि पुरोडाशं चतुर्धा करोतीति यथाश्रुतार्थः स्वीक्रियते तर्हि अग्नेयपुरोडाशः अग्नीषोमीयपुरोडाश इति पुरोडाशद्वयं वर्तते । उभयोरपि चतुर्धाकरणं प्राप्तम् । शाखान्तरे तु आग्नेयं चतुर्धा करोतीति शाखान्तरीयः अर्थः स्वीक्रियते । उपसंहारन्यायेन आग्नेयं पुरोडाशं चतुर्धा करोतीति सिध्यति । तस्मात् एकस्यां शाखायां नोक्तोऽनुष्ठानविषयः शाखान्तरात् स्वीकर्तुं शक्यते उचितं च तत् ।

अधीतायामपि शाखायां तत्र तत्र विषयाः विषकलिताः सन्ति । किं कुत्र योजनीयम् ? कः अनारभ्याधीतः ? कश्च प्रकरणे अधीतः ? अश्रुतफलकानां किं वा प्रयोजनम् ? इत्यादिविषयाः केवलं शाखाध्ययनमात्रेण अस्मादृशैः अल्पमतिभिः ज्ञातुं निर्णेतुं वा न शक्यते । मन्वादिभिस्तु स च विषयो ज्ञात्वा निर्णीतो वर्तते इति स्मृतिप्रणयनसार्थक्यं सिध्यत्येव । अयमर्थवादः, अयं विधिः इत्यादिनिर्णयः सन्दिग्धेषु स्थलेषु तैः कृतोऽस्ति । न्यायद्वारा अपि वेदार्थनिर्णयार्थं प्रणीताः स्मृतयः । अतः श्रुत्युक्ताः विप्रकीर्णाः अर्थाः स्म्रुतिकारैः सङ्गृह्य प्रोक्ताः । अतः स्मृतीनां मूलं तु श्रुतिरेव । तस्मात् श्रुतिमूलकत्वात् स्मृतीनां धर्माधर्मप्रमाजनकत्वमस्तीति अस्मदादीनां प्रत्यक्षेषु परोक्षेषु नानावेदेषु विप्रकीर्णतया विद्यमानस्य अनुष्ठेयार्थस्य एकत्र सङ्क्षिप्यमाणत्वात् स्मृतीनां धर्मप्रामाण्यं सिद्धमिति सर्वं सुमङ्गलम् ।

आकरग्रन्थाः –

१. जैमिनीयन्यायमाला
२. भाट्टदीपिका
३. तन्त्रवार्तिकम्
४. जैमिनीयसूत्रवृत्तिः
५. मीमांसाभाष्यम्


ISSN: 2249-538X

# एकप्रसरताविचारः

डा. वेङ्कटेश ताताचार्यः

एकप्रसरता नाम एकस्य पदस्य उद्देश्यविधेययोरेकस्यैव प्रतिपादकत्वम्। एकमेव पदं यदि अंशभेदेन उद्देह्स्यं विधेयं च प्रतिपादयेत् तर्हि एकप्रसरता भज्येत । एकप्रसरताभङ्गश्च दोषत्वात् क्वापि नाङ्गीकार्यः । तस्य दोषत्वं च सामर्थ्यविघटकत्वेन । तदीदं पूर्वमीमांसायाः तृतीयाध्यायस्य पञ्चमपादस्य अष्टमेऽधिकरणे विचारितम् । तथाहि –

सोमे "वषट्कर्तुः प्रथमभक्ष" इति श्रुतम् । तत्र संशयः – किं प्राप्ते एव भक्षे वषट्कर्तृत्वे निमित्ते प्राथम्यमात्रं विधीयते उत वषट्कर्तुकं प्राथम्यविशिष्टमप्राप्तं भक्षान्तरमिति । सोमस्य हुतशेषस्य ऋत्विक्कर्तृकमनेकविधं भक्षणं प्राप्तम् । होतृचमसः, मैत्रावरुणचमस इत्यादिसमाख्यया तत्तच्चमसे होत्रादिभिः कर्तव्यत्वेन प्राप्तमेकम् । "[1]हविर्धाने चर्मन्नधिग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षयन्ती"ति वचनेन विहितम् अभिषवहोमोभयकर्तृत्वनिमित्तकं भक्षणं द्वितीयम् । "[2]यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयेयुः । अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते" इति वचनविहितं हारियोजनग्रहे सर्वऋत्विक्कर्तुकं तृतीयम् । एतेषु प्राप्तेषु भक्षणेषु "वषट्कर्तुः प्रथमभक्ष" इति वाक्येन वषट्कारनिमित्तकं प्राथम्यं विधीयता इति पूर्वपक्षः । तत्र लिप्सावचनेन हारियोजने वषट्कर्तुः (होतुः) अन्येषां च ऋत्विजां भक्षः प्राप्तः, तत्र वषट्कर्ता होता प्रथमं भक्षयेन, ततोऽन्य इति भावः। एवं प्रशास्तृचमसादौ प्रशास्तुः समाख्यया अध्वर्योश्च होमाभिषवनिमित्तकं भक्षणं प्राप्तः, तत्र वषट्कर्तृत्वात्प्रथमं प्रशास्ता भक्षयेत्, ततोऽध्वर्युः । एवं लिप्सावचनात् समाख्यातश्च प्राप्तं भक्षमुद्दिश्य वषट्कारो निमित्ते प्राथम्यं विधीयते । होमाभिषवनिमित्तकं भक्षमुद्दिश्य तु न विधीयते । कुत्राइ वषट्कर्तुः होमाभिषवकर्तृत्वाभावेन होमाभिषनिमित्तकभक्षणे


ISSN: 2249-538X

वषट्कारनिमित्तकप्राथम्यविध्यसंभवात् । अनेकविधेषु भक्षेषु होमाभिषव-निमित्तकमप्येकं भवतीति प्रदर्शनायैव तदुपदर्शितं न तु तस्यापि प्राथम्यविधौ उद्देश्यत्वमिति धिया ।

न च समाख्या – लिप्सावचन-होमाभिषवनिमित्तकभक्षविधिप्राप्तेभ्यो भिन्नमिदं भक्षणं वषट्कर्तृवाकयविहितमिति वाच्यम् । पूर्वोक्तरीत्या प्राप्तेष्वेव भक्षेषु प्राथम्यमात्रविधायकत्वेन वषट्कर्तृवाक्योपपत्तौ भक्षान्तरविधायकत्वे प्रमाणाभावात्। न च प्राप्तेषु भक्षेषु वषट्कर्तुकर्तृकत्वं प्राथम्यं च विधेयमिति विधेयानेकत्वेन वाक्यभेद इति शङ्क्यम् । वषट्कर्तृकर्तृकत्वस्य प्राप्तत्वेन अविधेयत्वात् । तस्य प्राथम्ये विधेये निमित्तत्वेन उपादानात् । न चैवमपि निमित्तस्यापि उद्देश्यत्वात् प्राथम्ये वषट्कारभक्षयोर्द्वयोरपि उद्देश्यत्वेन उद्देश्यानेकत्वप्रयुक्तवाक्यभेदः स्यादिति वाच्यम् । निमित्तस्य अनुष्ठापकत्वेन उद्देश्यत्वव्यवहारेऽपि तस्य कर्मत्वाभावेन वाक्यभेदाप्रसक्तेः । उद्देश्यानेकत्वं हि भावनायाः एककर्मकत्वनियमभङ्गभिया वाक्यभेदमापादयेत् । अत्र तु निमित्तभाव्यरूपोद्देश्यानेकत्वेऽपि भाव्यरूपोद्देश्यानेकत्वाभावेन भावनाया एककर्मकत्वभङ्गाप्रसक्तेः न वाक्यभेदापत्तिः । एवं निमित्तानेकत्वेऽपि वाक्यभेदः स्यात् । एकैकस्यापि निमित्तस्य अनुष्ठापकत्वेन भावनाभेदापत्तेः । अतः विजातीयोद्देश्यानेकत्वे न वाक्यभेदः किन्तु सजातीयोद्देश्यानेकत्वे एवेति सिद्धम्। साजात्यवैजात्ये भाव्यत्वेन बोध्ये । अत एव "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्" इत्यत्र रथन्तरसामकत्वे निमित्ते ग्रहोद्देशेन ऐन्द्रवायवाग्रत्वं विधीयत इत्युक्तं रथन्तराधिकरणे (२-३-१) । एवं पूर्वपक्षे प्राप्ते अभिधीयते –

प्रथमभक्ष इत्येकेन समस्तपदेन एकांशेन भक्षरूपोद्देश्यप्रतिपादने इतरांशेन प्राथम्यरूपविधेयप्रतिपादने च प्रथमभक्षपदस्य उद्देश्यविधेयान्यतर-मात्रप्रतिपादकत्वरूपैकप्रसरताभङ्गापत्तेः न भक्षोद्देशेन प्राथम्यं विधातुं शक्यते । न च एकप्रसरताभङ्गस्य दोषत्वे कारणाभावात् सत्यपि तस्मिन् वाक्यार्थवर्णनं कर्तुं


ISSN: 2249-538X

शक्यत इति वाच्यम् । एकप्रसरताभङ्गे सामर्थ्यभङ्गात् समासानुपपत्तेः सामर्थ्यभङ्गस्यैव प्रकप्रसरताभङ्गस्यदूषकताबीजत्वम्[३]। तथाहि– उद्देश्यविधेय-भावस्थले उद्देश्यस्य विधेयान्वयात् पूर्वं क्रियान्वयो वक्तव्यः । "यजेतस्वर्गकाम" इत्यत्रापि स्वर्गयागयोरुद्देश्यविधेयभावसत्त्वेऽपि न तयोरादावेव परस्परान्वयः, किन्तु भावनान्वय एव । "[४]यद्धतयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमि"ति वार्तिकोक्तोद्देश्यलक्षणेऽपि प्राथम्यं प्रथममुद्देश्यत्वेन क्रियान्वयित्वमेव। प्रथमोच्चारितत्वरूपप्राथम्योक्तौ। "[५]वृद्धिरादैजि"त्यादावतिप्रसक्तिः। तत्र प्रथमोच्चारितस्यापि वृद्धिपदस्य उद्देश्यत्वाभावात् । तथा चात्र भक्षोद्देशेन प्राथम्यविधाने भक्षस्य प्राथम्यान्वयात् पूर्व क्रियान्वयो वक्तव्यः – "वषट्कर्तुर्यो भक्षो भवति" इत्येवम् । तथा सति क्रियान्वयात् पूर्वं प्रथमपदभक्षपदयोऑ परस्परान्वयाभावेन विशिष्टैकार्योपस्थापकत्वाभावेन एकार्थीभावसामर्थ्याभावेन समासानुपपत्तिः । परिपूर्णं पदं पदान्तरेणान्वेती"ति न्यायेन परिपूर्णस्यैव प्रथमभक्षपदस्य आख्यातान्वययोग्यत्वात् प्राथम्यभक्षयोरन्वयं विना च समासस्य परिपूर्णत्वासंभवात् भक्षमात्रस्य क्रियान्वयानुपपत्तिश्च । मीमांसकैः विशिष्टैकार्थवाचकत्वरूपैकार्थीभावास्वीकारेऽपि क्रियान्वयात् पूर्वं परस्परान्वयेन विशिष्टैकार्थबोधकत्वरूपैकार्थीभावः स्वीक्रियते एव । नन्वेवं सति "[६]तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इत्यत्र विविदिषोद्देशेन यज्ञादिकरणकभावनाविधानं न स्यात् । अत्र क्रियाया (भावनाया) एव विधेयत्वेन तत्रैव च विविदिषायाः एकपदश्रुत्या अन्वयेन विधेयान्वयत्पूर्वं क्रियान्वयरूपोद्देश्यलक्षणासंभवादिति चेन्न । क्रियात्मकविधेय-रहितस्थले एव उद्देश्यलक्षणस पूर्वोक्तरूपत्वस्वीकारेण अदोषात्। क्रियात्मकविधेयस्थले तु तादृशस्य उद्देश्यलक्षणस्य असंभवादेव अवीकारः । अतश्च एकप्रसरताभङ्गभिया वषट्कर्तृकर्तृकं प्राथम्यविशिष्टभक्षान्तरमेवात्र विधेयम्।


ISSN: 2249-538X

एकप्रसरताभङ्गभयादेव “लोहितोष्णीषा ऋत्विजः प्रचरन्ती”त्यत्र उष्णीषोद्देशेन लौहित्यविधिमस्वीकृत्य प्रचारो(यागानुष्ठानो)द्देशेन लोहितोष्णीष-विशिष्टकर्तुविधिं स्वीकृत्य कर्तॄणांमुष्णीषस्य च प्राप्तत्वेन विशेषणीभूते लौहित्ये एव विधेः पर्यवसानं स्वीक्रियते । न चात्रापि प्राथम्यविशिष्टभक्षविधानेऽपि प्राप्तभक्षे प्राथम्यविधाने एव विधेस्तात्पर्यमस्त्विति वाच्यम् । शब्दतो विधेयस्य विशेषस्य वषट्कर्तृकर्तृकभक्षस्य नियतप्राप्त्यभावेन तत्रैव विधेस्तात्पर्यस्य स्वीकार्यत्वात् । होतृचमसे वषट्कर्तुः होतुः समाख्यया, हारियोजने च “सर्व एव लिप्सन्त” इति वचनेन च वषट्कर्तुः प्राप्तत्वेऽपि अन्येषु ग्रहेषु चमसेषु च वषट्कर्तृकर्तृकभक्षस्य अप्राप्तत्वेन प्राथम्यविशिष्टस्य तस्यैव विधेयत्वात् । वषट्कारश्च यागार्थत्वेन क्लृप्तः अत्र भक्षकर्तृविशेषणतया उपात्तः, न तु तस्यापि अत्र विधेयकोटिप्रवेशः । अतः सः अर्थात् निमित्तं भवति । तथा च ग्रहेषु चमसेषु च अविशेषण वषट्कारनिमित्तकं प्राथम्यविशिष्टभक्षान्तरमनेन वचनेन सिध्यतीति ।

१.तैत्तिरीयसंहिता–६/२/११– अस्य वाक्यस्य होमाभिषवनिमित्तक-भक्षविधायकत्वमुत्तरस्मिन्नधिकरणे (३/५/९) निरूपितम् ।

२.३/५/७ अधिकरणस्य विषयवाक्यम् ।

३.वषट्कर्तुर्यो भक्षो भवति, सः प्रथममि’ति वाक्यार्थः एकप्रसरताभङ्गेन दूषितः । एकप्रसरताभङ्गस्य पूर्वोक्तार्थदूषकत्वं सामर्थ्यभङ्गद्वारा । अतः एकार्थीभावसामर्थ्यभङ्ग एकप्रसरताभङ्गस्य वाक्यार्थदूषकत्वे कारणमित्युच्यते ।

४.श्लोकवार्तिकम् – अनुमानप्रकरणे श्लोकसंख्या १०९ । अत्रत्यप्राथम्यपदार्थः भाट्टदीपिकोक्तरीत्या उक्तः । परन्तु अत्र प्राथम्ये एव उद्देश्यत्वस्य प्रविष्टत्वेन आपन्नः आत्माश्रयः कथं वारणीयः, अस्य प्राथम्यस्य सर्वेषु लक्ष्येषु समन्वयः कथं भवतीत्यादिकं विचारणीयम् ।

५.पाणिनीयसूत्रम् १/१/१

**********


ISSN: 2249-538X

# न्यायवैशेषिकमतयोः हेत्वाभासभेदविचारः

प्रो. राजारामशुक्लः
काशीहिन्दूविश्वविद्यालयः, वाराणसी

अनु+मानम् इत्यनयोः शब्दयोर्योगेन निष्पन्नोऽयमनुमानशब्दः । पश्चादित्यनुशब्दार्थः । ज्ञानमिति ज्ञानकरणमिति वा मानशब्दार्थः । अनुमानशब्दस्य व्युत्पत्तिर्द्विधा सम्भवति । (१) अनुमीयतेऽनेनेत्यनुमानम् । अनुपूर्व-माधातोः करणे ल्यूट् । इत्थमनुमानप्रमाणवाचकोऽयमनुमानशब्दः । (२) अनुमितिरनुमानम् । अत्र भावे ल्युट् । इत्थमनुमानशब्दस्यानुमितिप्रमेत्यर्थः ।

अनुमितिरित्यत्र पश्चादर्थकानुशब्दः सम्बन्धिसाकाङ्क्षः । कस्यापि पश्चाज्जायमानं ज्ञानमनुमितिरिति । तत्र कस्य पश्चादित्याकाङ्क्षा । व्याप्तिविशिष्टपक्षधर्मताज्ञानस्य पश्चादिति च समाधानम् । तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानमनुमितिः।[1] अस्या एवानुमितेः करणमनुमानं प्रमाणम् ।[2]

अनुमाननिरूपणं तावन्मोक्षोपयोगीति महामुनिना प्रमाणप्रमेयेत्यादिम[3] एव सूत्रे प्रतिपादितम् । अनुमाननिरूपणमपि हेत्वाभासनिरूपणमन्तरा न सम्भवति । तथाहि – अनुमितिं प्रति यथा हेतुविशेष्यकव्याप्तिपक्षधर्मता-प्रकारकज्ञानं कारणं, तथैव तद्विपरीतहेतुविशेष्यकहेत्वाभासत्वप्रकारकज्ञानमपि कारणम् । यतः पर्वतो वह्निमान् धूमादित्यनुमाने धूमहेतौ वह्निव्याप्यवत्ता-ज्ञानमिव तद्विपरीते जलरूपहेतौ वह्न्यभावव्याप्यवत्ताज्ञानेऽप्रामाण्यनिश्चय आवश्यकः, अन्यथा तत्सत्त्वे वह्न्यनुमितिर्न स्यात्,

---

[1] तर्कसर्गहः, पृ ३० (शारदा-प्रकाशन-संस्थानम्, वाराणसी – १९८४)

[2] तत्रैव ।

[3] न्यायसूत्रम्, सू. सं. १/१/१।


ISSN: 2249-538X

तद्बुद्धेस्तदभावव्याप्यवत्तामुद्रयाऽनुमितिं प्रति प्रतिबन्धकत्वात् । विपरीतहेतौ हेत्वाभासत्वज्ञानं च तादृशाप्रामाण्यज्ञानजनकमिति परम्परया हेत्वाभासनिरूपणमपि तत्त्वज्ञानोपयोग्येव । तदेव चोपाध्यायैः प्रतिज्ञातं हेत्वाभासनिरूपणारम्भे "अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते"[1] इति । अत्र तत्त्वनिर्णयपदेन प्रमितिकोटिनिश्चयो ग्राह्यः[2]। स च साध्यवत्पक्षविषयतानिरूपितसाध्यविषयताशालिनिश्चयरूपः। सद्धेतुरिवासद्धेतुरपि निरुक्तनिश्चयप्रयोजकः । तथा हि – 'पर्वतो वह्निमान् धूमात्', 'पर्वतो वह्निमान् जलात्' इति विरुद्धपक्षयोः समुपस्थितयोर्वह्न्यभावव्याप्यजलवान् पर्वत इति परामर्शसत्त्वे पर्वतविशेष्यकवह्निप्रकारकानुमितिर्न सम्भवति, परन्तु तत्काले इन्द्रियसन्निकर्षवशात् पर्वतनिरूपितवृत्तित्वाभाववज्जलमिति सिद्धौ जातायां इदं ज्ञानं जलाभाववति जलप्रकारकमित्यप्रामाण्यज्ञानं भवति । यतो दोषज्ञानेन विरोधिकोटिव्याप्यवत्ताज्ञानेऽप्रामाण्यग्रहो जायते । विरोधिपरामर्शोऽप्रामाण्यज्ञानाभावविशिष्टः सन्नेव पक्षविशेष्यकसाध्यानुमितिं प्रति प्रतिबन्धको भवतीति तदभावः प्रतिबन्धकाभावमुद्रयाऽनुमितिं प्रति कारणं भवति । अतस्तत्सम्पादनाय दोषज्ञानमावश्यकम् ।

यद्वा तत्त्वनिर्णयपदेनात्र साध्यवत्ताज्ञाने प्रमात्वनिश्चयो ग्राह्यः, तथा सति पर्वतो वह्निमानिति ज्ञानं प्रमा, वह्निनिरूपितव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वादित्यनुमानेन यथा सद्धेतुज्ञानस्य तत्त्वनिर्णयप्रयोजकत्वं, तथैव पर्वतो वह्न्यभाववानिति ज्ञानमप्रमा, वह्निनिरूपितव्याप्तिपक्षधर्मत्वाभावविशिष्टहेतुज्ञानजन्यज्ञानत्वादित्यनुमानेन प्रतिवादिना प्रयुक्ते हेतौ हेत्वाभासत्वज्ञानं जायते । तदधीनश्च साध्यवत्ताज्ञाने प्रमात्वनिश्चय इति स्पष्टमेव हेत्वाभासनिरूपणस्य तत्त्वनिर्णयप्रयोजकत्वम्। यतः साध्याभावसाधकहेतुविशेष्यकदुष्टत्वप्रकारकज्ञानेन साध्यवत्तानिश्चयविषयकाप्रामाण्यजनके

[1] तत्त्वचिन्तामणिः, पृ १५७९ ('गादाधारीसहिता' चौखाम्भा-संस्कृत-सीरिज, वाराणसी-१९१९)
[2] तत्रैव

ISSN: 2249-538X

साध्याभावसाधकहेतावदुष्टत्वज्ञानस्य विघटनं क्रियते । विपरीतकोटिसाधकहेतौ चादुष्टत्वज्ञानकाले साध्यवत्ताज्ञानविषयकप्रामाण्यनिश्चयो न सम्भवति । एवमेव प्रतिवादिहेतौ दुष्टत्वज्ञानसम्पादनद्वारा विजयोऽपि लभ्यते ।

सर्वतः प्रथमं गङ्गेशोपाध्यायैः हेत्वाभाससामान्यलक्षणकरणस्य प्रयासो व्यधायि । इतः पूर्वमुपलभ्यमानं निखिलमपि हेत्वाभासविषयकं विवेचनं तद्विभागमाश्रित्यैव प्रवर्तितम् । यद्यपि हेत्वाभासविभागमुखेन प्रतिहेत्वाभासं पृथक्तया स्वरूपनिर्वचनेन च सव्यभिचाराद्यन्यतमत्वरूपं हेत्वाभाससामान्यलक्षणं पूर्वैरपि कृतं, तथाप्यनुमितिप्रतिबन्धकत्वरूप-फलोपधानप्रवचनपरस्य लक्षणस्यावश्यकता सर्वतः प्रथममुपाध्यायैरेवानुभूता । तत्र त्रीणि हेत्वाभाससामान्यलक्षणानि तैः प्रोक्तानि –

१. अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम् ।

२. यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम् ।

३. ज्ञायमानं सदनुमितिप्रतिबन्धकत्वं तत्त्वमिति च ।[1]

सामान्यलक्षणमनुक्त्वा तद्विभागकथनं नोचितमिति सञ्चिन्त्य तावदेवं प्रयासोऽनुष्ठितः । सङ्क्षेपतोऽनुमितिप्रतिबन्धकज्ञानविषयत्वं हेत्वाभासत्वमिति फलितोऽर्थः । अनुमितिपदेनात्र साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारिका समूहालम्बनानुमितिर्ग्राह्या । तेन साध्यवत्ताज्ञानाविरोधिनि व्यभिचारादौ परामर्शाऽविरोधिनि बाधादौ च न दोषः ।

इत्थम्भूतस्य हेत्वाभासस्य न्यायनये पञ्च भेदाः निरूपिता दृश्यन्ते,किन्तु तेषां क्रमे वैविध्यं लभ्यते । तत्र "सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः" [2] इति सूत्रकारीय एव क्रमस्तर्कसंग्रहकृताप्यनुसृतः ।[3] परं तत्र केषाञ्चन नाम्नां भेदो

---

[1] तदेव, पृ.सं.१५८० ।

[2] न्या. सू. १/२/४ ।

[3] तर्कसंग्रहः, पृ. ४२ ।

ISSN: 2249-538X

वर्तते। प्रकरणसमसाध्यसमकालातीतानां स्थाने क्रमशः सत्प्रतिपक्षासिद्धबाधिता इति नाम्नो निर्देशो वर्तते । उभावादिमौ तु समानावेव । विश्वनाथपञ्चाननेन तु क्रमेऽपि कश्चन भेदः स्वीकृतः । सत्प्रतिपक्षस्य स्थानेऽसिद्धस्य, असिद्धस्य स्थाने सत्प्रतिपक्षस्य स्थापना कृता, क्रमे शेषं तुल्यम्। संज्ञायां तु सव्यभिचार-प्रकरणसम-साध्यसम-कालातीतानां स्थाने क्रमशोऽनैकान्तिक-सत्प्रतिपक्ष-असिद्ध-कालात्ययापदिष्टा इति नामानि स्थापितानि । तथाहि –

अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः ।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥[1]

किन्तूक्तकारिकाव्याख्यानावसरे तेनैव सूत्रानुसारी क्रम एवादृतः ।[2] एतेनेत्थं प्रतीयते यच्छन्दःपारवश्यात् मूले कश्चन क्रमभेदो विहितः । चिन्तामणिकारैरपि सौत्र एव क्रम आदृतः – 'ते च सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिताः पञ्च' ।[3]

अयमत्र विशेषो यदेतैः सर्वैरपि व्यभिचारस्यादिमत्वं बाधस्य चान्तिमत्वं स्वीकृतमेव । परमेतद्विरुद्धं केशवमिश्रेण सव्यभिचारस्तृतीयस्थाने स्थाप्यते । एवमेव सौत्रक्रममतिरिच्य चतुर्थस्य प्रथमत्वं, द्वितीयस्य् तथात्वं, प्रथमस्य तृतीयत्वं, तृतीयस्य चतुर्थत्वं, पञ्चमस्य च पञ्चमत्वं स्वीकरोति सः । तथा हि – ते चासिद्ध-विरुद्ध-अनैकान्तिक-प्रकरणसम-कालात्ययापदिष्टभेदात् पञ्चैव ।[4] अत्र विरुद्धस्य द्वितीयत्वं बाधस्य च पञ्चमत्वं सर्ववादिसम्मतम् ।

ऐतिहासिकदृष्ट्या हेत्वाभासविषयकं विवेचनं सर्वतः प्रथमं वैशेषिकसूत्र उपलभ्यते । तदनुसारेण अप्रसिद्धः, असन् एवं सन्दिग्ध इति त्रयाणां

---

[1] कारिकावली, का. सं. ७१ ।

[2] न्या. सि. मु., कारिका सं. ७१ ।

[3] त. चि. पृ. १६३४ ।

[4] तर्कभाषा, हेत्वाभासनिरूपणम्, पृ. ५९० (मुसलगाँवकरः, चौखाम्भा-सुरभारतीप्रकाशनम्, वाराणसी – १९८४)


ISSN: 2249-538X

हेत्वाभासत्वमस्ति [1], किन्तु वृत्तिकारः “अप्रसिद्धोऽपदेशोऽसन्सन्दिग्धश्चानपदेशः” [2] इत्यत्र चकारसामर्थ्याद् बाधसत्प्रतिपक्षयोरपि हेत्वाभासत्वं सूत्रकारसम्मतमिति प्रतिपादयति । शङ्करमिश्रस्तु “विरुद्धासिद्धसन्दिग्धमलिङ्गं काश्यपोऽब्रवीदिति’ प्रशस्तपादभाष्योक्तं [3] पुरस्कृत्य हेत्वाभासत्रित्व एव स्वसम्मतिं प्रकटयति ।[4]

वैशेषिकसूत्रानुसारेण प्रसिद्धिपूर्वकः (व्याप्त्यादियुक्तः) [5] हेतुरेवापदेशस्तद्भिन्नश्चानपदेशः । ‘अप्रसिद्धः’ ‘असन्’ इत्यनयोरुदाहरणं तत्र यथा – यस्माद्विषाणी तस्मादश्व इति ।[6] अत्र दूराद् रासभं दृष्ट्वा कश्चिदनुमिनोति –अयमश्वो विषाणित्वात्। अत्र प्रथमतो विषाणित्वहेतावश्वत्वव्याप्तेरभावादप्रसिद्धो हेत्वाभासः । एवं पक्षीभूते रासभे विषाणित्वात्यन्ताभावादसिद्धोऽपि ।सन्दिग्धस्योदाहरणं यथा तत्र – ‘यस्माद्विषाणी तस्माद्गौः’ इति । गोत्वाभाववति महिषादौ गोत्ववति चापि विषाणित्वस्य सत्त्वात् सन्दिग्धः ।

उदाहरणबलात् सन्दिग्धाप्रसिद्धयोर्मध्ये भेदोऽयं ज्ञायते यत् सन्दिग्धे साध्यहेत्वोर्व्यभिचारेऽपि कुत्रचित् सामानाधिकरण्यं भवेत् । अप्रसिद्धे पुनः सर्वथाऽसामानाधिकरण्यमिति। अयं भेदः न्यायमते विरुद्धसाधारणयोरिवास्ति। हेतोः साध्यवति साध्याभाववति च सत्त्वेन पक्षे तज्ज्ञानं पक्षे साध्यसंशयानुकूलमिति तदाशयः, किन्तु सूत्रेऽत्र अनैकान्तिकशब्दस्यैवोल्लेखः कृतः– “यस्माद्विषाणी तस्माद्गौरित्यनैकान्तिकस्योदाहरणम्” [7] इति । गङ्गेशोपाध्यायैरपि

---

[1] वैशेषिकसूत्रम्, ३/१/१५ ।

[2] तत्रैव ।

[3] प्रशस्तपादभाष्यम्, पृ. २९०-२९१ (वाराणसेयसंस्कृतविश्वविद्यालयः, शकाब्दः – १८८५)

[4] वै. सूत्रोपस्कारः, सू. ३/१/१५ (चौखम्भासंस्कृतसीरिज, वाराणसी – १९३९)

[5] वै.सू. ३/१/१४ ।

[6] तदेव – ३/१/१६ ।

[7] तदेव ३/१/१७ ।

ISSN: 2249-538X

साध्यसन्देहजनक-कोटिद्वयोपस्थापकत्वं साधारणज्ञानस्य स्वीकृत्य प्रकटीकृतोयमाशयः ।

भाष्यकृता प्रशस्तपादेन पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्वेति सद्धेतुधर्माणामभावेन विरुद्ध-असिद्ध-सन्दिग्धानां हेत्वाभासत्वं प्रत्यपादि ।[1]

शिवादित्येन असिद्ध-विरुद्ध-अनैकान्तिक-अनध्यवसित-कालात्ययापदिष्ट-प्रकरणसमा इत्येतेषां षण्णां हेत्वाभासत्वं स्वीकृतम् ।[2]

उपर्युक्तविवरणानुसारेण न्यायवैशेषिकयोर्मते हेत्वाभासतालिका निम्नप्रकारेण भवति –

## न्यायमतम्

| | | | | | |
|---|---|---|---|---|---|
| गौतमः - | सव्यभिचारः, | विरुद्धः, | प्रकरणसमः, | साध्यसमः, | कालातीतः |
| अन्नम्भट्टः - | सव्यभिचारः, | विरुद्धः, | सत्प्रतिपक्षः, | असिद्धः, | बाधितः |
| विश्वनाथः - | अनैकान्तः, | विरुद्धः, | प्रतिपक्षितः, | असिद्धः, | कालात्ययापदिष्टः |
| गङ्गेशोपाध्यायः - | सव्यभिचारः, | विरुद्धः, | सत्प्रतिपक्षः, | असिद्धः, | बाधितः |
| केशवमिश्रः - | असिद्धः, | विरुद्धः, | अनैकान्तिकः, | प्रकरणसमः, | कालात्ययापदिष्टः |

## वैशेषिकमतम्

| | | | |
|---|---|---|---|
| कणादः - | सन्दिग्धः, | अप्रसिद्धः | असन् |
| प्रशस्तपादः - | अनध्यवसितः, | अप्रसिद्धः, | असन् |
| काश्यपः - | सन्दिग्धः, | विरुद्धः, | असन् |
| शङ्करमिश्रः - | सन्दिग्धः, | विरुद्धः, | असन् |

शिवादित्यः - अनैकान्तिकः, विरुद्धः, प्रकरणसमः, असिद्धः, कालात्ययापदिष्टः, अनध्यवसितः

वस्तुतः आलोच्यमाने साध्याप्रसिद्धि-सव्यभिचार-विरुद्ध-(साध्यासमानाधिरणो हेतुर्विरुद्धः इति पक्षे) – हेत्वप्रसिद्धि-व्याप्यत्वासिद्धि-

---

[1] प्रशस्तपादभाष्यम्, पृ. २९०-२९३ ।

[2] सप्तपदार्थी, पृ. ३४ (महादेवः केशवकाले, गिरगाँव, बम्बई-१९१९)

ISSN: 2249-538X

पक्षाप्रसिद्धि-सत्प्रतिपक्ष-बाधा इति क्रम एव हेत्वाभासानां साधीयान् । साध्यव्यापकीभूताभावप्रतियोगी हेतुर्विरुद्ध इति पक्षे तु विरुद्धस्यानुमितिप्रतिबन्धकत्वात् पक्षाप्रसिद्ध्यनन्तरं निवेशः । अयं क्रमः प्रतिबन्धकतामर्यादामाश्रित्य भवति ।

एतावता विवरणेन केषाञ्चन हेत्वाभासानां कानिचन विशिष्टानि नामानि ज्ञातानि भवन्ति । तथा ह्यनैकान्तिकः सन्दिग्धश्चेति नामद्वयं सव्यभिचारस्य, किन्तु "अनैकान्तिकः सव्यभिचारः"[1] इति सूत्रेऽनैकान्तिकत्वं सव्यभिचारस्य लक्षणमुक्तम्। तच्च "एकस्मिन्नन्ते वर्तत इत्येकान्तिकः, नैकान्तिकोऽनैकान्तिकः" इति भाष्यकृता व्याख्यातम् ।[2] उद्योतकर-वाचस्पतिमिश्र-विश्वनाथप्रभृतिभिरनैकान्तिकस्येदमेव व्याख्यानं समर्थितम्।[3] तथा चानैकान्तिक इति सव्यभिचारस्य न हि नामान्तरमपि तु स्वरूपमात्रमित्यप्यवगतं भवति । प्रकरणसम इति सत्प्रतिपक्षस्य नामान्तरम् । असिद्धस्य साध्यसम इति संज्ञाऽसन्निति च स्वरूपम् । बाधस्य नामद्वयम् – (१) कालातीतः, (२) कालात्ययापदिष्टश्च ।

इदानीं प्रतिहेत्वाभासं सङ्क्षेपतो निरूपणं क्रियते ।

**सव्यभिचारः –**

"व्यभिचारः (वि+अभि+चर्) नाम साध्याभाववद्वृत्तित्वम्"[4] तेन सह वर्तत इति सव्यभिचारः ।

गङ्गेशोपाध्यायैस्तु – साध्यसन्देहजनककोटिद्वयोपस्थापकतावच्छेदकरूपवत्त्वं सव्यभिचारत्वमित्यभ्युपगम्यते"[5]। केशवमिश्रोऽपि "साध्यसंशयहेतु-

---

[1] न्या.सू. १/२/५ ।

[2] वा.भा., सू. १/२/५ ।

[3] न्या.वा., पृ. ३७३; न्या.वा.ता.टी., पृ. ३७३ (विब्लियोयिका इण्डिका, कलकत्ता- १९२२) न्या.सू. विवृतिः ।

[4] त. चि. व्याप्तिपञ्चकम् ।

[5] त. चि., पृ. सं. १६८५ ।


ISSN: 2249-538X

रनैकान्तिकः सव्यभिचारः" इत्यनेन पूर्वोक्ताशयमेव प्रकटयति।[1] इत्थम्भूतो व्यभिचारः साधारणासाधारणानुपसंहारिभेदात्त्रिविधः ।[2]

**साधारणः –**

साधारणत्वं सपक्षवृत्तित्वे सति विपक्षवृत्तित्वम् । सपक्षो नाम निश्चितसाध्यवान् । विपक्षश्च निश्चितसाध्याभाववान् । 'पर्वतो धूमवान् वह्नेः' इत्यत्र वह्निहेतुः साधारणः, वह्नेः सपक्षे महानसे विपक्षेऽयोगोलके च सत्त्वात् । सद्धेतावतिव्याप्तिवारणाय विपक्षवृत्तित्वम् । विरुद्धेऽतिव्याप्तिवारणाय च सपक्षवृत्तित्वदलम् । विरुद्धस्तु साध्यवन्मात्रावृत्तिरिति नोक्तरीत्याऽतिव्याप्तिः । अथवोक्तलक्षणे सपक्षवृत्तित्वं न देयं, विरुद्धेऽतिव्याप्तिवारणं तु विरुद्धासाधारणयोर्दूषकताबीजस्य भिन्नत्वाच्छक्यम्। विरुद्धे विपक्षव्यावृत्तत्वरूप-साधारणलक्षणगमनेऽपि दूषकताबीजस्य भिन्नतया तयोर्भेदस्य वक्तुं शक्यत्वादिति भावः । दूषकताबीजे भेदस्तु प्रतिबन्धकत्वस्वरूपेण । तथा हि – विरुद्धज्ञानं सामानाधिकरण्यग्रहविरोधि, साधारणज्ञानं चाव्यभिचारग्रहविरोधि । विरुद्धज्ञानेन सिद्धान्तव्याप्तिग्रहविरोधः, साधारणज्ञानेन पूर्वपक्षव्याप्तिग्रहविरोध इत्याशयः ।

केशवमिश्रस्तु पक्षवृत्तित्वमपि साधारणस्याभ्युपगच्छति, किन्त्वव्यापकहेतुकासद्धेतुस्थले पर्वतो वह्निमान् जलादित्यादौ तन्मते साधारण्यं न स्यात्, तस्य पक्षवृत्तित्वाभावात् । विरुद्धसाधारणयोरेकत्र सत्त्वे बाधकाभावेन तत्र विरुद्ध एव न तु साधारण इत्यपि वक्तुं न शक्यते, तथापि साध्यव्यापकस्य हेतुत्व एव साधारणोऽव्यापकस्य हेतुत्वे तु विरुद्ध इत्याशयेन तेन तथोक्तं स्यात् । एतेन दूषकताबीजभेदस्याभेदकत्वेऽपि न विरुद्धसाधारणयोरैक्यापत्तिः, विरुद्धस्य पक्षावृत्तित्वादित्यप्युक्तं भवति ।

---

[1] त. भा., पृ. ६०७। तत्रैव, का.सं. ७३।

[2] कारिकावली, का. सं. ७२।

ISSN: 2249-538X

"यस्माद्विषाणी तस्माद् गौरिति चानैकान्तिकस्योदाहरणम्" [1] इति सूत्रव्याख्यानावसरे महिषं पक्षयित्वाऽयं गौर्विषाणित्वादिति साधारणस्योदाहरणेन [2] साधारणलक्षणे हेतोः पक्षवृत्तित्वमभिमतमिति सूचितमिति प्रतीयते, किन्तु सूत्रे तस्य शब्दत उल्लेखो नास्तीति तस्य लक्षणघटकत्वं सूत्रकाराभिमतमिति निश्चप्रचं वक्तुं न शक्यते ।

अन्नम्भट्टस्तु "साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः" [3] इत्युक्त्वा विपक्षवृत्तित्वमात्रं तस्य स्वीकरोति, किन्तु तत्पदकृत्यकारैर्विरुद्धेऽति-व्याप्तिवारणाय सपक्षवृत्तित्वं स्वरूपासिद्धावतिव्याप्तिवारणाय पक्षवृत्तित्वं चापि निवेश्यते । एतेन पक्षवृत्तित्वादिकमन्नम्भट्टाभिमतमिति प्रतीयते ।

गङ्गेशोपाध्यायस्तु विपक्षवृत्तित्वमात्रं साधारण्यमुक्त्वा दूषकताबीजस्य भिन्नत्वाद् विरुद्धस्वरूपासिद्ध्यादावतिव्याप्तिप्रसङ्गं वारयति ।[4]

**असाधारणः –**

विश्वनाथानुसारं सपक्षविपक्षव्यावृत्तोऽसाधारणः । [5] शब्दोऽनित्यः शब्दत्वादित्युदाहरणम् । शब्दत्वस्य सपक्षे घटादौ विपक्षे गगनादौ चासत्त्वाल्लक्षणसमन्वयः ।

अत्रापि पक्षवृत्तित्वस्य लक्षणघटकतया निवेश आवश्यको न वेति विचारणीयम् । विश्वनाथकृतलक्षणे यद्यपि पक्षवृत्तित्वस्य शब्दत उल्लेखो नास्ति तथापि निरुक्तोदाहरणे हेतोः पक्षमात्रवृत्तित्वं दृश्यते । अन्नम्भट्टः "सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः" [6] इत्यनेन लक्षणे

---

[1] वै.सू. ३/१/१७।

[2] वै.सूत्रोप. सू. सं. ३/१/१७

[3] तर्कसंग्रहः, पृ. ४३ ।

[4] त.चि. साधारणप्रकरणम् ।

[5] न्या. सि. मु., का. सं. ७३ ।

[6] त. सं., पृ. ९३ ।


ISSN: 2249-538X

पक्षवृत्तित्वनिवेशमभ्युपगच्छति । शब्दो नित्यः शब्दत्वादित्युदाहरणे शब्दत्वं नित्येभ्यः शब्दातिरिक्तानित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति भवतीत्यनेन चोक्ताशयस्तेन दृढीकृतः । पृथ्वी नित्या गन्धवत्त्वादित्युदाहरणे गन्धवत्त्वस्य पृथ्वीमात्रवृत्तित्वकथनेन केशवमिश्रोऽपि पक्षवृत्तित्वमसाधारणस्य समर्थयते ।[1]

यद्यपि शङ्करमिश्रेणासाधारणस्य किमपि लक्षणं न प्रस्तूयते, तथापि "आकाशं नित्यं शब्दाश्रयत्वात्", "शब्दोऽनित्यः शब्दत्वात्" इत्युदाहरणद्वयप्रदर्शनमुखेनासाधारणस्य पक्षवृत्तित्वं स्वीक्रियते, परन्तूत्तरत्र शब्दोऽनित्यः शब्दत्वादित्युदाहरणे विपक्षबाधकतर्कावतारात् पक्षे साध्यसिद्धौ तस्यापि सपक्षत्वेनासाधारण्यमूलीभूत-सपक्षव्यावृत्तित्वाभावादस्य सद्धेतुत्वं संसाध्य सपक्षव्यावृत्तत्वमात्रस्यासाधारण्यमूलता तेन स्वीक्रियत इति प्रतीयते । अन्यथा शब्दो नित्यः शब्दत्वादित्यप्युदाहरणं प्रदर्श्य शब्दे नित्यत्वाभावसिद्धिकाले तस्य विपक्षत्वाद् विपक्षव्यावृत्तत्वाभावादेव शब्दत्वस्यासाधारण्यं निषेद्धुं शक्यं स्यात्। अतो विपक्षव्यावृत्तत्वस्यासाधारण्यमूलता न तदभिमतेति वक्तुं शक्यते ।[2]

तथा च शब्दो नित्यः शब्दत्वादित्यत्रासाधारण्यमस्त्येव । ननु तत्र विरोधोऽप्यस्तीति चेदास्ताम्, एकस्मिन् हेतौ नैकदोषसत्त्वे बाधकाभावात् ।

असाधारण्यविरोधादिस्थलेऽपि पक्षतादशायां साध्यतदभावानिश्चयेन असाधारण्यस्य पृथग्दोषता, अन्यथा यदि भूर्नित्या गन्धवत्त्वात्, शब्दो नित्यः शब्दत्वात्, शब्दोऽनित्य शब्दत्वादित्यादौ सर्वत्र पक्षत्वेनाभिमते साध्यनिर्णयं कृत्वा क्रमशः साधारणविरुधसद्धेतुत्वादीनामेव प्रवृत्तावसाधारणस्य पृथग्दोषतैव नास्तीत्युच्यते, तदा पक्षत्वभङ्गप्रसङ्गः स्यादिति गङ्गेशोपाध्यायेनोक्तम् ।[3] न्यायबोधिनीकारोऽपि सर्वसपक्षविपक्षव्यावृत्तत्वपदेन साध्यासामाना-

[1] त. भा. पृ. ६०७ ।

[2] वै.सूत्रोप. सू. सं. ३/१/१८ ।

[3] त. चि. असाधारणप्रकरणम् ।


ISSN: 2249-538X

धिकरण्यमित्यर्थलाभं कृत्वा साध्यसामानाधिकरण्यरूपव्याप्तिग्रह-प्रतिबन्धफलकतयाऽसाधारणस्य सपक्षव्यावृत्तत्वमात्रं समर्थयते। [1] ”सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः” इति प्राचां मतं निराकृत्य “अथ सर्वसपक्षव्यावृत्तिरेव दोषो न तु विपक्षव्यावृत्तिरपि” इत्यादिना गङ्गेशोपाध्यायेनापि सपक्षव्यावृत्तत्वमात्रमसाधारणस्य प्रयोजकं स्वीकृतम् ।[2]

अत्रेदं विचारणीयं यदवृत्तेर्गगनादेरसाधारणता सम्भवति न वा? सर्वसपक्षविपक्षव्यावृत्तत्वस्य लक्षणत्वे सम्भवति, पक्षवृत्तित्वस्यापि लक्षणघटकत्वे तु नेति वक्तव्यम् । तथा च नव्यमते गगनस्यासाधारणत्वं, प्राचां मते नेति सिद्धम् ।

आधुनिकास्तु साध्यव्यापकीभूताभावप्रतियोग्यसाधारण इत्याहुः । अन्यथा पर्वतो वह्निमान् पर्वतीयधूमादित्यत्र पर्वतीयधूमस्य सपक्षव्यावृत्तत्वविपक्षव्यावृत्तत्वपक्षमात्रवृत्तित्वानामसाधारण्यप्रयोजकानां सत्त्वेनासाधारण्यं स्यात् । एवमेव पृथ्वीतरभिन्ना गन्धवत्त्वादित्यादि-केवलव्यतिरेकिणि सपक्षविपक्षव्यावृत्तत्वस्य पक्षमात्रवृत्तित्वस्य च सत्त्वाद् गन्धहेतोरसाधारण्यं स्यात् । साध्यव्यापकीभूताभावप्रतियोगित्वस्यासाधारणत्वे च नोक्तापत्तिः, पर्वतीयधूमाभावस्य गन्धाभावस्य च साध्याव्यापकत्वात् । अतोऽयमेव पक्षः समीचीनः प्रतिभाति ।

**अनुपसंहारी –**

अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारीत्यन्नम्भट्टः।[3] सपक्षविपक्षयोरेव क्रमशोऽन्वयव्यतिरेकदृष्टान्तत्वम्। तद्राहित्यं केवलं केवलान्वयिधर्मावच्छिन्न-पक्षक एव सम्भवति, तत्र सर्वस्य सन्दिग्धसाध्यवत्तया पक्षत्वेन

[1] न्यायबोधिनी, पृ. ४४ ।

[2] त.चि. असाधारणप्रकरणम् ।

[3] त. सं., पृ. ४४ ।


ISSN: 2249-538X

सपक्षविपक्षयोरप्रसिद्धेः । अस्य दोषता तु व्याप्तिज्ञानप्रतिबन्धकज्ञानविषयत्वात्। अन्वयदृष्टान्तराहित्यात् साध्यसामानाधिकरण्यरूपव्याप्तिग्रहप्रतिबन्धः, व्यतिरेकदृष्टान्तराहित्याच्चाव्यभिचरितत्वरूपव्याप्तिग्रहप्रतिबन्ध इत्याशयः ।

"केवलान्वयिपक्षगः" [1] इत्यस्यापि केवलान्वयिधर्मावच्छिन्नपक्षग इत्याशयो न तु पक्षेण केवलान्वयिना भाव्यमिति, अन्यथा सर्वमनित्यं प्रमेयत्वादित्यस्यानुपसंहारिता न स्यात्, सर्वत्वावच्छिन्नस्याकेवलान्वयित्वात् ।

"केवलान्वयिपक्षको वा" [2] इति वदतो गङ्गेशोपाध्यायस्याप्ययमेवाशयः। सर्वमभिधेयं प्रमेयत्वादित्यादिसद्धेतौ तु न सर्वत्वावच्छिन्ने साध्यसंशय इति सपक्षस्य प्रसिद्धत्वेन नानुपसंहारित्वम् । सर्वत्वावच्छिन्ने साध्यसंशये तु तस्यानुपसंहारित्वमस्त्येवेति विवेकः ।

अथैतन्न समीचीनम् । तथा हि केवलान्वयिधर्मावच्छिन्नपक्षक इत्यत्र चत्वारः प्रकाराः –

१. केवलान्वयिसाध्यक – केवलान्वयिहेतुकत्वम् ।
२. केवलान्वयिसाध्यक – व्यतिरेकिहेतुकत्वम् ।
३. व्यतिरेकिसाध्यक – केवलान्वयिहेतुकत्वम् ।
४. व्यतिरेकिसाध्यक-व्यतिरेकिहेतुकत्वञ्च ।

तत्र केवलान्वयिसाध्यकस्य सद्धेतुत्वनियमेन प्रथमद्वितीययोर्न हेत्वाभासत्वम्। तृतीयस्थले केवलान्वयिहेतोः सपक्षविपक्षोभयवृत्तित्वात्साधारणत्वमेव । चतुर्थस्थले व्यतिरेकिहेतोर्भागासिद्धत्वमित्यनुपसंहारिणः पृथक्तया स्वीकारो नावश्यकः । यदि च द्वितीयहेतोर्व्याप्यत्वेऽपि पक्षधर्मत्वाभावान्न सद्धेतुत्वमित्युच्यते तथा चतुर्थवत् भागासिद्धिरेव न त्वनुपसंहारित्वम् ।

[1] कारिकावली, का. सं. ७४ ।

[2] त. सि. अनुपसंहारिप्रकरणम् ।


ISSN: 2249-538X

अन्यच्च सर्वत्वावच्छिन्नैकदेशे घटादौ साध्यहेत्वोः सामानाधिकरण्यग्रहेऽपि केवलान्वयिपक्षकत्वं तस्य बाधितं न भवति, किन्तु तथा सति साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारकसमूहालम्बनानुमिति-प्रतिबन्धकज्ञानविषयत्वाभावात्तस्य हेत्वाभासत्वमेव न सम्भवति । ननु सर्वत्वावच्छेदेन साध्यसंशये जाते घटाद्यवच्छेदेनापि न साध्यनिश्चयः सम्भवति, असमानविषयकत्वेनापि प्रतिबन्धकत्वस्याङ्गीकारादिति चेत्, तथापि तत्र व्याप्तिग्रहाभावात्मिकायाः कारणासिद्धेरेव दूषणत्वमुच्यतां न पुनस्तस्य हेत्वाभासत्वाङ्गीकार इत्यनुपसंहारिणः पृथग् हेत्वाभासत्वं नास्तीति प्रतिभाति ।

**सव्यभिचारभेदः –**

केशवमिश्रमतानुसारेण साधारणासाधारणभेदेन सव्यभिचारस्य द्वैविध्यमेव ।[1] "यस्माद्विषाणी तस्माच्च गौः"[2] इति सूत्रे यद्यपि साधारणस्यैव प्रतिपादनं क्रियते, तथापि तद्व्याख्यावसरे शङ्करमिश्रः साधारणासाधारणयोः पार्थक्येन निरूपणं करोति[3], किन्तूभयत्राप्यनुपसंहारी नोल्लिख्यते । सम्भवतोऽनुपसंहारिणोऽसाधारणान्तर्भावस्तेन स्वीक्रियते । यत उभयत्रापि हेतुः पक्षमात्रवृत्तिर्भवति । एकत्र सपक्षविपक्षयोः सत्ताऽस्ति । अपरत्र तु नास्ति, परन्तु सपक्षविपक्षव्यावृत्तत्वमुभयत्रापि भवतीत्यसाधारणेनैव निर्वाहेऽतिरिक्तदोषाङ्गीकारे बीजाभाव इति तदाशयः स्यात् ।

ननु तर्ह्यनुपसंहारिण एव हेत्वाभासत्वमस्तु कुतोऽसाधारणस्य, विनिगमकाभावेनोभयोरेव वा हेत्वाभासत्वं सिध्यतीति चेन्न, तथा सति शब्दो नित्यः शब्दत्वादित्यादौ सपक्षविपक्षसत्त्वस्थले हेत्वाभासत्वं न स्यात्, अनुपसंहारिताप्रयोजकस्य सपक्षविपक्षराहित्यस्य तत्राभावात्।

---

[1] त. भा., पृ. ६०७ ।

[2] वै. सू. ३/१/१७ ।

[3] वै. सूत्रोप., सू. सं. ३/१/१७ ।

ISSN: 2249-538X

अनुपसंहारिणस्त्वसाधारणेऽन्तर्भावः सम्भवति, सर्वमनित्यं प्रमेयत्वादित्यादौ सपक्षविपक्षाप्रसिद्धावप्यसाधारणताप्रयोजकस्य पक्षमात्रवृत्तित्वस्य तत्र सत्त्वात् ।

किन्तु "अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चानपदेशः" इति सूत्रस्थसन्दिग्ध इति पदव्याख्यानावसरे शङ्करमिश्रः साधारणासाधारणानुपसंहारिभेदात् सव्यभिचारत्रैविध्यमेव स्वीकरोति ।[1] अन्नम्भट्टो विश्वनाथश्चोभावपि साधारणासाधारणानुपसंहारिभेदात्सव्यभिचार-त्रैविध्यमेव स्वीकुरुतः ।[2]

यद्यपि भगवता गौतमेन सव्यभिचारस्य कोऽपि भेदो न प्रदर्शितः, नापि भाष्यकृता तद्भेदविषये चर्चितं तथापि शब्दो नित्योऽस्पर्शत्वादित्युदाहरणमुखेन भाष्यकृता साधारणस्यैव सव्यभिचारत्वं समर्थितम् ।[3] अस्पर्शत्वस्य सपक्षे गगनादौ विपक्षे रूपादौ च सत्त्वात् सपक्षविपक्षव्यावृत्तत्वं सपक्षविपक्षराहित्यं चेति द्वयमपि नास्ति ।

**भासर्वज्ञेन सव्यभिचारस्याष्टौ भेदाः स्वीकृताः –**

१. पक्षत्रयव्यापकः, यथा – शब्दोऽनित्यः प्रमेयत्वात् ।
२. पक्षव्यापकसमक्षविपक्षैकदेशवृत्तिः, यथा – शब्दोऽनियः प्रत्यक्षत्वात् ।
३. पक्षविपक्षव्यापकसपक्षैकदेशवृत्तिः, यथा – गौर्विषाणित्वात् ।
४. पक्षविपक्षव्यापकसपक्षैकदेशवृत्तिः, यथा – नायं गौर्विषाणित्वात् ।
५. पक्षत्रयैकदेशवृत्तिः, यथा – पृथ्वी नित्या प्रत्यक्षत्वात् ।
६. पक्षसपक्षैकदेशवृत्तिपक्षव्यापकः, यथा – दिक्कालमनांसि द्रव्याणि अमूर्तत्वात् ।

---

[1] तदेव

[2] त. सं., पृ. ४३; कारिकावली, का.सं. ७२ ।

[3] वा. भा., सू. सं. १/२/५ ।


ISSN: 2249-538X

७. सपक्षविपक्षव्यापकपक्षैकदेशवृत्तिः, यथा– आकाशकालदिगात्ममनांस्यद्रव्याणि क्षणिकविशेषगुणराहित्यादिति ।[1]

**विरुद्धः –**

साध्यव्यापकीभूताभावप्रतियोगी हेतुर्विरुद्धः।[2] गौरश्वत्वादित्युदाहरणम्। यद्यपि मूले विश्वनाथेन केवलं साध्याभाववद्वृत्तित्वं तल्लक्षणमुक्तम्, तथापि तद्व्याख्यानावसरे तेन "यः साध्यवति नैवास्ति" इति कारिकांशस्थैवकारेण व्यापकत्वरूपोऽर्थो निष्पादितः । साध्यवत्त्वावच्छेदेन हेत्वभावः । साध्यव्यापकीभूताभावप्रतियोगित्ववान् हेतुरिति तदर्थः। तेन विरुद्धानैकान्तिकयोर्नैक्यापत्तिः ।[3]

साध्याभावव्याप्यस्य हेतोर्विरुद्धत्वं स्वीकुर्वतोः केशवमिश्रान्नम्भट्टयोरप्ययमेवाशयः।[4] तथा हि – साध्याभावव्याप्य इत्यस्य साध्याभावव्यतिरेकव्याप्तिविशिष्ट इत्यर्थः । तथा च साध्यव्यापकीभूताभावप्रतियोगित्वमिति फलितोऽर्थः।[5] साध्याभावव्याप्य इत्यत्र व्याप्तिपदेन व्यतिरेकव्याप्तेरग्रहणेऽन्वयव्याप्तिस्वीकारे च कपिसंयोग्येतद्वृक्षत्वादित्यत्रातिव्याप्तिः । तथा हि – साध्याभावस्यान्वयव्याप्तिरित्युक्तौ प्रतियोग्यसमानाधिकरणैतद्वृक्षत्वसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदककपिसंयोगाभावत्वावच्छिन्नसामानाधिकरण्यं लभ्यते। तत्रैतद्वृक्षत्वसमानाधिकरणात्यन्ताभावः कपिसंयोगाभावाभावो न प्रतियोग्यसमानाधिकरण इत्यभावान्तरमादाय तत्प्रतियोगितानवच्छेदककपिसंयोगाभावत्वावच्छिन्नसामानाधिकरण्यस्यैतद्वृक्षत्वे सत्त्वात् । व्यतिरेकव्याप्तिनिवेशे तु कपिसंयोगाधिकरण

---

[1] न्यायसारः, पृ. ३५ (पदपञ्जिकाटीकासहितः, राजकीयमुद्रणालयः, त्रिवेन्द्रम्-१९)

[2] न्या. सि. मु., का. सं. ७४ ।

[3] तत्रैव ।

[4] त. भा., पृ. ७७ तथा त. सं., पृ. ४९ ।

[5] न्या. बो., पृ. ४४ ।

ISSN: 2249-538X

एतद्वृक्षत्वाभावस्यासत्त्वान्न साध्याभावव्याप्यत्वमेतद्वृक्षस्येति नातिव्याप्तिः । अत एव "विरोधो न साध्याभावव्याप्यः" इत्युक्त्वा सिद्धान्तरूपेण "साध्यव्यापकाभावप्रतियोगित्वम्" इति मणिकारेणोक्तम् ।[1]

ननु साध्याभावाधिकरणनिरूपितवृत्तित्वाभावरूपपूर्वपक्षव्याप्तौ कपिसंयोग्येतद्वृक्षत्वादित्यत्र कपिसंयोगाभावाधिकरण एतद्वृक्ष एतद्वृक्षत्वस्य वृत्तेरव्याप्तिवारणायाधिकरणतायां निरवच्छिन्नत्वनिवेशः करणीयः ।[2] तथा च प्रकृते निरुक्तान्वयव्याप्त्यापि निर्वाहः सम्भवति । कपिसंयोग्येतद्वृक्षत्वादित्यत्र तु नातिव्याप्तिः । तथा हि साध्याभावस्यान्वयव्याप्तिः कपिसंयोग-निष्ठाधेयतानिरूपितनिरवच्छिन्नाधिकरणताश्रयनिरूपितवृत्तित्वाभावः। तत्र कपिसंयोगनिष्ठाधेयतानिरूपिताधिकरणताया निरवच्छिन्नाया अप्रसिद्धत्वादित्यन्वयव्याप्त्यैव निर्वाहसम्भवे व्यतिरेकव्याप्त्यङ्गीकारो नावश्यक इति चेन्न, केवलान्वयिन्यभावादित्यनेन पूर्वपक्षव्याप्तेर्दूषितत्वात् ।

अन्यच्च कपिसंयोग्येतद्वृक्षत्वादित्यत्र सद्धेतावतिव्याप्त्यभावेऽपि कपिसंयोगी गुणत्वादित्याद्यसद्धेतावव्याप्तिस्तत्राप्युक्तरीत्या कपिसंयोगाधिकरणताया निरवच्छिन्नाया अप्रसिद्धेः । व्यतिरेकव्याप्तिनिवेशे नायं दोषः, गुणत्वाभावस्य कपिसंयोगव्यापकत्वात् तत्प्रतियोगित्वस्य च गुणत्वे सत्त्वात् ।

इत्थञ्च साध्यव्यापकीभूताभावप्रतियोगित्वमिति विरुद्धलक्षणं सर्वसम्मतं फलितम्। तथा च हेतुमत्ताज्ञानसहकृतस्यैतज्ज्ञानस्य साध्याभावव्याप्यहेतुमत्ताज्ञानात्मकतया तदभावव्याप्यवत्तामुद्रया साध्यवत्तानुमितिविरोधित्वादस्य हेत्वाभासत्वम् ।

नन्वेवं सति तस्य सत्प्रतिपक्षाभेदस्तज्ज्ञानस्यापि साध्याभावव्याप्यवत्ताज्ञानात्मकत्वादिति चेन्न, यतो हि विरुद्धे

---

[1] त. चि., विरुद्धप्रकरणम् ।

[2] व्याप्तिपञ्चकमाथुरी, पृ. ११ (ठक्कुरश्रीकनकलालशर्मा-१९८२)


ISSN: 2249-538X

साध्यव्याप्यत्वेनाभिमत एव साध्याभावव्याप्तिमत्तानिश्चयः । सत्प्रतिपक्षे तु साध्याभावसाधकस्य हेत्वन्तरस्य कल्पना इति तयोर्भेदः ।

अपरञ्च विरुद्धे व्यतिरेकव्याप्त्यैव निर्वाहः, सत्प्रतिपक्षे तूभयथाऽपीत्यपि भेदः ।

साध्यासमानाधिकरणो हेतुर्विरुद्ध इत्यपि केचित् ।[1] तन्मते व्यापकसामानाधिकरण्यरूपव्याप्तिग्रहप्रतिबन्धकग्रहविषयत्वेनैवास्य हेत्वाभासत्वमिति नोक्तरीत्या सत्प्रतिपक्षाभेदापत्तिः ।

जयन्तभट्टेन – यो हेतुः साध्यनिश्चयार्थमुद्दिष्टस्य साध्यस्य साधको न भवति प्रत्युत विरोधी स विरुद्ध इति विरुद्धस्वरूपं वर्णितम् । अपरञ्च सपक्षावृत्तित्वे सति विपक्षवृत्तित्वे सति साध्याभावसाधकत्वमित्यपि तेन विरुद्धलक्षणं प्रोक्तम् ।[2] भासर्वज्ञेनापि तत्र पक्षवृत्तित्वे सतीति विशेषणान्तरं योजयित्वोक्तलक्षणमेव समर्थितम् ।[3]

भासर्वज्ञेन सपक्षसत्त्वे चत्वारः, सपक्षासत्त्वे च चत्वार इति रीत्या विरुद्धस्याष्टौ भेदाः स्वीकृताः ।

**सपक्षसत्त्वे यथा –**

१. पक्षविपक्षव्यापकः, यथा – शब्दो नित्यः कार्यत्वात् ।
२. विपक्षैकदेशवृत्तिः पक्षव्यापकः, यथा – शब्दो नित्यः, सामान्यवत्त्वे सति बहिरिन्द्रियजन्यप्रत्यक्षविषयत्वात् ।
३. पक्षविपक्षैकदेशवृत्तिः, यथा – शब्दो नित्यः प्रयत्नानन्तरीयकत्वात् ।
४. पक्षैकदेशवृत्तिर्विपक्षव्यापकः, यथा-पृथ्वी नित्या, कृतत्वात् ।

**सपक्षासत्त्वे यथा –**

१. पक्षविपक्षव्यापकः, यथा – शब्द आकाशविशेषगुणः प्रमेयत्वात् ।

---

[1] त. चि. विरुद्धप्रकरणम् ।

[2] न्यायमञ्जरी, पृ. १५६-१५८ (चौखम्भाप्रकाशनम्, वाराणसी – १९३६)

[3] न्यायसारः, पृ. ३५ ।


ISSN: 2249-538X

२. पक्षविपक्षैकदेशवृत्तिः, यथा – शब्द आकाशविशेषगुणः प्रयत्नानन्तरीयकत्वात् ।
३. पक्षव्यापकविपक्षैकदेशवृत्तिः, यथा – शब्द आकाशविशेषगुणः बाह्येन्द्रियग्राह्यत्वात् ।
४. विपक्षव्यापकपक्षैकदेशवृत्तिः, यथा – शब्द आकाशविशेषगुणोऽपदात्मकत्वादिति ।[1]

**सत्प्रतिपक्षः –**

विरोधिव्याप्तिपक्षधर्मवत्तया परामृश्यमाणो हेतुः प्रतिपक्षः, सन् प्रतिपक्षः सत्प्रतिपक्षः ।[2] यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्ष इति वदतोऽन्नम्भट्टस्याप्ययमेवाशयः ।[3] यथा – शब्दो नित्यः श्रावणत्वाच्छब्दत्ववत्, शब्दोऽनित्यः कार्यत्वाद् घटवदिति । नित्यत्वे साध्येऽनित्यत्वरूपतदभावसाधको हेतुः कार्यत्वरूपः, अनित्यत्वे च साध्ये तदभावसाधको हेतुः श्रावणत्वमिति तत्सत्त्वात्सत्प्रतिपक्षता । सत्प्रतिपक्षनिश्चयस्य साध्यानुमितिविरोधित्वं तु तदभावव्याप्यवत्तामुद्रया । पक्षे शब्दे नित्यत्वाभावव्याप्यकार्यत्वस्य नित्यत्वव्याप्यश्रावणत्वस्य च सत्त्वान्न नित्यत्वानित्यत्वानुमितिः। इत्थमेकपरामर्शस्यापरपरामर्शजन्यानुमितिविरोधितया कस्या अप्यनुमितेरजननादस्य हेत्वाभासता । अत एव सत्प्रतिपक्षो विरोधिपरामर्श इत्यपि व्याख्यायते ।[4] अत्र 'हेत्वन्तरम्' इति कथनेन विरुद्धाद् भेदः सिद्ध्यति, अन्यथा साध्यसाधकत्वेनाभीष्टस्यैव हेतोः साध्याभावसाधकत्वे विरुद्धादभेदः स्यात् ।

[1] तत्रैव, पृ. ३९-४० ।

[2] सत्प्रतिपक्षदीधितिः, पृ. १७८७ (त. चि.)

[3] त. सं., पृ. ४५ ।

[4] सत्प्रतिपक्षदीधितिः, पृ. १७८७ (त. चि.)


ISSN: 2249-538X

केशवमिश्रमतानुसारेणापि प्रतिपक्षीभूतहेत्वन्तरकस्यैव सत्प्रतिपक्षत्वम् ।[1]

"अगृहीताप्रामाण्यकसाध्यवत्त्वोपस्थितिकालीनागृहीताप्रामाण्यकसाध्याभावव्याप्यवत्त्वोपस्थितिविषयः सत्प्रतिपक्ष[2] इत्यस्याप्ययमेवाशयः ।

अत्रेयमाशङ्का- साध्यतदभावसाधकहेतुद्वयसत्त्वे द्विविधपरामर्शाभ्यां पक्षः साध्यवान्नवेत्याकारकानुमितिः कुतो न भवति । संशयाकारकानुमितेरस्वीकारे तु प्रमाणाभावः, स्थाणुर्वा पुरुषो वेति प्रत्यक्षस्येव संशयाकारानुमितेरङ्गीकारे बाधकाभावात् । एवं चक्षुः सन्निकर्षजन्यघट-वद्भूतलमिति बुद्धिं प्रति घटाभावव्याप्यवद्भूतलमिति बुद्धेर्न प्रतिबन्धकत्वम् । तथैव पित्तदोषजन्य-'पीतः शङ्खः' इति बुद्धिं प्रति पीतत्वाभावव्याप्यवान् शङ्ख इति बुद्धेर्न प्रतिबन्धकत्वम् । अतोऽभावव्याप्यवत्ताबुद्धेस्तद्वत्ताबुद्धिविरोधेऽपि मानाभाव इति **(रत्नकोषकारमतमिदम्)**।

अत्रेदं समाधानम् – लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिं प्रत्येव तदभाववत्ताबुद्धिस्तदभावव्याप्यवत्ताबुद्धिश्च प्रतिबन्धिका । इन्द्रियसन्निकर्षजन्या घटवत्ताबुद्धिर्न लौकिकसन्निकर्षाजन्या । तथैव पित्तदोषजन्या 'पीतः शङ्खः' इति बुद्धिर्न दोषविशेषाजन्येति नोक्तबुद्धिद्वयं प्रति तदभावव्याप्यवत्ताबुद्धेर्विरोधः । लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यवह्निमान् ह्रद इत्यनुमितिं प्रति तु वह्न्यभावव्याप्यवान् ह्रद इति बुद्धिः प्रतिबन्धिकाऽस्त्येवेति संशयाकारानुमित्युद्भवसम्भावनाऽपि नास्ति ।

अत्र परामर्शद्वयस्यापि समानबलत्वमावश्यकम् । एकस्याधिकबलत्वे तु तज्जन्यानुमितेरन्यपरामर्शेनाप्रतिबन्धादेकानुमित्युत्पादे हेत्वाभासता न स्यात्। अत एव **"साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गत्वं तत्त्वम्"**[3] अत एव इति मणिकाराः ।

[1] त. भा., पृ. ६१० ।

[2] न्या. सि. मु., का. स. ७१ ।

[3] त. चि., पृ. १७८७ ।


ISSN: 2249-538X

दीधितिकारस्तु साध्याभावव्याप्यवान् पक्षः सत्प्रतिपक्ष इत्युक्त्वा हेत्वन्तराभावेऽपि सत्प्रतिपक्षव्यवहारं स्वीकरोति । तथा च तन्मते सत्प्रतिपक्षस्य नित्यदोषता प्राचां मते त्वनित्यदोषतेति हृदयम् ।

**असिद्धिः –**

व्याप्यस्य हेतोः पक्षधर्मतया प्रतीतिः सिद्धिः, तदभावोऽसिद्धिरित्युदयनाचार्यैः असिद्धिलक्षणमुक्तम् ।[1] व्याप्तिविशिष्टस्य हेतोः पक्षतावच्छेदकविशिष्टवृत्तित्वाभावोऽसिद्धिरिति तदाशयः । तेन साध्याप्रसिद्धि-पक्षाप्रसिद्धि-स्वरूपासिद्धीनां सङ्ग्रहः ।

केशवमिश्रस्याप्ययमेवाशयः ।[2] विश्वनाथस्तु आश्रयासिद्ध्यान्यतमत्वमिति लक्षयति[3]। आश्रयासिद्धि- स्वरूपासिद्धि- व्याप्यत्वासिद्धिरूपत्रैविध्यप्रदर्शनमुखेनान्नम्भट्टोऽप्युक्तमेव लक्षणं समर्थयते ।[4]

तत्र पक्षाप्रसिद्धिवत्-साध्याप्रसिद्धि-हेत्वप्रसिद्ध्योरपि हेत्वाभासत्वम् । काञ्चनमयपर्वतो वह्निमान् इत्यत्र काञ्चनमयत्वाभाववत्पर्वतः पक्षाप्रसिद्धिः । पर्वतः काञ्चनमयवह्निमानित्यत्र काञ्चनमयत्वाभाववद्वह्निः साध्याप्रसिद्धिः । तथैव पर्वतो वह्निमान् काञ्चनमयधूमादित्यत्र काञ्चनमयत्वाभाववद् धूमो हेत्वप्रसिद्धिः, काञ्चमयपर्वत-काञ्चनमयवह्नि-काञ्चनमयधूमानामप्रसिद्धत्वात् । किन्तु पक्षाप्रसिद्धिः पृथग्दोषः, साध्याप्रसिद्धि-हेत्वप्रसिद्ध्योस्तु व्याप्यत्वासिद्धिमध्येऽन्तर्भावः । साध्यस्य हेतोर्वाऽप्रसिद्धत्वे तद्घटिताया व्याप्तेरप्यसिद्धिः, अतस्तयोर्व्याप्यत्वासिद्धावन्तर्भावः । पक्षस्य व्याप्त्यघटितत्वेन तदप्रसिद्धावपि न व्याप्त्यप्रसिद्धिरिति तस्य पृथग्दोषतेति ध्येयम् ।

स्वरूपासिद्धिस्तु हेतोः पक्षवृत्तित्वाभावः । यथा – शब्दो नित्यश्चाक्षुषत्वादिति । अत्र शब्दत्वावच्छेदेन चाक्षुषत्वं नास्ति ।

[1] न्यायवार्त्तिकतात्पर्यटीकापरिशुद्धिः (बिब्लियोथिका इण्डिका, कलकत्ता – १९११)

[2] त. भा., पृ. ५२८ ।

[3] न्या. सि. मु., का. सं. ७१ ।

[4] त. सं., पृ. ४५ ।

ISSN: 2249-538X

पृथिव्यादयश्चत्वारः परमाणवो नित्यगन्धवत्त्वादित्यत्र पक्षतावच्छेदक-सामानाधिकरण्येन नित्यगन्धाभाव इत्युभयथाऽपि स्वरूपासिद्धिः। द्वितीयस्तु भागासिद्धोऽप्युच्यते ।

हेत्वैकदेशाभाववत्पक्षोऽपि दोषः । सोऽयं द्विविधः – विशेषणासिद्धो विशेष्यासिद्धश्चेति । आदिमो यथा – शब्दो नित्यो द्रव्यत्वे सत्यस्पर्शवत्त्वादिति । अत्र पक्षे शब्देऽस्पर्शरूपविशेष्यस्य सत्त्वेऽपि विशेषणीभूतद्रव्यत्वस्यासत्त्वात्समन्वयः । द्वितीयो यथा – शब्दो नित्योऽस्पर्शवत्त्वे सति द्रव्यत्वादिति ।

उक्तावुभावप्यसमर्थविशेष्यासिद्धि - असमर्थविशेषणासिद्धिभेदाद् द्विविधः। तत्र प्रथमो यथा-शब्दो नित्योऽकारणत्वे सति गुणत्वादिति । अत्र विशेष्यीभूतस्य गुणत्वस्य नित्यत्वसाधनेऽसामर्थ्यादयं दोषः । द्वितीयो यथा – शब्दो नित्यो गुणत्वे सत्यकारणत्वादिति । अत्र विशेषणीभूतं गुणत्वं नित्यत्वसाधनेऽसमर्थमित्युक्तदोषः ।[1]

व्याप्यत्वासिद्धः सोपाधिको हेतुः ।[2] "व्याप्यत्वासिद्धस्तु यत्र हेतोर्व्याप्तिर्नावगम्यते"[3] इति वदतः केशवमिश्रस्याप्ययमेवाशयः । यत उपाधिर्नाम साध्यव्यापकत्वे सति साधनाव्यापकत्वम् । पर्वतो धूमवान् वह्नेरित्यत्रार्द्रेन्धनसंयोग उपाधिः । स च धूमव्यापको वह्न्यव्यापकश्च । उपाधियुक्तस्य च हेतोर्व्याप्तिमत्त्वं न भवति । उपाधिर्हि स्वव्यभिचारेण हेतोः साध्यव्यभिचारमनुमापयति–हेतुः साध्यव्यभिचारी साध्यव्यापकोपाधिव्यभिचारित्वात्, व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वनियमात् । इत्थं हेतौ साध्यव्यभिचारनिश्चये व्याप्तिग्रहः प्रतिबध्यते । अतोऽत्र व्याप्यत्वासिद्धिः ।

व्यर्थविशेषणघटितोऽपि हेतुर्व्याप्यत्वासिद्धः स्वीक्रियते ।[4] व्यर्थविशेषणघटितत्वञ्च स्वसमानाधिकरण-प्रकृतसाध्यव्याप्यतावच्छेदक-

---

[1] त. भा., पृ. ५९५-५९८ ।

[2] त. सं., पृ. ४७ ।

[3] त. भा.

[4] न्या. सि. मु., का. सं. ७७ ।


ISSN: 2249-538X

धर्मान्तरघटितत्वम्। पर्वतो वह्निमान् नीलधूमादित्यत्र स्वपदग्राह्यनीलधूमत्वसमानाधिकरणं प्रकृतसाध्य-वह्निव्याप्यतावच्छेदकधर्मान्तरं धूमत्वम्, तद्घटितत्वस्य नीलधूमत्वे सत्त्वादुक्तस्थले समन्वयः ।

मथुरानाथमतानुसारेण त्वाश्रयासिद्धिभिन्नत्वे सति स्वरूपासिद्धिभिन्नत्वे सति चासिद्धत्वं व्याप्यत्वासिद्धत्वम् । तद्विशेष्टो हेतुर्व्याप्यत्वासिद्धः । स च त्रिविधः –

१. साध्यविशेषणासिद्धः ।

२. साधनविशेषणासिद्धः ।

३. व्याप्तिविरहस्वरूपश्च ।

तत्र प्रथमौ साध्याप्रसिद्धि-हेत्वप्रसिद्धिरूपौ । साध्याप्रसिद्धि-साधानाप्रसिद्धि-स्वरूपासिद्धि-आश्रयासिद्धिभिन्नत्वे सत्यसिद्धत्वं तृतीयस्य लक्षणम् ।[1] घटः क्षणिको भावरूपत्वादित्युदाहरणं । गङ्गेशोपाध्यायमतानुसारेण तृतीये व्यर्थविशेषणादौ व्याप्तिविरहो दोषोऽस्ति ।[2] केषाञ्चिन्मते पक्षतावच्छेदकत्वाभाववत्पक्षतावच्छेदकस्य, साध्यतावच्छेदकत्वाभाव-वत्साध्यतावच्छेदकस्य, हेतुतावच्छेदकत्वाभाववद्धेतुतावच्छेदकस्य चाप्यसिद्धत्वं स्वीकृतमस्ति ।[3]

**बाधः –**

साध्याभाववत्पक्षो बाधः ।[4] ह्रदो वह्निमानित्यत्र वह्न्यभाववद्ध्रदो बाधः । भाष्यकृता शब्दो नित्यः संयोगव्यङ्ग्यत्वादिति मीमांसकस्वीकृतं स्थलं

[1] तत्त्वचिन्तामणिरहस्यम्, पृ. १८६४-१८६५ (मोतीलालबनारसीदासः, प्रतिमुद्रणम्, वाराणसी – १९७९)

[2] त. चि., पृ. १८६६ ।

[3] तत्रैव, पृ. १८६१ ।

[4] तत्रैव, पृ. १८८२ ।


ISSN: 2249-538X

बाधोदाहरणत्वेन प्रदर्शितम् ।[1] वाचस्पतिमिश्रेण बाधस्य त्रयो भेदाः प्रदर्शिताः – **(१)** प्रत्यक्षविरोधः**, (२)** अनुमानविरोधः**, (३)** आगमविरोधश्चेति । तत्राद्यो यथा – अग्निरनुष्णो द्रव्यत्वादिति । अनुष्णत्वमग्नौ प्रत्यक्षविरुद्धम् । द्वितीयो यथा – शब्दोऽश्रावणो गुणत्वादिति । अत्र शब्देऽश्रावणत्वमनुमानविरुद्धम् । तृतीयो यथा – नरशिरःकपालं शुचि प्राण्यङ्गत्वादिति । अत्र नरशिरः कपाले शुचित्वमागमविरुद्धम् ।[2]

भासर्वज्ञेन बाधस्य षड् भेदाः निर्दिष्टाः –

१. प्रत्यक्षविरुद्धः**,** यथा – अग्निरनुष्णः कार्यत्वात् ।

२. अनुमानविरुद्धः**,** यथा – परमाणुरनित्यो मूर्तत्वात् ।

३. आगमविरुद्धः**,** यथा – ब्राह्मणेन पेयं सुरादि**,** द्रवद्रव्यत्वात् क्षीरवत् ।

४. प्रत्यक्षैकदेशविरुद्धः**,** यथा – नित्याश्रयद्रवत्वरूपरसगन्धस्पर्शाः नित्याः**,** अप्रदेशवृत्तिसमानजात्यारम्भकत्वे सति परमाणुवृत्तित्वात्**,** तद्गतैकत्वादिवत् ।

५. आगमैकदेशविरुद्धश्च**,** यथा – सर्वेषां देवर्षीणां शरीराणि पार्थिवानि**,** शरीरत्वात्**,** अस्मदादिशरीरवत् ।[3]

गङ्गेशोपाध्यायेनास्य मुख्यतश्चत्वारो भेदा निरूपिताः –

१. धर्मिग्राहकबाधितः ।

२. साध्यप्रतियोगिग्राहकमानबाधितः ।

३. साध्यग्राहकमानबाधितः ।

४. हेतुग्राहकमानबाधितश्च ।[4]

एतेषां नैक उपभेदाः सन्ति**,** तद्विषये विस्तरभयादत्र न किमपि विव्रियते।

---

[1] न्या. भा., पृ. ३८८-३८९ ।

[2] न्यायवार्तिकतात्पर्यटीका, पृ. ३८८ ।

[3] न्यायसारः, पृ. ४५-४६ ।

[4] त. चि., पृ. १९२५ ।



ISSN: 2249-538X

यत्र यो दोषस्तद्व्याप्योऽपि तत्र स एव दोषो बाधसत्प्रतिपक्षौ विहाय । तथा च धूमाभाववद्वृत्तित्ववद्वह्निरिव धूमाभाववद्वृत्तित्वव्याप्यवद्वह्निरपि व्यभिचारः। एवमन्यत्रापि बोध्यम् । किन्तु सत्प्रतिपक्षस्थले वह्न्यभावव्याप्यव्याप्यवद्ध्रदस्य न सत्प्रतिपक्षत्वं किन्त्वलक्ष्यत्वं, तज्ज्ञानस्याप्रतिबन्धकत्वात् । वह्न्यभाववद्ध्रदस्येव वह्न्यभावव्याप्यवद्ध्रदस्य न बाधत्वमपि त्वतिरिक्तदोषत्वम् **(सत्प्रतिपक्षत्वम्)** अत्र प्रमाणं तु नियोगपर्यनुयोगानर्हा मुनेः स्वतन्त्रेच्छैव ॥

**********



ISSN: 2249-538X

# अन्विताभिधानवादः

आचार्यः मधुसूदनन्

वाक्यार्थबोधसरणौ प्रक्रियाद्वयं प्रसिद्धम्, अभिहितान्वयवादः, अन्विताभिधानवादश्चेति। तत्राद्यः कुमारिलभट्टादृतः, अपरश्च प्रभाकर-गुरुसम्मतः । तयोरेवान्यतरमवलम्ब्य इतरे दार्शनिकाः शाब्दबोधं वर्णयन्ति । उदयनाचार्याः गङ्गेशोपाध्यायाश्च परमन्विताभिधानवादनिरसनपूर्वकम-भिहितान्वयवादमातिष्ठमाना अपि भाट्टाभिमतविलक्षणमेव तं निरूपयन्ति । अन्विताभिधानवादश्च प्रकरणपञ्चिकादिषु विस्तरेण समर्थितोऽपि उच्चावचयुक्तिप्रदर्शनेन नानादर्शनग्रन्थेषु आदृतः । तदत्र स्वमतिशुद्धये प्राभाकरमीमांसकेष्टान्विताभिधानप्रकारः सङ्गृह्य प्रस्तूयते ।

वाक्यघटकपदेभ्यः अभिहितैः पदार्थैः आकाङ्क्षादिसहकृतैः वाक्यार्थबोधोजायते । तत्र च न पदं करणम् , पदार्थाभिधाने चरितार्थत्वात् , किन्तु पदार्था एव ज्ञायमानाः, अन्वयव्यतिरेकसद्भावात् इति अभिहितान्वयवादः। तन्न रोचयन्ते प्राभाकराः - तथाहि वृद्धव्यवहारेण शक्तिग्राहकप्रमाणमूर्धन्येन पदानामन्वितार्थे आनुभाविकी शक्तिः इतरान्वितार्थानुभवजनकत्वरूपा सिद्ध्यति । उत्तमवृद्धेन प्रयुक्तं गामानयेतिवाक्यं श्रुतवतःमध्यमवृद्धस्य गवानयने प्रवृत्तिं पश्यन् व्युत्पित्सुःप्रवृत्तिहेतुज्ञानस्य वाक्यजन्यत्वमनुमाय एवमसकृत्प्रयोगेन गामानयेति वाक्यस्य गोकर्मकानयने वाक्यार्थे सम्मुग्धां व्युत्पत्तिं लभते । ततश्च आवापोद्वापाभ्यां गोपदस्यार्थान्तरान्वितसास्नादिमदर्थे प्रत्येकं शक्तिं गृह्णाति इति । तदुक्तम् –

पदैरेवान्वितस्वार्थमात्रोपक्षीणशक्तिभिः ।
स्वार्थाश्चेत् बोधिता बुद्धो वाक्यार्थोऽपि तथा सति ॥ इति ।

किञ्च "धर्मिकल्पनातो वरं धर्मकल्पना" इति न्यायेन अक्लृप्तायाःपदार्थानां वाक्यार्थावगमशक्तेः कल्पनापेक्षया सम्प्रतिपन्नायाः पदानामभिधानशक्तेरन्वय-


ISSN: 2249-538X

पर्यन्तामात्रकल्पना लघीयसी । किञ्च प्रथमश्रुतानि पदानि अतिलङ्घ्य पदार्थेषु अनन्तरमवगम्यमानेषु वाक्यार्थबोधनशक्तिस्वीकारोऽयुक्तः । किञ्च सर्वे पुमांसः स्वाभिमतमर्थमभिधातुमेव पदानि प्रयुञ्जते । पदानां घटादिमात्रविषयक-बुद्धिजनकत्वे पदार्थबुद्धेरुद्बुद्धसंस्कारजन्यत्वेन स्मृतित्वात् अभिधायक-त्वानुपपत्तिः। अतः प्रागननुभूतार्थबोधजनकत्वे एव तदुपपत्त्या अन्विातार्थाभि-धायकत्वं पदानामवर्जनीयम् । किञ्च वाक्यार्थस्य शाब्दत्वोपपत्तये वाक्यस्य वाक्यार्थप्रतिपत्तौ तात्पर्यस्यावश्यकतया शब्दाभिहितपदार्थजन्यज्ञानविषयत्वेन परम्परयाशब्दप्रयोज्यत्वात् वाक्यार्थस्य शाब्दत्वोपगमे शब्दग्राहकश्रोत्रस्यापि वाक्यार्थबोधप्रयोजकत्वेन वाक्यार्थस्य श्रोत्रत्वस्यापि स्वीकारापत्त्या पदानां साक्षात् वाक्यार्थबोधजनकत्वशक्तिस्वीकार एवोचितः । तदुक्तं प्रकरणपञ्चिकायाम्-

प्राथम्यादभिधातृत्वात् तात्पर्योपगमादपि ।
पदानामेव सा शक्तिः वरमभ्युपगम्यताम् ॥ इति ॥

अपि चपदानामन्वितार्थे शक्त्यनभ्युपगमे सामान्यज्ञानरूपकारणा-भावात् अन्वयविशेषजिज्ञासा नोपपद्यते । अन्वयसामान्यज्ञानस्य शब्दादन्यतोऽसम्भवात् । एवं भूतलं घटवदित्यादिप्रत्यक्षप्रमेयाणां भूतलादीनां चक्षुरादिप्रमाणेन सम्बन्धनियमदर्शनात् प्रमाणानां स्वप्रमेयसम्बद्धानामेव प्रमेयावभासकत्वमिति नियमसिद्धेः वाक्यार्थे प्रमेये शब्दरूपप्रमाणस्य सम्बन्धाभावे तदवभासकत्वानुपपत्तेः अनुभावकत्वरूपसम्बन्धः आवश्यकः । तस्मात् पदानामन्विते एव शक्तिः सिद्ध्यति ।

न च सर्वं ज्ञानं यथार्थमिति वादिनां गुरूणां मते अन्यथाख्यातिर्नाङ्गीक्रियते । शुक्तौ 'इदं रजतम्' इति भ्रमस्थले पुरोवर्तिविशेष्यकरजत्वप्रकारकज्ञानं न स्वीक्रियते । किन्तु पुरोवर्तिग्रहणरजतस्मरणात्मकज्ञानद्वयमेव । इष्टरजतभेदाग्रहाच्च रजतार्थिनः प्रवृत्तिनिर्वाहः विशिष्टज्ञानं विनैव । इत्थं च तन्मते व्यवहारेण तत्कारणतया


ISSN: 2249-538X

संसृष्टार्थज्ञानानुमानासम्भवात् कथं व्यवहारात् अन्वितार्थे शक्तिग्रहसम्भवः इति वाच्यम्। विसंवादिप्रवृत्तौ इष्टभेदग्रहस्य कारणत्वेऽपि संवादिप्रवृत्तौ संसृष्टार्थज्ञानस्यैव कारणतोपगमात् संवादिमध्यमवृद्धप्रवृत्त्या संसृष्टार्थज्ञानानुमानोपपत्तेः ।

न चाभिहितान्वयवादवत् अन्विताभिधानवादेऽपि शक्तित्रयकल्पनासत्त्वात् न लाघवम् । अभिहितान्वयवादे हि पदानां पदार्थाभिधानशक्तिः, पदार्थानां वाक्यार्थावगमशक्तिः, पदानां पदार्थगतवाक्यार्थावगमशक्त्याधानशक्तिरिति यथा शक्तित्रयं कल्पनीयम्, तथा अन्विताभिधानवादेऽपि पदानां स्वार्थस्मारकशक्तिः, तेषामेव अन्वितानुभवजननशक्तिः, एकस्मृत्यारूढानामेव सर्वेषां पदानामन्वितानुभवजनकत्वेन तावत्पदविषयकस्मरणे पदगतान्विताभिधानशक्तिरिति शक्तित्रयं कल्पनीयमेवेति वाच्यम् ।

अभिहितान्वयवादे शक्तिपञ्चकस्यावकश्यकत्वेन गौरवात् । तथाहि तन्मते पदैः सर्वैरनन्वितस्वार्थाभिधाने जाते तावत्पदार्थविषयकस्मरणे सति एकस्मृत्यारूढेभ्यः एव पदार्थेभ्यः वाक्यार्थप्रतिपत्तेरङ्गीकरणीयतया पदे स्वार्थाभिधानशक्तिः, स्वार्थस्मरणशक्ति: पदार्थगतवाक्यार्थावगमाशक्त्याधानशक्तिः, पदार्थे वाक्यार्थावगमशक्तिः, तावत्पदार्थविषयकस्मरणे पदार्थगतवाक्यार्थागमशक्त्याधानशक्तिश्चेति शक्तिपञ्चकं कल्पनीयम् । अन्विताभिधानवादे तु शक्तित्रयमेवेति लाघवमक्षुण्णमेव । अत्र

तेऽपि नैवास्मृतायस्मात् वाक्यार्थं गमयन्ति नः
तस्मात् तत्स्मरणेष्वेव संहतेषु प्रमाणता ॥
इति वार्तिकमनुसन्धेयम् ।

अथ पदश्रवणं विनाऽपि पदार्थैरेव केवलं वाक्यार्थबोधदर्शनात् पदार्थेषु वाक्यार्थावगम शक्तेः क्लृप्तत्वेन अकल्पनीयतया पदाभिहितैरेव पदार्थैरन्वयः गम्यते इति नियमाभावात् पदेषु पदार्थगतशक्त्याधानगतशक्तेः अकल्पनीयतया चाभिहितान्वयवादेऽपि शक्तित्रयकल्पनैव । दृश्यते हि प्रत्यक्षितस्य श्वैत्यस्य


ISSN: 2249-538X

अगृहीताश्रयविशेषस्य, हेषाशब्दानुमितस्य अश्वस्य अगृहीतगुणविशेषस्य, खुरनिक्षेपशब्दानुमितस्य धावनस्य अगृहीतकर्तृविशेषस्य चार्थस्य श्वेतोऽश्वोधावतीति वाक्यार्थावगमकत्वम् । काव्यरचनाहेतुभूतवाक्यार्थबुद्धिं प्रति चिन्तोपनीतपदार्थेषु कारणत्वस्य दर्शनेन पदार्थानां संसर्गावगमसामर्थ्यस्य क्लृप्तत्वादिति चेत्,

न, पदश्रवणं विना पदार्थमात्रेण 'श्वेतोऽश्वो धावति' इति वाक्यार्थबोधासम्भवात् श्वैत्याधिकरणे हेषाध्वनेः खुरनिक्षेपस्य चावगतौ श्वेतोऽयमश्वः हेषाशब्दवत्त्वात् इत्यनुमानेनैवाश्वप्रतीतेः । श्वैत्यस्य हेषाशब्दस्य खुरनिक्षेपशब्दस्य च समानाधिकरण्यग्रहविरहे तु अश्वातिरिक्तद्रव्यस्याभाव-निश्चये सति अर्थापत्त्यैव 'श्वतोऽश्वो धावति' इति प्रतीति सम्भवात् । द्रव्यान्तराभावनिश्चयविरहे च तादृशप्रतीतेरेवानुदयात् । काव्यरचनाहेतुभूतस्य पदार्थसंसर्गज्ञानस्य मानसत्वोपगमेन शाब्दत्वाभावात् पदार्थस्य वाक्यार्थावगमसामर्थ्यस्याक्लृप्तत्वेन कल्पनायाः आवश्यकत्वात्त् ।

न च पदानामन्वितार्थानुभावकत्वं न सार्वत्रिकम्, 'को गच्छति' 'राजा गच्छति' इत्यादौ,कविकृतस्वभाववर्णनादौ च कार्यतावाचकलिङाद्यभावेन कार्यान्वितार्थबोधजनकत्वस्यासम्भवात् प्रत्युत पदार्थानामेवान्वयबोधजनन-सामर्थ्यात् इति वाच्यम् ।

व्यवहारेण कार्यान्वितार्थे एव शक्त्यवधारणात् उपजीव्यविरोधभयेन कार्यांशस्य अत्यागेन सर्वत्र कार्यान्वितविषयकशाब्दबोधस्यैवोपगमात् । कार्यतावाचकं लिङादिकं यत्र न श्रूयते तत्रापि लिङादिपदमध्याहृत्यैव बोधोपपादनात् । अन्ततः जानीहि इत्यादियोग्यार्थपदाध्याहारस्य सर्वत्र सम्भवात् सर्वत्र कार्यान्वितार्थानुभावकत्वस्य एवोपगमात् ।

न चैवं लिङादौ व्यभिचारः, तस्य कार्याभिधायित्वेन कार्यान्वितार्थाभिधायित्वाभावात्। यदि च कारकान्वितस्वार्थाभिधायित्वमिष्यते, तर्हि कारकपदेषु व्यभिचारः इति वाच्यम्। कार्यान्वितस्वार्थाभिधायित्वस्य


ISSN: 2249-538X

कार्यत्वघटितार्थाभिधायित्वरूपत्वे दोषाभावात्। कार्यत्वाविषयकप्रतीत्य-विषयत्वरूपस्य कार्यत्वघटितत्वस्य कार्यत्वेऽपि सत्त्वेन तदभिधायकलिङादौ व्यभिचारानवकाशात् । कारकान्वितस्वार्थाभिधायित्वपक्षेऽपि कारकान्वितत्वस्य कारकघटितत्वरूपस्य कारकेऽपि सत्त्वेन कारकपदे व्यभिचारविरहात्।

न चैवमपि अन्वयविशिष्टे शक्तिस्वीकारे विशेषणे विशेष्ये च शक्तिरावश्यकीति गौरवं दुर्वारम् इति वाच्यम् । यथा आकारिणं विना आकारस्य प्रतीतेरसम्भवात् जातिशक्तपदाधीनज्ञाने व्यक्तेरपि भानम् , यथा च नैयायिकमते घटत्वतदाश्रयतद्वैशिष्ट्येषु त्रिषु एका शक्तिः, तथैव अन्वयविशिष्टेशक्तिस्वीकारेऽपि नान्वये पृथक् शक्ति कल्पनमित्यदोषात् । तदुक्तम् –

अन्वितेषु पदैरेव बोध्यमानेषु शक्तिभिः ।
अन्वयोऽर्थगृहीतत्वात् नान्यां शक्तिमपेक्षते ॥ इति ॥

अन्वयांशे पृथक् शक्तेः अकल्पनादेव यत्र त्रयाणां पाणिहस्तकरशब्दानाम् एकोऽर्थः, तत्र अन्विताभिधानवादे त्रयाणां पदानां अन्वितार्थे अन्वये च पृथक् शक्तिद्वयकल्पनापत्त्या शक्तिषट्कं कल्पनीयमिति गौरवमिति शङ्काऽपि अपाकृता । त्रयाणां पदानाम् अन्वितार्थे शक्तित्रयस्यैव कल्पनेनलाघवस्य अनपायात् ।

अथैवमपि प्रतियोग्यानन्त्यकृतान्वयानन्त्यात् विशेषतः अनन्तान्वितेषु पदानां सम्बन्धग्रहणस्य अशक्यत्वात् अन्विताभिधानमनुपपन्नम् । एवं पदान्तरानभिहितार्थान्वितार्थस्य पदेन अभिधाने पदान्तरवैयर्थ्यापत्तिभिया पदान्तराभिहितार्थान्वितार्थाभिधानस्यैव स्वीकार्यतया अन्योन्याश्रयो दुर्वारः । प्रथमपदेन अन्वितस्वार्थाभिधानाय द्वितीयपदकर्तृकाभिधानस्य द्वितीयपदेन अन्वितस्वार्थाभिधानाय प्रथमपदकर्तृकाभिधानस्य चापेक्षणात् ।किञ्च पदानां सर्वेषामितरान्वितवाचकत्वे वाक्यार्थभेदप्रयुक्तवाक्यभेदः दुष्परिहरः इति चेत्,

अत्राहुः –


ISSN: 2249-538X

आकाङ्क्षासन्निधिप्राप्तयोग्यार्थान्तरसङ्गतान् ।
स्वार्थानाहुः पदानीति व्युत्पत्तिः संश्रिता यदि ॥
आनन्त्यव्यभिचाराभ्यां तदा दोषो न कश्चन ।

इत्युक्ते: आकाङ्क्षासन्निधियोग्यत्वानां व्युत्पत्तौ उपलक्षणत्वाङ्गीकारेण आकाङ्क्षितं सन्निहितं योग्यञ्च यत् पदार्थान्तरं तदन्विते शक्तिग्रहसम्भवात् न दोषः ।

किञ्च पदेन अन्विताभिधाने अन्वयप्रतियोग्युपस्थितेर-पेक्षिततया संहतानामेव पदानामन्विताभिधायकत्वम्। न एकस्य पदस्य। पदश्रवणसमनन्तरमनन्वितस्वार्थस्मरणस्यैवोपगमात् । व्यवहारेण संसृष्टे एव शक्तिग्रहणेऽपि अनन्वितांशमात्रस्मरणोपपत्तेः। विशिष्टानुभवेनापि अभ्यासातिशयप्रयुक्तसंस्कारातिशयरूपकारणवशात् स्वार्थस्वरूपमात्रस्मरण-जननस्य लोके दर्शनात् । एवं च एकैकपदश्रवणानन्तरमनन्विततत्तदर्थस्मरणे सति एकस्मृत्यारूढेभ्यः पदेभ्यः आकाङ्क्षितसन्निहितयोग्यार्थान्तरान्वितार्थो-प्रतीतिः जायते इति नान्योन्याश्रयः । घटकर्मकानयनरूपस्य संसृष्टार्थस्य एकस्यैव वाक्यार्थस्य प्रतीतेर्न वाक्यभेदोऽपि । एकयैव दर्शनशक्त्या घटपटादिदर्शनाख्यकार्यभेदजनकचक्षुर्वत् शब्दोऽपि एकयैव आकांक्षितयोग्यसंनिहितगोचरया शक्त्या तत्तत्प्रतियोगिबोधाख्यकार्यभेदहेतुरिति न अन्वितानन्त्यप्रयुक्तं शक्त्यानन्त्यम् , न वा व्युत्पत्तेरशक्यता ।

यच्च शाबरभाष्योक्तं 'पदानि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि । अथेदानीं पदार्थाः अवगताः सन्तः वाक्यार्थमवगमयन्ति' इति , तन्न वाक्यार्थावगमस्य पदार्थकरणकत्वाभिप्रायकम् । पदानामन्विताभिधायित्वे अन्वयप्रतीत्युपपत्तये अन्वयेऽपि शक्त्यन्तरं कल्पनीयमिति शङ्कापरिहाराय प्रवृत्तस्य तस्य अन्वयं विना अन्विताभिधानासम्भवात् अन्वयबोधस्यावर्जनीयतया अन्वये अन्वितार्थनिमित्तकत्वाभिप्रायकत्वात् । तत्र हि भाष्ये वाक्यार्थपदेन अन्वयः अर्थशब्देन अन्वितार्थश्च विवक्षितः । तथा च


ISSN: 2249-538X

पदानि अन्वितमर्थमभिधाय निवृत्तव्यापाराणि भवन्ति, नान्वयं पृथगभिदधति । अथेदानीं पदार्थाः – अन्विताार्थाः अवगताः सन्तः वाक्यार्थम् अन्वयम् अवगमयन्ति । पदानामन्वितप्रतिपादकत्वनिमित्तकमन्वयप्रतिपादकत्वमिति पर्यवासितार्थः । 'अर्थस्य तन्निमित्तत्वात्' इति जैमिनिसूत्रस्याप्येवमेव निर्वाहः इति सिद्धमन्विताभिधानवादे सर्वसामञ्जस्यम् ।

अन्वितोक्तिमतोक्तानामनुवक्तुर्ममेह यत् ।
अनन्वितं तत् क्षन्तव्यमनुग्रहपरैर्बुधैः ॥

**********


ISSN: 2249-538X

# शक्तिविमर्शः

डा. नवीन होळ्ळः

मीमांसकाः शक्तित्रैविध्यमभ्युपगच्छन्ति, सहजशक्तिः आधेयशक्तिः पदशक्तिः इति । तत्र सहजशक्तिः वह्न्यादिनिष्ठा दाहादिकार्यानुकूला । आधेयशक्तिः प्रोक्षणादिजन्या व्रीह्यादिनिष्ठा, कामिनीचरणाघातादिजन्या अशोकादिवृक्षनिष्ठा, कांस्यपत्रादौ भस्मसंयोगादिजन्या शुद्धिपर्याया । पदशक्तिश्च तत्तदर्थनिरूपिता तत्तत्पदनिष्ठा । तत्र स्वसमवायिसहोत्पन्नत्वं सहजत्वम् । उत्पन्ने समवायिनि मन्त्राद्यधीनत्वमाधेयत्वम् । नैय्यायिकाः पुनः कार्यसमाप्तिं प्रति प्रतिबन्धकाभावस्य कृल्प्तकारणतयैव चन्द्रकान्तमणिसमवहितवह्निस्थले दाहानुत्पादम् उपपादयन्तः अतिरिक्तां सहजशक्तिं निराकुर्वन्ति । एवं शाब्दबोधौपयिकस्य पदपदार्थयोः सम्बन्धस्य क्लृप्तेश्वरेच्छारूपतामुपगम्य अतिरिक्तां पदशक्तिमपि अपाकुर्वन्ति । प्रकृते आधेयशक्तेः अतिरिक्ततोपगमे तदनुपगमे च साधकबाधकप्रमाणानि परिशील्यन्ते ।

अत्रायं विवेकः - प्रोक्षणादिना संस्कारो व्रीहिष्वेव जायते, नात्मनि । स च संस्कारः अतिरिक्तः शक्तिविशेष एवेति वस्तुसंस्कारपक्षः मीमांसकानाम् । व्रीह्यादीनां प्रोक्षणेन यजमानात्मनि संस्कारो जायते । स नातिरिक्तपदार्थः इति पुरुषसंस्कारपक्षः नैय्यायिकानाम् ।

**आधेयशक्तिनिरूपणम्** – आधेयशक्तिस्वीकारावश्यकः। तथा हि 'व्रीहीन् प्रोक्षति, व्रीहीनवहन्ति' इत्यादिश्रुतिवाक्यस्थले प्रोक्षणजन्यः कालान्तरभाव्यवघातजनको व्रीहिनिष्ठः कश्चित्संस्कारविशेषः कल्प्यते । 'प्रोक्षिता एव व्रीहयोऽवघाताय कल्पन्ते' इति वाक्यशेषात् । तत्र प्रोक्षणादिना यदि व्रीह्यादौ संस्कारो न स्वीक्रियते तदा 'व्रीहीनवहन्ति' इत्यादिवाक्यविहितावघातविधिकाले चिरध्वस्तस्य स्वरूपेणाऽवर्तमानस्य


ISSN: 2249-538X

प्रोक्षणस्य अप्रोक्षितव्रीह्यादिव्यावर्तकत्वासम्भवात् अप्रोक्षितानामपि व्रीहीणामवघातापत्तिः स्यात्प्रोक्षणविधिश्च व्यर्थो भवेत् । प्रोक्षणस्य व्रीह्यादौ संस्कारजनकत्वस्वीकारे तु व्रीहिसमवेतस्य संस्कारस्य अवघातकालेऽपि सम्भवेन प्रोक्षणस्य व्यावर्तकत्वमुपपद्यते । ततश्च प्रोक्षणविधिरपि सार्थकः ।

तथा चानुमानप्रयोगः – प्रोक्षणं व्रीहिनिष्ठातिशयजनकं व्रीहिनिष्ठफलार्थितया क्रियमाणत्वात् । यत् यद्गतफलार्थितया क्रियते तत् तत्र अतिशयजनकं, यथा पुरुषनिष्ठस्वर्गरूपफलार्थितया क्रियमाणः यागादिः पुरुषनिष्ठातिशयजनकः इति।

एवं प्रोक्षणं व्रीहिनिष्ठातिशयजनकं कालान्तरभाविफलाय व्रीह्युद्देशेन क्रियमाणात्वात् । यत् कालान्तरभाविफलाय यदुद्देशेन क्रियते तत् तन्निष्ठातिशयजनकं, यथा पुत्रोद्देशेन क्रियमाणं चूडादि इति । एवं विनिगमनाविरहेणापि व्रीहिषु अन्यत्रापि भूतेषु अतिशयः सिध्यति । तथा हि यागादिजन्यं कालान्तर्भाविभोगानुकूलम् अदृष्टं पुरुषे एव समवैति, न तु शरीरेन्द्रियादिषु भूतेषु इत्यत्र विनिगमकाभावात् शरीरेन्द्रियादिभूतेषु समवेतम् अदृष्टं स्यात् ।

**<u>आधेयशक्तिनिराकर्तृमतेबाधकयुक्तयः</u>**

१. व्रीहिषु संस्कारोत्पत्त्यनुपगमे प्रोक्षणविधानस्य वैयर्थ्यप्रसङ्गः । प्रोक्षितेष्वपि व्रीहिषु कालान्तरभाव्यवघातोत्पत्तिपूर्वक्षणे प्रोक्षणक्रियायाः तज्जन्यसंस्कारस्य चाभावेन प्रोक्षितव्रीहीणाम् अप्रोक्षितव्रीहिभिः अविशेषात् ।

२. प्रोक्षणोपलक्षितव्रीहीणामेव अवघातविधानं न तु प्रोक्षणविशिष्ट-व्रीहीणामित्युपगमे प्रोक्षणविधानसार्थक्यसम्भवेऽपि अवघातसंस्कारयोः संस्कारप्रोक्षणयोश्च कार्यकारणभावे व्यभिचारः दुर्वारः । अवहन्यमानेषु व्रीहिषु संस्कारस्य विरहात् । संस्कारवति आत्मनि प्रोक्षणस्य विरहात् ।


ISSN: 2249-538X

३. व्रीह्यादिषु संस्कारस्य शक्तिविशेषशात्मकस्य अनुपगमे 'व्रीहिबीजात् व्रीह्यङ्कुर एव न यवाद्याङ्कुर, यवबीजाद् यवाङ्कुर एव न व्रीह्याद्यङ्कुर' इति नियमस्यानुपपत्तिः । तथा हि – बीजनाशोत्तरमेव अङ्कुरोत्पादात् व्रीह्याङ्कुरोत्पत्तिपूर्वक्षणे व्रीहिबीजं न भवति । व्रीह्यारम्भकपरमाणूनां सत्त्वेऽपि तत्र व्रीहित्वजातिर्न भवति । द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वे मानाभावात् । तथा च व्रीहिबीजोपमर्दोत्तरकाले उत्पद्यमानस्याङ्कुरस्य व्रीहिजातीयत्वे नियामकाभावप्रसङ्गः । शक्तिवादिमते तु व्रीह्यारम्भकपरमाणुषु व्रीहित्वविरहेऽपि कृष्यादिना विलक्षणशक्तिः व्रीह्यङ्कुररूपकार्यविशेषोत्पादनानुकूल आधीयते । ततो विलक्षणैव शक्तिः यवाङ्कुरारम्भकपरमाणुषु आधीयते इति कार्यविशेषारम्भनियम उपपद्यते ।

४. पाकरहितेषु द्रव्येषु जलतेजोवायुषु कार्यविशेषनियमस्य अनुपपत्तिः दुर्वारा। तथा हि – केचिज्जलीयाः परमाणवो नदीतडागादिषु उद्भूतद्रवत्वं जलमारभन्ते, केचित्तु अनुद्भूतद्रवत्वं कठिनं करकादिकमारभन्ते । केचित्तैजसाः परमाणवः उद्भूतस्पर्शमुद्भूतरूपं प्रदीपमारभन्ते, केचित् अनुद्भूतरूपमुद्भूतस्पर्शं ग्रीष्मोष्मादिकमारभन्ते, केचित्पुनरनुद्भूतरूप-मनुद्भूतस्पर्शं चक्षुरिन्द्रियं चारभन्ते। जलीयत्वाविशेषेऽपि रसनादीनामेव रसादिग्राहित्वमनुद्भूतं रूपं च नाऽन्यजलादेः । तेजस्त्वाऽविशेषेऽपि चक्षुःपरप्रकाशकम् आलोकादयः स्वपरप्रकाशकाः उष्माद्यप्रकाशकं । क्वचिद्वायौ उद्भूतस्पर्शः क्वचित् त्वगिन्द्रिये अनुद्भूतः स्पर्शः । क्वचिद्वायौ स्तैमित्यमन्यत्र[1] सदागतिमत्वम् । सर्वमिदं शक्तिभेदं विना अनुपपन्नम् । शक्तिवादिमते तु यत्र शक्तिविशेषस्तत्रोद्भूतानुद्भूतरूपादिकं जायते ।

५. पार्थिवेषु पुनः प्रतिमादिषु शक्तिविशेषरूपस्य संस्कारस्यास्वीकारे प्रतिष्ठोत्तरं पूजनादिना धर्मोत्पत्तिः, अपूजनादिना अधर्मोत्पत्ति, प्रतिष्ठापूर्वं तु

[1] स्तैमित्यम् – निश्चलत्वम्


ISSN: 2249-538X

नैवम् इति नियमस्यानुपपत्तिः । न च तत्र प्रतिष्ठासंस्कृतत्वमेव पूजानमस्कारादिजन्यं धर्मं प्रति, तदभावजन्यमधर्मं प्रति च प्रयोजकमिति वाच्यम् । प्रतिष्ठाक्रियायाश्चिरं नष्टत्वात् ततः परं तस्याः प्रतिमायाः अप्रतिष्ठिताविशेषात्। ननु प्रतिष्ठादिजनितेन प्रतिष्ठापकयजमानात्म-समवेतेनैव धर्मेण सहकृतः पूजादिविधिर्धर्मं तदभावश्च अधर्मं जनयति । ततश्च न प्रतिमादावतिशयोऽङ्गीकार्य इति चेन्न । प्रतिष्ठापकादृष्टस्य पूजनप्रणामादिकर्त्रस्मदिष्टादिहेतुत्वासम्भवात् । अन्यादृष्टस्य अन्यफलहेतु-त्वाभावात् । क्वचिदन्यधर्मस्य अन्यधर्मं प्रत्युपयोगाङ्गीकारे नियामकाभावात् सर्वस्य धर्माधर्मजातस्य सर्वपुरुषसाधारण्यप्रसङ्गात् । न च प्रतिष्ठाक्रियाजनितं प्रतिष्ठापकपुरुषात्यत्मत्समवेतं यददृष्टं स्वाश्रयसंयुक्तत्व-सम्बन्धेन तद्विशिष्टा प्रतिमा धर्माधर्महेतुरिति वाच्यम् । आत्मनो विभुत्वेन सर्वमूर्तद्रव्यसंयोगित्वेन स्वाश्रयसंयुक्तत्वसम्बन्धेन प्रतिष्ठापकपुरुषात्म-समवेतस्य अदृष्टस्य अप्रतिष्ठितास्वपि प्रतिमासु सत्त्वात् तासामपि पूजातद्व्यतिक्रमाभ्यां धर्माधर्मौ स्याताम् । एवं प्रतिमायाः प्रतिष्ठोत्तरं चाण्डालादिस्पर्शेऽपि प्रतिष्ठापकादृष्टसत्वात् तस्याः प्रतिष्ठितचाण्डालाद्य-स्पृष्टप्रतिमया साधारण्यप्रसङ्गात् पूजातद्व्यतिक्रमाभ्यां धर्माधर्मोत्पत्तिप्रसङ्गात्। किञ्च प्रतिष्ठाकर्तरि मुक्ते तददृष्टनाशात् तस्याः प्रतिमायाः अप्रतिष्ठितप्रतिमया साधारण्यप्रसङ्गात् तस्याः पूजातद्व्यतिक्रमाभ्यां धर्माधर्माजननप्रसङ्गात् ।

६. भोगसाधनेषु शरीरेन्द्रियस्रक् चन्दनादिविशेषेषु अदृष्टरूपः संस्कारविशेषो यदि न स्वीक्रियते तदा अस्य पुरुषस्य इदमेव स्रक् चन्दनादि भोग्यमिति भोगनियमो न स्यात् । तथा हि- यागकर्तुः पुरुषविशेषस्य स्वर्गरूपसुखविशेषसाक्षात्कारात्मकभोगं प्रति शरीरेन्द्रियस्रक् चन्दनादि-विशेषा एव हेतवो भवन्ति अतस्तेष्वेव यागजन्यः अदृष्टरूपह् संस्कारविशेषः स्वीकार्यः। अर्थाद् यच्छरीरं, यानि इन्द्रियाणि, यानि स्रक् चन्दनादीनि यस्य यागकर्तुः


ISSN: 2249-538X

पुरुषविशेषस्य यागजन्यादृष्टजन्यानि भवन्ति तान्येव तस्यैव भोगकारणानि भवन्ति न सर्वाणि । तथा च तेषु शरीरेन्द्रियस्रक् चन्दनादिविशेषेष्वेव भोगकारणतावच्छेदकः अदृष्टरूपः संस्कारविशेषः स्वीकार्यस्तस्यैव स्वर्गजनकत्वसम्भवे आत्मनिष्ठादृष्टकल्पनं व्यर्थम् ।

**आधेयशक्तिनिरासपूर्वकं पुरुषसंस्कारसमर्थनम्**

यथा यागस्य स्वर्गरूपभाविफलजनकतया विहितस्य अदृष्टजनकत्वं तथा प्रोक्षण[1]स्यापि कालान्तरभाव्यवघातरूपफलजनकतया विहितस्य अदृष्टजनकत्वम् । दृष्टद्वाराभावे सति विहितस्य कालान्तरभाविफलानुकूलस्य धर्मजनकत्वनियमात् । तथा चाऽयं प्रयोगः प्रोक्षणम् अदृष्टजनकं दृष्टद्वारकत्वाभावे सति कालान्तरभाविफलजनकतया विहितत्वात् यागवदिति । इत्थञ्च कालान्तरभाविफलानुकूलो व्यापारो लाघवेन एक एव सिद्धस्तस्य सकलव्रीहिसमवेतत्वे एकव्रीहिनाशात् तन्नाशे प्रोक्षितस्य व्रीह्यन्तरस्याप्युत्तरत्र अवघातबाधापत्तेः । तन्नाशकालीनतत्समवेतनाशे तन्नाशस्य हेतुत्वात् । न च यावदाश्रयनाशादेव शक्तिनाश इति वाच्यम् । यावत्त्वस्य गुरुभूततया अनवच्छेदकत्वात् । लाघवात् आश्रयनाशस्यैव तन्नाशे प्रयोजकत्वात् । न च पुरुषसंस्कारपक्षे यदा तस्य पुरुषस्य पातकादिदोषस्तदा तस्मिन् संस्काराधानासम्भवात् प्रोक्षणादेर्वैफल्यमेव स्यात् व्रीहिसंस्कारपक्षे तु तेषामदुष्टत्वात् तेषु सर्वदा संस्काराधानसम्भवात् नाऽयं दोष इति वाच्यम् । कर्तुः कर्मणः साधनस्य च दोषे यथैकत्र कर्तरि फलस्य संस्कारस्याभावस्तथापरत्र व्रीह्यादिष्वपि । तेषामन्यायोपार्जितत्वादिना दुष्टत्वे कर्तृत्वादिवैगुण्ये संस्कारो नोत्पद्यते इति तुल्यम् ।

---

[1] प्रोक्षणमूर्ध्वमुखदक्षिणपाणिकरणकवारिप्रक्षेपरूपम् अभ्युक्षणमधोमुखदक्षिण-पाणिकरणकवारिप्रक्षेपरूपम् । तथा च स्मृतिः 'उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्तितम् । न्यञ्चताऽभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतम्'॥ इति ।

ISSN: 2249-538X

**पुरुषसंस्कारपक्षे बाधकयुक्तीनां निरासः**

१. प्रोक्षणेन पुरुषे संस्कारोत्पत्तिस्वीकारे व्रीहीणां प्रोक्षणस्य वैयर्थ्यप्रसङ्गो न भवति । यतो हि प्रोक्षणोपलक्षितव्रीहीणामेव अवघात हेतुत्वं स्वीक्रियते, न तद्विशिष्टानाम्। तदुपलक्षितत्वञ्च प्रतियोगिवैय्यधिकरण्यावच्छिन्नतदभावाभाववत्त्वम् अप्रोक्षितव्रीहिव्यावृत्तमेव ।

२. अवघातसंस्कारयोः संस्कारप्रोक्षणयोश्च कार्यकारणभावे व्यभिचारप्रसङ्गो नापादयितुं शक्यः । तथा हि – कर्मतासम्बन्धेन अवघातं प्रति संस्कारस्य स्वजनकप्रोक्षणजनकाभिप्रायविषयत्वसम्बन्धेन विषयतासम्बन्धेनैव वा कारणत्वमुपगम्यते । एवं समवायसम्बन्धेन संस्कारं प्रति कर्तृतासम्बन्धेन प्रोक्षणं कारणमिति कार्यकारणभावः स्वीक्रियते । ननु कर्तृत्वं स्वानुकूलकृतिमत्त्वमिति तेनसम्बन्धेन कार्यकारणभावस्वीकारे गौरवमिति चेत् , अदृष्टस्य व्रीहिनिष्ठत्वेऽपि समवायसम्बन्धेन अदृष्टं प्रति कर्मतासम्बन्धेन प्रोक्षणं कारणमिति कार्यकारणभावः कल्पनीयः स्यात् । तत्र कर्मत्वं क्रियाजन्यफलाश्रयत्वरूपमिति तुल्यं गौरवम् ।

३. व्रीह्यादिषु संस्कारस्य अनुपगमेऽपि यवबीजाद् यवाङ्कुर एव, व्रीहिबीजाद् व्रीह्यङ्कुर एवेति नियम उपपद्यते । तथा हि – बीजविशेषस्यापरमाण्वन्तभङ्गेऽपि परमाणूनां यवत्वकलमत्वादिजातेर-भावेऽपि पाकजरूपरसगन्धस्पर्शविशिष्टाः परमाणवस्तत्तत्कार्यमारभन्ते । यवबीजारम्भकाः परमाणवः पूर्वं कलमबीजारम्भकपरमाणुव्यावृत्तैर्यैः पाकजविशेषैः रूपादिभिः कलमबीजविलक्षणं यवबीजमारब्धवन्तः प्राचीनैस्तैरेव तज्जातीयैर्वा रूपादिभिः विशिष्टाः परमाणवो यवाङ्कुरमेवाऽऽरभन्ते नाऽन्यम् । ननु व्यावर्तकगुणसिद्धौ हि ते एव विशेषका भवेयुस्तत्सिद्धिरेव कुतः इति चेत् । यथा हि तदवयविनां जात्या व्यावृत्तिस्तथा तदारम्भकपरमाणूनां गुणविशेषैर्व्यावृत्तिः । यथा हि कमलबीजं यवादेः, गोक्षीरं महिष्यादेर्जात्या


ISSN: 2249-538X

व्यावर्तते तथा तत्परमाणवोऽपि मूलभूताः पाकजैरेव रूपादिभिः व्यावर्तन्ते । नह्यस्ति सम्भवो गोक्षीरं मधुरं सुरभि शीतं, तत्परमाणवश्च विपरीताः इति । ननु सृष्ट्यारम्भे बीजाभावात् क्षेत्रकर्षणजलावसेकाद्यभावाच्च कथमङ्कुरोत्पत्तिरिति चेत्, इदानीं यादृशविशेषशालिभिः परमाणुभिः क्रमात् कार्यनिष्पत्तिस्तादृशविशेष-वद्भिस्तैरेव परमाणुभिस्तदानीमपि कार्योत्पत्तिः । किन्तु इदानीं सहकारिसमवधानार्थं पुरुषप्रयत्नोऽपेक्ष्यते । तदानीं तु तादृशविशेषवन्तः परमाणवः अदृष्टवशादेव मिलन्तीति भेदः । न च परमाणोराधेयशक्तिरस्तु पाकजगुणा वसन्तु न कश्चिद्विशेष इति वाच्यम् । तदारब्धावयविनि तज्जातीयगुणोपलम्भात् परमाणुषु पाकजगुणकल्पनायाः आवश्यकत्वात् ।

४. जलतेजोवायुषु शक्तिस्वीकारमन्तराऽपि कार्यविशेषनियम उपपद्यते । यतो हि - अदृष्टादिरूपनिमित्तविशेषसम्बन्धादेव अपार्थिवेषु उद्भूतरूपस्पर्शादिः, अनुद्भूतरूपस्पर्शादिः द्रवत्वं, द्रवत्वप्रतिबन्धः, कठिनत्वादि जायते ।तद्यथा उद्भूतस्पर्शादिकं यत्पुरुषस्य भोगजनकं तस्यैवाऽदृष्टजन्यम् । एवं हिमं करका वा यस्य पुरुषादेर्जीवनार्थं पुण्यादिप्रयुक्तोपभोगार्थमुत्पद्यते तस्य पुरुषस्य जीवनादृष्टविशेषेण हिमादेः सांसिद्धिकमपि द्रवत्वं प्रतिबध्यते । यद्यप्युद्भूतपरमाणुरूपादेव तत्कार्यमुद्भूतरूपम्, एवमनुद्भूतपरमाणुरूपादेव तत्कार्यमनुद्भूतं रूपं चोत्पद्यते इति निमित्तभेदस्तत्राऽप्रयोजकस्तथापि साक्षात्कारविषयत्वप्रयोजकतया उद्भूतत्वकल्पनात् परमाणुगुणेषु साक्षात्कारविषयत्वाभावात् उद्भूतत्वं नास्तीत्यदृष्टविशेषादेव द्व्यणुकनिष्ठात् अनुद्भूतरूपात् त्र्यणुकगतमुद्भूतरूपं जायते इत्यभ्युपगन्तव्यम् । तथा च द्व्यणुकारम्भकसंयोगानुकूलक्रियानिमित्तेन अदृष्टेन सहकृताः परमाणवः उद्भूतानुद्भूतगुणवद्द्व्यणुकारभन्ते । इत्थञ्च यत्र परमाण्वादिषु पाकजविशेषाभावः तत्रापि शक्तिविशेषः न कल्पनीयः । क्लृपतत्तददृष्टविशेषादेव ततः कार्यविशेषप्रादुर्भाव इत्युपगमे लाघवात् ।


ISSN: 2249-538X

५. प्रतिष्ठादिना प्रतिमासु शक्तिविशेषस्वीकारोऽपि नावश्यकः । तेन विनाऽपि धर्माऽधर्मोत्पत्तिनिर्वाहात् । तथा हि – देवताप्रतिमासु श्रुत्युक्तविधिना रुद्रोपेन्द्रादिदेवतानां सन्निधापनात् ताः प्रतिमास्तत्र तत्राऽऽराधनीया भवन्ति। आराधनञ्च देवताप्रीतिहेतुक्रिया । आराधनीयत्वञ्च तादृशक्रियाजन्यप्रीत्याश्रयत्वम् । तच्च देवतानाम् । अशरीरस्य परमेश्वरस्य जन्यप्रीत्याद्यभावेऽपि प्रतिमादौ पूजनीयस्य विष्ण्वादेर्जन्यप्रीत्यादिसत्त्वे बाधकाभावात् । ननु देवतात्मनामपि विभुत्वात्तेषां प्रागेव प्रतिमासु सन्निधानात्कथं प्रतिष्ठया तत्र तेषां सन्निधानमिति चेत् । 'अहमेषा ममैवेदं' इत्येवं रूपं च अहङ्कारममकारापरपर्यायमाहार्यज्ञानं देवातानां जन्यते । यथा चित्रादौ स्वसादृश्यदर्शिनो राज्ञः 'अहमेवेदम्' 'ममैवेदम्' इत्येवंरूपमाहार्यज्ञानं जायते । न च देवतानां विशेषदर्शित्वात् तासां भ्रमरूपयोरहङ्कारममकारयोः कथं सम्भव इति वाच्यम् । विशेषदर्शनसत्त्वेऽपि आहार्यरूपयोस्तयोःसम्भवात् । न च जन्यतादृशाहार्यज्ञानस्याशुविनाशितया तादृशज्ञाननाशानन्तरं कथं प्रतिमादौ पूज्यत्वमिति वाच्यम् तादृशज्ञानजन्यसंस्कारो विवक्षितः स च तावत् कालं तिष्ठति, अस्पृश्यस्पर्शादिना नश्यति । स च देवतानां अहङ्कारममकारसंस्कारः विषयतया प्रतिमादिषु भवन् पूजातदतिक्रमाभ्यां धर्माधर्मोत्पत्तौ हेतुः ।

देवताचैतन्ये विप्रतिपन्नानां मीमांसकानां मतेऽपि, प्रतिमादौ न शक्तिविशेषः कल्पनीयः । "पूर्वैः प्रतिष्ठितेयं प्रतिमा' इत्याकारिका प्रतिष्ठितत्वप्रकारकप्रत्यभिज्ञा विषयतया प्रतिमादिषु भवन्ती पूजातदतिक्रमाभ्यां धर्माधर्मजनने हेतुः भवति । ये तु प्रतिमायाः प्रतिष्ठितत्वं न जानन्ति तेषां पूर्वपूर्वपुरुषपूजितत्वप्रकारकप्रत्यभिज्जा धर्माधर्मोत्पत्तिहेतुः।

अत्र प्राञ्चः प्रत्यभिज्ञानं पूजापूर्वमवश्यमपेक्षितम्, ' प्रतिष्ठितं पूजयेद्' इति विधिबलादित्याहुः । नव्यास्तु प्रतिष्ठितम् अतीतप्रतिष्ठं, तथा च प्रतिष्ठाकालीनास्पृश्यस्पर्शप्रतियोगिकयावदभावा एव पूजाहेतुः, न तज्ज्ञानमपीति वदन्ति । केचित्तु प्रतिष्ठया प्रतिष्ठापकादृष्टमेव जायते,


ISSN: 2249-538X

प्रतिष्ठापकस्य मुक्तावपि तददृष्टं तिष्ठति, भोगजनकादृष्टस्यैव मुक्तिकाले ध्वंसो भवति । अस्पृश्यस्पर्शेन तदेवादृष्टं नश्यति प्रतिमानिष्ठतादृशशक्तिकल्पने चिरकालान्मार्जनादिनाऽवयवापचये शक्तिनाशापत्तेरित्याहुः ।

६. भोग्येषु शरीरादिषु अदृष्टस्वीकाराभावेऽपि अस्य पुरुषस्य इदमेव स्रक् चन्दनादि भोग्यमिति भोग्यनियम उपपादयितुं शक्यते । तथा हि – समवायसम्बन्धेन भोगं प्रति स्वजनकादृष्टवत्त्वसम्बन्धेन शरीरेन्द्रियस्रक् चन्दनादीनां हेतुत्वं कल्प्यते । अदृष्टस्य भोग्यनिष्ठित्वे पुनः समवायसम्बन्धेन भोगं प्रति स्वाश्रयसंयुक्तत्वसम्बन्धेन अदृष्टं कारणमिति कार्यकारणभावो वाच्यः। तथा च स्वाश्रयसंयुक्तत्वसम्बन्धेन अदृष्टरूपकारणस्य आत्ममात्रे सत्त्वात् पुरुषान्तरीयकर्मजन्यादृष्टेन पुरुषान्तरीयभोगापत्तिः । न च तत्पुरुषीयभोगं प्रति तत्पुरुषीययागजन्यादृष्टं हेतुरिति विशिष्य कार्यकारणभावकल्पनायां न पुरुषान्तरीयकर्मजन्यादृष्टेन पुरुषान्तरीय-भोगापत्तिरिति वाच्यम् । पुरुषविशेषमन्तर्भाव्य अनन्तकार्यकारणभाव-कल्पनायां गौरवादिति ।

**आधेयशक्तिसाधकानुमानस्य निरासः**

प्रोक्षणं व्रीहिनिष्ठातिशयजनकं व्रीहिनिष्ठफलार्थितया क्रियमाणत्वात् इत्यनुमानस्य श्येनयागादौ व्यभिचारः । अत्रानुमाने सामान्यव्याप्तेरेव आश्रयणीयत्वात् । यत् यन्निष्ठफलार्थितया क्रियमाणं तत् तत्रातिशयजनकमिति सामान्यव्याप्तेश्च श्येनयागे भङ्गदर्शनात् । शत्रुनिष्ठवधरूपफलार्थितया क्रियमाणेनाऽपि श्येनयागेन शत्रौ अतिशयाजननात् ।

ननु श्येनयागादिना शत्रावेव दुरदृष्टं जायते इति वाच्यम् । 'शास्त्रदेशितं फलमनुष्ठातरि' इत्युत्सर्गवाक्यस्य बाधकं विना त्यागायोगात् । बहुशत्रुस्थले नानाशत्रुनिष्ठादृष्टकल्पनापेक्षया अनुष्ठातृनिष्ठमेकमेवादृष्टं जायते इति कल्पनायां लाघवाच्च ।


ISSN: 2249-538X

एवं, यत् कालान्तरभाविफलाय यदुद्देशेन क्रियते तत् तत्रातिशयजनकम् इति व्याप्तिः न घटते, हविःप्रक्षेपादौ भङ्गदर्शनात् । देवताहुताज्ञानानुद्देशेन क्रियमाणेन हविःप्रक्षेपादिना देवता हुताशनादिनिष्ठादृष्ठाजननात् ।

यथा देवताहुताशनाद्युद्देशेन क्रियमाणाः समन्त्राः हविःप्रक्षेपादयः पुरुषे संस्कारं जनयन्ति, न देवतायां नाऽपि वह्नौ । यथा कारीरीष्टिजनितसंस्कारानाधारा अपि जलधराः कारीरीष्टिजनितसंस्काराधार-यजमानात्मसंयोगादेव गगने सञ्चरन्ति वर्षन्ति, च तथा व्रीह्यादयोऽपि संस्कातात्मसम्बद्धाः कार्योपयोगिनो भवन्ति ।

एवं लोकेऽपि इन्द्रियसन्निकर्षलिङ्गज्ञानशब्दज्ञानरूपाणि प्रमाणानि प्रमेयोद्देन प्रवृत्तान्यपि प्रमातर्येव ज्ञानं जनयन्ति न प्रमेये । अथवा इन्द्रियलिङ्गशब्दजन्यानि ज्ञानानि प्रमेयोद्देशेन प्रवृत्तानि प्रमातर्येव संस्कारादिकं जनयन्ति न प्रमेये । तथा च 'यदुद्देशेन' इति नियमस्य व्यभिचारान्न तेन व्रीहिगतमदृष्टं कल्पयितुं शक्यते ।

ननु तर्हि कृषिचिकित्सेऽपि प्रोक्षणादिवददृष्टसंस्काराधानद्वारेण कार्यकारिण्यौ स्याताम् इति चेत् न । तत्र दृष्टेन पाकजरूपादिभेदेनैव तत्तत्कारणवैलक्षण्यस्य सिद्धतया तत एव विलक्षणकार्योपपत्तावदृष्टकल्पनायां प्रमाणाभावात् ।

ननु 'व्रीहिवान् प्रोक्षति' इत्यत्र प्रपूर्वकोक्षधातोः संस्कारावच्छिन्नवारिप्रक्षेपोऽर्थस्तथा च व्रीहिषु संस्कारस्य अस्वीकारे व्रीहीणां धात्वर्थतावच्छेदकसंस्कारात्मकफलाश्रयत्वाभावेन कर्मत्वाभावात् द्वितीयानुपपत्तिः इति चेन्न ।

"सक्तून् प्रोक्षति' इति लौकिकवाक्ये प्रोक्षणजन्यसंस्कारस्याभावेऽपि यथा प्रोक्षणादिजन्यजलसंयोगादिरूपफलशालितया सक्तूनां कर्मत्वं तथा


ISSN: 2249-538X

'व्रीहीन् प्रोक्षति' इत्यत्राऽपि प्रोक्षणादिजन्यजलसंयोगरूपफलाश्रयत्वेन व्रीहीणां कर्मत्वं सम्भवति ।

एवं कामिनीचरणाघातादिना अशोकादिवृक्षेष्वतिशयकल्पनमपि न युक्तम् । तत्र कामिनीचरणाघातेन वृक्षोपष्टम्भकभागान्तराकर्षणेन पुष्पोद्गमोपपत्तेः[1] ।

एवं कांस्यपात्रादौ भस्मसंयोगादिजन्यातिशयकल्पनमपि न युक्तम् । तत्र भस्मसंयोगादिसमानकालीना ये अस्पृश्यस्पर्शप्रतियोगिकयावदभावास्तादृशाभावकूटसहितो यो भस्मादिसंयोगध्वंसः स एव शुद्धिपदार्थः । तथा च तत्र शक्तिस्वीकारो न युक्तः ।

ननु बीजापूरबीजे लाक्षारसावसेकात् तत्कुसुमेषु यल्लौहित्यं जायते तदर्थमवश्यं शक्तिः कल्पनीया । यदाह महाव्रतः

'कुसुमे बीजपूरादेर्यल्लाक्षाद्यवसिच्यते ।
शक्तिराधीयते तेन काचित्तां किन्न पश्यसि ॥इति।

चेन्न लाक्षारसावसिक्तबीजपूरादिबीजजनिततत्कुसुमलौहित्यमपि न संस्काराधानद्वारा लाक्षारसावसेकेन जायते किन्तु परमाणुनिष्ठपाकजरूपादिद्वारेणैव । ननु हरिद्रानलसाधिते हारीतमांसादौ अवश्यं शक्तिराधेया कथमन्यथा तद्भुञ्जानो विपद्यते । तथा च

---

1 मञ्जूषाकारास्तु कामिनीचरणसम्पर्कप्रसन्नानामशोकतरूणां मनुष्याणामिव कतिपयरेतोधातुस्थानीया अवयवा उद्भिद्य धरणिगतानामपामन्तःपवनोपनीतैः परमाणुभिः कालवशेनैव क्रमादुच्छूनाः कलिकादिक्रमेण कुसुमान्यारभन्ते इत्याहुः । कामिनीचरणसम्पर्कादशोकतरूणामिव पिचुमन्दतरूणामपि कुतो न रेतोधातूद्भेद इति तु नाशङ्कनीयम्, शक्तिपक्षेऽपि पर्यनुयोगस्य तुल्यत्वात् ।

तत्र भूताणुशिष्टानिष्टोपस्थापितस्य चरणाघातध्वंसस्यैव स्थायिनो नियतकालादिसहकृतस्य पुष्पोदयहेतुत्वमिति गङ्गेशोपाध्यायाः ।

चरणाघातेन तत्तत्कर्तृसमवेतमपूर्वमुत्पाद्यते इति केचित् ।


ISSN: 2249-538X

क्वचिद्पाकजरूपादिविशेषस्याऽविशेषेऽपि मरणादिरूपकार्यविशेषदर्शनात् तदतिरिक्तशक्तिभेदोङ्गीकार्य इति चेन्न । पाकजानां निमित्तकारणानि भिन्नानि दृश्यन्ते, तेन निमित्तभेदहेतुकः पाकजेष्वपि विशेषोऽस्ति यतः कार्यविशेषः । निमित्तं च दृष्टमदृष्टं वेति न विशेषः । यदाह वाग्भटः

[1]'हारीतमांसं हारिद्रशूलकप्रोतपाचितम् ।

हरिद्रवह्निना सद्यो व्यापादयति चर्वितम्' ॥ इति ।

एवं 'दशरात्रोषितं कांस्ये घृतञ्चापि विषायते ।' ताम्रपात्रे पर्युषितं क्षीरमपि तिक्तायते इत्यादि । सर्पिःक्षीरयोः पार्थिवत्वात् पाकजोत्पत्तिः सम्भवति । तथा च पाकजरसादेः प्रत्यक्षसिद्धतया तेनैवोपपत्तौ किमतिरिक्तशक्तिस्वीकारेण । एवं चिकित्सास्थलेऽपि, विकृताः शरीरस्था वातपित्तकफरूपा धातवो रोगं जनयन्ति। तत्र रोगनाशार्थं भेषजपानं विधीयते । भेषजपानेन धातूनां साम्यं विकारनिवृत्तिर्भवति । तथा च चिकित्सास्थलेऽपि भेषजपानं धातुसाम्यद्वारा रोगादिनाशरूपं फलं जनयतीति तत्रापि शक्तिस्वीकारो नोचिताः । एवं माघमासे कर्षणादिनापि भूमिनिष्ठा शक्तिर्जन्यते किन्तु कर्षणेन पूर्वभूमिनाशे मृदूकरणानन्तरं विलक्षणा भूमिर्जन्यते । तत्राऽपि शक्तिर्नाङ्गीक्रियते, प्रयोजनाभावात् इति ।

गङ्गेशोपाध्यायास्तु प्रोक्षणादिजन्योऽतिशयो लाघवात्फल-समानाधिकरण इति व्रीहिनिष्ठ एव । तेन तत्समवहितत्वं व्रीहेः साक्षात् समवायसम्बन्धेन । तस्य पुरुषनिष्ठत्वे तु तेन व्रीहीणां साक्षात्सम्बन्धाभावात् स्वजनकप्रोक्षणजनकाभिप्रायविषयत्वरूपपरम्परासम्बन्धेन तस्य व्रीहिवृत्तित्वकल्पने गौरवम् । न च विहितत्वेन प्रोक्षणस्य पुरुषनिष्ठातिशयजनकत्वमनुमेयम् । अप्रयोजकत्वात् । चिकित्सादिना व्यभिचाराच्चेत्याहुः ।

**********

[1] हारीतः पक्षिविशेषः ।

ISSN: 2249-538X

# सविषयकार्थकधातुयोगे द्वितीयार्थविचारः

विद्वान् श्यामसुन्दरः ए

ज्ञानेच्छादिरूपसविषयकपदार्थोपस्थापकज्ञा-इष्वादिधातुसमभिव्याहृत-द्वितीयाविभक्तेः "विषयत्वम्" अर्थः इति प्राञ्चः । 'चैत्रो घटं जानाति ' इत्यादौ प्रकृत्यर्थस्य घटादेः अधेयतया द्वितीयार्थे , विषयत्वे , तस्य निरूपकत्वसम्बन्धेन धात्वर्थे ज्ञाने , तस्य निरूपितत्वसम्बन्धेन अख्यातर्थाश्रयत्वे,तस्य चस्वरूपसम्बन्धेन प्रथमान्तार्थचैत्रे चान्वयः इति तादृशवाक्यत् "घटनिष्ठविषयतानिरूपकज्ञाननिरूपिताश्रयतावान् चैत्रः" इति शाब्दबोधो जायते। "बालको मोदकमिच्छति" इतिइच्छार्थकधातुसमभिव्याहारस्थले "मोदकनिष्ठविषयतानिरूपकेच्छानिरूपिताश्रयतावान् बालकः" इति शाब्दबोधः तन्मतानुसारेण स्वीकार्यः।परन्तु नञसमभिव्यवहारस्थले द्वितीयार्थविषयत्वस्य निरूपकतासम्बन्धेन धात्वर्थे अन्वयस्वीकारे, " घटं जानाति न पटम्" इत्यादौ नञ् समभिव्याहारस्थले धात्वर्थे निरूपकतासम्बन्धावच्छिन्नप्रतियोगिताक-विषयत्वाभावो नञा वक्तव्यः, प्रतियोग्यभावान्वयौ च तुल्ययोगक्षेमौ इति न्यायानुसारेण, स चासम्भवी, निरूपकत्वस्य वृत्यनियामकत्वेन-वृत्यनियामकसम्बन्धस्याभावप्रतियोगितानवच्छेदकत्वात्। अतस्तत्र आश्रयता-सम्बन्धेन धात्वर्थान्वयिविषयित्वं द्वितीयार्थः। आश्रयत्वस्य च वृत्तिनियामकत्वात्, तेन सम्बन्धेन विषयित्वाभावो नञा धात्वर्थे बोध्यते अतो न दोषः इत्यामनन्ति नवीननैयायिकाः । तत्र घटादिनिष्ठं ज्ञानादिकर्मत्वं च ज्ञानादि विषयत्वमेवेति कर्मत्वार्थे एव द्वितीया विधीयते 'कर्मणि द्वितीया' इति सूत्रेण । विषयित्वार्थे द्वितीयायाः शक्तिरेव । यतो हि यथा संयोगत्व-विभागत्वयोः जातित्वेन अखण्डानुगतत्वं तथैव विषयितात्वस्यापि अखण्डोपाधित्वेन एकत्वात् अनुगतत्वाच्च । एवं संयोगाद्यर्थे द्वितीयायाः प्रयोगभूयस्त्वस्यापि निर्णेतुमशक्यत्वात्, विनिगमनाविरहाच्च संयोगादाविव विषयित्वेपि शक्तिरेव द्वितीयायाः ।


ISSN: 2249-538X

'घटं पश्यति' इत्यादौ ज्ञानविशेषचाक्षुषप्रत्यक्षवाचकदृश्धातु-समभिव्याहृत-द्वितीयायाः लौकिकविषयित्वं द्वितीयार्थः। तथा च "घटनिरूपितलौकिक -विषयित्वाश्रयचाक्षुषप्रत्यक्षनिरूपिताश्रयतावान् चैत्रः" इति शाब्दबोधः तादृशवाक्याज्जायते । अत्र विषयितामात्रस्य द्वितीयार्थत्वे,यत्र चन्दनखण्डे चक्षुःसंयोगानन्तरंसुरभिगन्धस्य स्मरणं तत्र चन्दनांशे लौकिकसन्निकर्षजन्यं सौरभांशे चोपनय (अलौकिक) सन्निकर्षजन्यं "सुरभिश्चन्दनखण्डः" इत्याकारकः शाब्दबोधो जायते ।तदानीमन्यस्य 'अयं सौरभं पश्यति' इति प्रयोगापत्तिः, सौरभनिरूपितविषयित्वस्य चाक्षुषप्रत्यक्षे अबाधितत्वात्। लौकिकविषयित्वस्य द्वितीयार्थत्वे तु चाक्षुषे सौरभनिरूपितलौकिकविषयित्वस्य बाधितत्वेन बधितार्थबोधकत्वान्न तादृशप्रयोगस्य प्रामाणिकत्वम् ।

ननु द्वितीयाविभक्तेः लौकिकविषयित्वार्थकत्वे 'चैत्रः पुष्पं जिघ्रति' इति प्रयोगानुपपत्तिः । तत्र गन्धविषयकप्रत्यक्षं जिघ्रत्यर्थः। पुष्पनिरूपितलौकिक-विषयित्वं घ्राणजप्रत्यक्षे बाधितम् । तत्र गन्धस्यैव लौकिकविषयित्वं, पुष्पस्यालौकिकविषयित्वमेव । अतः तद्वाक्यजन्यस्य 'पुष्पनिरूपितलौकिक-विषयित्वाश्रयगन्धसाक्षात्काराश्रयश्चैत्रः' इति बोधस्य बाधितार्थकत्वात् । चक्षुस्त्वङ्मनांसि त्रीण्येव द्रव्यग्राहकाणीद्रियाणीति घ्राणजप्रत्यक्षाविषयत्वात् पुष्पस्य । अत्र च द्वितीयायाः विषयित्वमात्रार्थकत्वे पूर्वोक्तदोषवारणेऽपि, यत्र घ्राणेन्द्रियजन्यगन्धसाक्षात्कारे ज्ञानलक्षणाप्रत्यासत्या आकाशस्यापि भानं तत्र 'अयम् आकाशं पश्यति' इति प्रयोगापत्तिः । अतो लौकिकविषयित्वार्थकत्वं वक्तव्यमेव इति चेन्न ।

'घ्रा गन्धोपादाने' इति धातुपाठात्मकानुशासनबलात् घ्राधातोः गन्धविषयलौकिकप्रत्यक्षत्वावच्छिन्नमर्थः। तत्समभिव्याहृतद्वितीयायाः धात्वर्थैकदेशगन्धान्वयि आधेयत्वमर्थः इति तादृशवाक्यात् 'पुष्पनिरूपिता-धेयतावद्गन्धविषयकलौकिकप्रत्यक्षाश्रयश्चैत्रः' इति शाब्दाबोधोदयान्नानुपपत्तिः ।


ISSN: 2249-538X

नन्वेवं सति 'सविषयकार्थबोधकधातुसमभिव्याहृतकर्मप्रत्ययस्य विषयित्वार्थकत्वम्' इति नियमभङ्गप्रसङ्गः इति तु नाशङ्कनीयः, यतो हि विषयानवच्छिन्नसविषयकार्थकधातुसमभिव्याहृतद्वितीयायाः एव विषयित्वा-र्थकत्वम्' इति नियमात्। अत्र च घ्राधातोः गन्धात्मकविषयावच्छिन्न-साक्षात्कारवाचकतया तादृशनियमोऽबाधित एव ।

ननुघ्राधातुसमभिव्याहृतद्वितीयाविभक्तेः धात्वर्थैकदेशगन्धान्वय्या-धेयार्थकत्वे "आमोदमुपजिघ्रति चैत्रः" इति प्रयोगानुपपत्तिः । आमोदस्यापि गन्धविशेषरूपत्वेन गुणेगुणानङ्गीकारात् गन्धे आमोदवृत्तित्वस्यबधितत्वेन आमोदवृत्तिगन्धविषयकलौकिकप्रत्यक्षाश्रयश्चैत्रः' इति बोधस्य बाधितार्थकत्वात् इति चेत् विषयावच्छिन्नसविषयकार्थबोधकधातुसमभिव्याहृतद्वितीयायाः एव आधेयत्वार्थकत्वम्, विषयानवच्छिन्नप्रत्यक्षबोधकधातुयोगे तु लौकिकविषयत्वमेव द्वितीयार्थः । प्रकृते गन्धात्मकविषयकबोधकामोदपदस्य पृथग्विद्यमानतयानात्र धातोः गन्धविशिष्टार्थबोधकत्वं अपि तु घ्राणजप्रत्यक्षमात्रबोधकत्वम् । विशिष्टार्थबोधकपदस्य सति पृथक् विशेषणबोधकपदसमवधाने विशेष्यमात्रपरत्वात् यथा 'सकीचकैर्मारुतपूर्णरन्ध्रैः' इत्यत्र कीचकशब्दस्य । अत्र कर्मप्रत्ययार्थः लौकिकविषयित्वमिति 'आमोदनिरूपितलौकिकविषयितावद्घ्राणजप्रत्यक्षाश्रयश्चैत्रः' इति अबाधितार्थक-शाब्दबोधः तादृशवाक्याज्जायते ।

वस्तुतस्तु घ्राधातोः विषयावच्छिन्नप्रत्यक्षमेवार्थः न तु विषयानवच्छिन्नम् , अन्यथा 'घ्रा गन्धोपादाने' इत्यनुशासनविरोधापत्तेः। तथा च "चैत्रः पुष्पं जिघ्रति" इत्यादौ घ्राधातोः गन्धनिरूपितलौकिक-विषयिताशालिप्रत्यक्षमर्थः।समवायसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नविष यतानिरूपितप्रकारता द्वितीयाविभक्त्यर्थः। तादृश प्रकारतायाश्च निरूपितत्वसम्बन्धेन धात्वर्थैकदेशे विषयितायामन्वयः । प्रकृत्यर्थस्य पुष्पस्य आधेयतासम्बन्धेन द्वितीयार्थप्रकारतायामन्वयइति तद्वाक्यात्


ISSN: 2249-538X

"पुष्पनिष्ठसमवायसम्बन्धावच्छिन्नाधेयतासम्बन्धावच्छिन्नप्रकारतानिरूपितगन्ध निरूपितलौकिकविषयताशालिप्रत्यक्षाश्रयश्चैत्रः" इति बोधो जायते । 'पुष्पे गन्धः' इत्याकारकप्रत्यक्षविषयपुष्पस्य गन्धे पूर्वोक्तसम्बन्धेनप्रकारत्वात् तदीयविषयतामादाय शाब्दबोधोपवर्णनम्। अत्र आधेयतासम्बन्धावच्छिन्न-विषयितानिरूपितप्रकारतामात्रस्य द्वितीयार्थत्वे 'कालं जिघ्रति चैत्रः' इति प्रयोगापत्तिः । 'इदानीं पुष्पे गन्धः' इति प्रत्यक्षे गन्धांशे कालस्य कालिकसम्बन्धावच्छिन्नाधेयतासम्बन्धेन प्रकारत्वात्, अतः आधेयतायां समवायसम्बन्धावच्छिन्नत्वनिवेशः ।

आधेयत्वमात्रस्य द्वितीयार्थत्वे, घ्राधात्वर्थौ गन्धविषयकलौकिक-प्रत्यक्षम् इति वक्तव्यं, तथा सति महाकविप्रयोगस्य 'तदाननं मृत्सुरभि क्षितीश्वरो रहःसमाघ्राय न तृप्तिमाययौ' इति 'आघ्रातवान् गन्धवहं सुगन्धम्' इत्यादेश्च प्रयोगस्याप्रामाण्यप्रसङ्गः स्यात् । आनने मृत्समवेतगन्धस्य वायौ गन्धमात्रस्य च समवायेन बाधितत्वेन, तद्वाक्यस्य बाधितार्थबोधकत्वात् । वस्तुतस्तुपक्षानुसरणेनाधुना नास्य दोषस्यावकाशः । यतो हि अत्र आननगन्धवहयोः गन्धस्य समवायेनावृत्तित्वेऽपि उपाधिगतगन्धप्रत्यक्ष-तात्पर्येणैव तत्र जिघ्रतेः प्रयोगः । एवञ्च 'आनने गन्धः' 'गन्धवहे गन्धः' इत्यादि औपाधिकगन्धविषयकभ्रमस्य जायमानत्वेन तदीया या आननगन्धवहादिनिष्ठा समवायावच्छिन्नाधेयतासम्बन्धावच्छिना प्रकारता तन्निरूपितगन्धनिष्ठ-लौकिकविषयिताशालिपूर्वोक्तभ्रमात्मकप्रत्यक्षाश्रयत्वस्य क्षितीश्वरादौ सत्वान्न दोषः । एवं वाय्वानीतचम्पकादिगन्धस्य यदा वायुवृत्तित्वेन ग्रहः तदा 'अयं वायुं जिघ्रति' इत्येव प्रयोग इष्यते न तु 'चम्पकं जिघ्राति' इत्यादि प्रयोगः । तत्र 'वायुनिष्ठसमवायसम्बन्धावच्छिनाधेयतासम्बन्धा-वच्छिन्नप्रकारतानिरूपितगन्धनिरूपितलौकिकविषयिताशालिप्रत्यक्षाश्रयः अयम्' इति शाब्दबोधः तद्वाक्याज्जायते ।

**********


ISSN: 2249-538X

# ईश्वरसङ्केतस्वरूपविचारः

डा. आर्. नवीनः

प्रत्यक्षानुमानोपमानशब्दभेदेन चत्वारि प्रमाणानि। तेषु शाब्दप्रमाजनकत्वात् शब्द:प्रमाणमिति। शब्द: वृत्तिज्ञानसहकृत: स्वार्थोपस्थितिद्वारा उपस्थितार्थानां अन्वयबोधाख्यं शाब्दं जनयति इति भाव:।शाब्दबोधे अन्वयस्य भाने आकाङ्क्षाया: प्रयोजकत्वं न तु वृत्ते:। वृत्ते: तावत् पदार्थोपस्थितौ प्रयोजकत्वम् । तथा हि वृत्तिर्नाम पदपदार्थयो: सम्बन्ध: । तादृशैकसम्बन्धिनः पदस्य श्रवणे अपरसम्बन्धिन: पदार्थस्य स्मरणमिति **तदुक्तम् विश्वनाथपञ्चाननभट्टै:** **<u>अत्रैव वृत्तिज्ञानस्योपयोग: पदज्ञानस्य हि एकसम्बन्धिविधया पदार्थोपस्थपकत्वमिति</u>** । सा च पदपदार्थसम्बन्धरूपा वृति: शक्तिलक्षणाभेदेन द्विविधा । शक्तिश्च अस्मात् पदादयमर्थो बोद्धव्य: इत्याकारकेश्वरेच्छैव । न च घटपदबोध्यत्व प्रकारकेश्वरेच्छाया: घटपदशक्तिरूपत्वे तस्या: ईश्वरमात्रवृत्तित्वेन घटे घटपदशक्ति: न स्यात् इति वाच्यम्। विशेष्यतासम्बन्धेन तादृशेश्वरेच्छाया: पदशक्तिरूपत्वोपगमात् । न चेश्वरस्य अनेकेच्छाव्यक्तिकल्पने गौरवात् "घटपदात् घटो बोद्धव्य: पटपदात् पट: बोद्धव्य:" इत्याकारकसमूहालम्बनरूपैकेच्छाव्यक्तेरेव लाघवप्रमाणेन अङ्गीकरणीयतया तस्याश्च समूहलम्बनरूपाया: इच्छाया: विषयतासम्बन्धेन पटे अपि सत्वेन घटपदशक्यत्वप्रसङ्ग:, अपि च भगवदिच्छाया: सन्मात्रविषयकत्वेन गङ्गापदबोध्यत्वप्रकारकेच्छाया: विशेष्यतासम्बन्धेन तीरेऽपि सत्वेन, गङ्गापदशक्त्यैव तीरोपस्थित्यादिनिर्वाहे लक्षणोच्छेदप्रसङ्गश्चेति वाच्यम् । तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छावत्त्वस्यैव तत्पदशक्यत्वोपगमात्। घटादावेव घटपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यताया: सत्वेन पटादौ तादृशविशेष्यतासम्बन्धेन ईश्वरेच्छावत्त्वविरहान्न पटादे: घटपदशक्यत्वापत्ति:। नापि


ISSN: 2249-538X

लक्षणोच्छेदप्रसक्तिः । तीरादौ गङ्गापदशक्यत्व व्यवहाराभावेनेश्वरच्छायाः "तीरं गङ्गापदबोध्यं भवतु'' इत्यकारकता न स्वीक्रियते । अपि तु ''विषयता गङ्गापदजन्यबोधीया भवतु'' ''तीरं विषयतावद्भवतु'' इत्येवं रीत्या विषयातात्वेनैव रूपेण तीरे गङ्गापदजन्यबोधविषयाताया: एव भगवदिच्छया अवगाहनात् गङ्गापदजन्यबोध विषयतात्वेन रूपेण गङ्गापदजन्यबोधविषयतायाः तीरे भगवदिच्छया अनवगाहनात् गङ्गापदजन्यबोधविषयवात्वावच्छिन्नप्रकारता निरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छावत्त्वरूपगङ्गापदशक्यत्वस्य तीरे अभावात् गङ्गापदशक्त्या तीराद्युपस्थित्यादिनिर्वाहासम्भवेन तीराद्युपस्थित्यादिनिर्वाहाय लक्षणायाः अङ्गीकारः आवश्यकः इति भावः । तथा च निरुक्तसम्बन्धेन ईश्वरेच्छावत्त्वस्य पदशक्तिरूपत्वाभ्युगमान्न दोषः इति।

अयञ्च शक्त्याख्यवृत्तिविशेषः सङ्केतः इति नाम्नाऽपि अभिधीयते । सङ्केतोऽयं नित्याधुनिकभेदेन द्विविधः । तत्र नित्यः सङ्केतः ईश्वरनिष्ठः घटः घटपदबोध्यो भवतु इत्याकारकः । आधुनिकः सङ्केतः पाणिन्यादिनिष्ठः अएओवर्णाः गुणपदबोध्याः भवन्तु इत्याकारकः। तथा च सङ्केतस्य पदपदार्थसम्बन्धवरूपतेति भावः । न च सम्बन्धानां द्विनिष्ठत्वादिरूपत्वात् सम्बन्धत्वेनाभिमतस्य सङ्केतस्य इच्छात्वात् आत्मगुणत्वात् न द्विनिष्ठत्वमिति तस्य सम्बन्धत्वमनुपपन्नमिति वाच्यम् । नीलो घटः इति विशिष्टबुद्धया सिद्धस्याभेदसम्बन्धस्य द्विनिष्ठत्वाभावेन तस्य सम्बन्धत्वं न स्यात् । तर्हि किं नाम सम्बन्धत्वम् । यदि द्विनिष्ठत्वलक्षणमुच्यते तर्हि आधाराधेयभावानामपि सम्बन्धत्वं नोपपद्येत । आधाराधेयभावो नाम आधारता आधेयता उभयं वा स्यात् । सर्वथाऽपि न द्विनिष्ठः । आधारतायाः आधारे एव सत्वात्, आधेयतायाश्च आधेयमात्रवृत्तित्वात् । यदि चाधारता स्वरूपसम्बन्धेनाधारे, निरूपकतासम्बन्धेन चाधेये वर्तते इति तेषां द्विनिष्ठत्वमुपगम्यते। तदा सङ्केतोऽपि द्विनिष्ठः । घटशब्दः घटबोधको भवतु इतीच्छायां शब्दः विशेष्यः, तत्र जनकत्वं, तत्र च बोधः, तत्र च विषयितासम्बन्धेन घटः प्रकारः ।एवञ्च इच्छा


ISSN: 2249-538X

विशेष्यतासम्बन्धेन शब्दे, प्रकारताविशेषसम्बन्धेन च घटे वर्तते ।यदि विषयतासम्बन्धस्य वृत्त्यनियामकत्वात् तेन सम्बधेन न सम्बन्धिनिष्ठत्वमनुपपन्नमित्युच्यते। आधारतायाः आधेयतायाश्च निरूपकता-सम्बन्धेनापि सम्बन्धिनिष्ठत्वमनुपपन्नं भवेत् । निरूपकतायाः वृत्त्यनियामकत्वात्। तस्मात् सम्बन्धस्य सम्बन्धत्वे न द्विनिष्ठत्वम् अपेक्षितम् । अपि तु द्विसम्बन्धित्वमेव । तच्च सर्वत्र नापेक्षितम् । अभेदसम्बन्धस्वीकारात्। एवं सम्बन्धत्वं न विशिष्टबुद्धिनियामकत्वम् । विशिष्टबुद्धिनियामकत्वस्य विशिष्टबुद्धिजनकतारूपत्वे अतीन्द्रियपरमाण्वोः संयोगे अव्याप्तिः । यतः विशिष्टबुद्धेः प्रत्यक्षरूपत्वे विषयतया प्रत्यक्षं प्रति तादात्म्येन विषयस्य कारणत्वमिति रीत्या विशिष्टबुद्धिजनकत्वं तत्र भवेत् । यदि विशिष्टबुद्धेः अनुमित्यादिरूपत्वे विषयविधया तज्जनकत्वं परमाण्वोः संयोगे नापेक्षितमिति न तत्राव्याप्तिः इत्युच्यते । तर्हि विशिष्टबुद्धिजनकत्वस्य अनुमित्यादिजनकत्वरूपत्वे प्रत्यक्षविषये सम्बन्धे अव्याप्तिः । अतो न विशिष्टबुद्धिनियामकत्वं विशिष्टबुद्धिजनकतारूपमिति। नापि विशिष्टबुद्धिनियामकत्वं विशिष्टबुद्धिविषय-त्वरूपम्। विशिष्टबुद्धिविषयत्वस्य केवलान्वयित्वात् वस्तुमात्रे अतिव्याप्तेः।नापि सम्बन्धत्वं प्रमात्मकज्ञानीयप्रकारतानिरूपिता या विशेष्यताभिन्ना विषयता तद्वत्त्वरूपम् । निरुक्तसम्बन्धत्वस्य प्रमात्वघटितत्वात् तेन सम्बन्धेन तद्वद्विशेष्यकत्वे सति तेन सम्बन्धेन तत्प्रकारकत्वरूपप्रमात्वस्य च सम्बन्धघटितत्वेनान्योन्याश्रयादिति। तस्मात् तत्प्रतियोगिकत्वविशेष एव तत्सम्बन्धत्वम्। न चास्तु नाम निरुक्तं सम्बन्धत्वम्। ईश्वरेच्छात्मकसङ्केतलक्षणस्य वाच्यवाचकभावरूपस्य निष्प्रतियोगिकत्वात् कथं पदप्रतियोगिकत्वरूपं पदसम्बन्धत्वमिति वाच्यम्। अर्थे पदस्य सम्बन्धस्तावत् स्वजन्यज्ञानविषयत्वप्रकारकेश्वरेच्छाविषयत्वम्। तत्र च स्वत्वं परिचायकम्,न तु सम्बन्धकोटिप्रविष्टं तत्। तथा च जन्यत्वस्य पदप्रतियोगिकत्वात् जन्यत्वघटितस्य तस्य पदसम्बन्धत्वाविवादात्।न च सम्बन्धघटकस्य



ISSN: 2249-538X

जन्यत्वस्य सप्रतियोगिकत्वेपि जन्यत्वघटितस्य तस्य सप्रतियोगिकत्वमप्रामाणिकमिति वाच्यम्। यथा ज्ञायमानं सामान्यं प्रत्यासत्तिरिति मते धूमत्वादेः सप्रतियोगिकत्वरूपसम्बन्धत्वविरहेपि संयोगस्य सप्रतियोगिकत्वात्तद्घटितस्य संयुक्तज्ञानप्रकारीभूतधूमत्वादेः इन्द्रियसम्बन्धत्वं तथा जन्यत्वघटितस्य तस्य सप्रतियोगिकत्वं सिद्धमेवेति न कोपि दोषः।न चेश्वरेच्छाया एव शक्तित्वे किं विनिगमकमिति शङ्क्यम्। शाब्दबोधनिरूपितायाः परिभाषाज्ञानसाधारण्याः शक्तिज्ञानस्य सङ्केतज्ञानत्वेनैव कारणत्वस्वीकारात्, सङ्केतज्ञानत्वावच्छिन्नकारणतायाः उभयवादिसम्मततया ईश्वरेच्छारूप-शक्तिज्ञानस्य पृथक्कारणत्वाकल्पनाप्रयुक्तलाघवरूपविनिगमकसद्भावे-नेश्वरेच्छायाः शक्तित्वोपगमात्। ईश्वरज्ञानादेः शक्तित्वोपगमे तु शाब्दबोधनिरूपितायाः ईश्वरज्ञानादिरूपशक्तिज्ञानकारणतायाः आधुनिकेच्छा-त्मकपरिभाषाज्ञानसाधारण्याभावेन ईश्वरज्ञानादिरूपशक्तिज्ञाननिष्ठशाब्दबोध-कारणतायाः पृथक्कल्पनीयतया गौरवप्रसङ्गात् ।तस्मात् ईश्वरसङ्केत एव शक्तिरिति सिद्धम्।

**********


ISSN: 2249-538X

# यः कौमारहर इत्यादिपद्ये अस्फुटालङ्कारविचारः

डा. राघवेन्द्रभट्टः

तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि इति काव्यप्रकाशोक्तं काव्यलक्षणम् । अदोषौ सगुणौ अनलङ्कृती पुनः क्वापि शब्दार्थौ तदिति तदन्वयः। तत्पदेन पूर्वकारिकोक्तस्य काव्यस्य परामर्शः । अविद्यमानो विधेयाविमर्शादिदोषो ययोस्तावदोषौ । गुणेन माधुर्यादिना सहितौ सगुणौ । अविद्यमाना अस्फुटतया विद्यमाना अलङ्कृतिरुपमानुप्रासाद्यन्यतमा ययोस्तावित्यनलङ्कृती । अनलङ्कृतीत्यत्र नञः अल्पत्वमर्थः । अल्पत्वञ्चात्र सद्यःसहृदयसंवेदनाविषयत्वरूपमस्फुटत्वम् । तेन अस्फुटालङ्कृती इति तदर्थः सिध्यति । क्वापीत्यत्र अपिशब्दः अनुक्तसमुच्चयार्थकः । तेन स्फुटालङ्कृती इति समुच्चीयते । तथा च स्फुटालङ्कृती इति सामान्यम् अनलङ्कृती पुनः क्वापीति विशेषेणाक्षिप्यते । तेन सर्वत्र सालङ्कारयोः शब्दार्थयोरेव काव्यत्वमिति सिध्यति। तच्चोक्तं काव्यप्रकाशे 'क्वापीत्यनेनैतदाह यत्सर्वत्र सालङ्कारौ क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः' इति । एवञ्च दोषरहितौ गुणसहितौ अलङ्कारसहितौ शब्दार्थौ इति काव्यलक्षणं फलति । तत्र

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा
-स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥ इति ।

स्वाधीनभर्तृकाया असकृदुपभुक्तेष्वपि वरादिषूपभोग्येषु उत्कण्ठोत्पत्त्या तेषामत्यन्तोपादेयतां सूचयन्त्याः सखीं प्रत्युक्तिः । यः कौमारहरः यद्यपि स एवास्ति, चैत्रक्षपा यद्यपि ता एव सन्ति, प्रौढा उन्मीलितमालतीसुरभयः कदम्बानिला यद्यपि ते एव सन्ति, अस्मि च – अहमपि सा एव तथापि तत्र रेवारोधसि वेतसीतरुतले सुरतव्यापारलीलाविधौ चेतः समुत्कण्ठते इति पद्यस्य

ISSN: 2249-538X

अन्वयः । कौमारं बाल्यं हृतवान् चोरितवान् इति कौमारहरः । चैत्रस्य मासस्य क्षपाः रात्रयः । उन्मीलिता विकसिता या मालती वासन्तिकलता, तया सुरभयः सुगन्धाः प्रौढा रत्युद्दीपनादिप्रागलभ्यशालिनः, कदम्बस्य तन्नाम्नः पुष्पविशेषस्य सम्बन्धिनोऽनिला वायवः । अहमपि सैव उत्कण्ठाहेत्ववस्थान्तरं प्राप्ता । तथापि तत्तदुपभुक्तसकलसामग्रीसत्वेऽपि, रेवारोधसि नर्मदातीरे । वेतसीतरुतले वेतसवृक्षस्याधः प्रदेशे । सुरतव्यापारलीलाविधौ सुरतहेतुको यो गमनादिव्यापारः, तत्सम्बन्धनी या लीला वेषविन्यासादिस्तस्या विधौ सम्पादने चेतः मनः उत्कण्ठते उत्सुकं भवतीति । यद्यपि परमरसिकतया बाल्यावस्थाम् अपहृतवान् स वरः, चैत्रमासस्य रात्रयः, विकसितमालतीगन्धवाहका रत्युद्दीपका वायवः, अहमपि तदवस्था इत्येताः सकलाः सामग्र्यः यद्यपि पूर्वमुपभुक्ता एव वर्तन्ते । तथापि सम्प्रत्यस्मिन् नर्मदानदीतीरस्थे वेतसवृक्षस्याधो देशे सुरतार्थं गमनं तदनुकूलवेषविन्याससम्पादने मम मन उत्सुकं भवतीति अस्यार्थः ।

अथ यः कौमारहर इत्यादिपद्यवर्तिनां नानालङ्काराणां स्फुटतया स्थितेः शङ्का तत्समाधानं काव्यलिङ्गविभावनाविशेषोक्तीनामलङ्काराणाम् अस्फुटत्वञ्च निरूप्यते । अनुप्रासस्य स्फुटतया स्थितिः शङ्क्यते - 'यः कौमारहरः स एव हि वरः' इत्यत्र रेफस्य साम्यात् अनुप्रासो भवतु इति ।' अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्' इति तल्लक्षणम् । स्वरस्य वैषम्येऽपि व्यञ्जनसाम्यमनुप्रासः । यथा – अमन्दानन्दसन्दोहतुन्दिलाः इत्यत्र न्दवर्णसाम्यादयमलङ्कारो भवति । तद्वत्प्रकृतस्थलेऽपि अनुप्रासः भवतु इति चेन्न। अलङ्कार्यस्य रसादेरुपस्कारकत्व एव उपमादेरनुप्रासस्य वा अलङ्कारता नान्यथा । यदि प्रासः रसानुगमो भवति तर्हि अनुप्रासोऽलङ्कारः । 'यः कौमारहरः स एव वरः' अत्र विद्यमानस्य प्रासस्य प्रकृतश्रृङ्गाररसं प्रति प्रतिकूलवर्णत्वेन रसाननुगमत्वात् नालङ्कारत्वम् । श्रृङ्गाररसाश्रयिणो माधुर्यगुणस्यानभिव्यञ्जकतया रेफावृत्तेर्निषेधस्य जागरूकत्वात्

ISSN: 2249-538X

अपृथग्यत्ननिर्वर्त्यस्यैव अनुप्रासादे रसाभिव्यञ्जकतया अलङ्कारत्वाच्च । उक्तञ्च ध्वनिकारेण

ध्वन्यात्मभूते श्रृङ्गारे यमकादिनिबन्धनम् ।
शक्तावपि प्रमादित्वं विप्रलम्भे विशेषतः ॥
रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत् ।
अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारो ध्वनौ मतः ॥ इति ।

प्राधानतया श्रृङ्गाररसाभिव्यञ्जके काव्ये प्रतिभानवतापि कविना क्रियमाणं यमक-सभङ्गाभङ्गश्लेष दुर्घटचित्रबन्धादिनिबन्धनं प्रमादाय भवति । रसादिपरस्य कवेः विभावादिप्रतिपादनायै केवलं पर्याप्तेन प्रयत्नेनैव निर्वाह्या अलङ्कारा एव रसोचिता भवन्ति । यमकादौ तु शब्दान्तरान्वेषणरूपः पृथग्यत्नः तस्य अपेक्ष्यत एव । अनुप्रासः एकप्रकारानुबन्धितया काव्ये प्रवृत्तः अङ्गिनो रसस्य अभिव्यञ्जनं प्रतिबध्नाति । उक्तञ्च तेनैव

श्रृङ्गारस्याङ्गिनो यत्नादेकरूपानुबन्धनात् ।
सर्वेष्वेव प्रभेदेषु नानुप्रासः प्रकाशकः ॥ इति ।

यः कौमारहरः इत्यादौ विद्यमानोऽपि सोऽनुप्रासः रसाभिव्यञ्जकतया कविना नोपनिबद्ध इत्येव वक्तव्यम् । तस्मात् तस्य प्रकृते नालङ्कारत्वम् । अलङ्कारत्वमेव न सिद्धमतः तस्य स्फुटता न शङ्कनीया । क्रियादीपकस्य स्फुटत्वं शङ्क्यते । क्रियादीपकञ्च

सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥

प्रस्तुतैकनिष्ठः समानधर्मः प्रसङ्गादप्रस्तुतस्याप्युपकारको भवति चेत् दीपकम् । दीपसाम्याद्दीपकम् । प्रासादार्थमारोपितो दीपो रथ्यायां यथोपकरोति । इदं क्रियादीपकं गुणदीपकञ्चेति द्विविधम् साधारणधर्मस्य क्रियागुणभेदेन द्वैविध्यात्। क्रियादीपकं यथा –


ISSN: 2249-538X

कृपणानां धनं नागानां फणमणिः केसराः सिंहानाम् ।
कुलबालिकानां स्तनाः कुतःस्पृश्यन्तेऽमृतानाम् ॥

अमृतानां जीवतां कृपणानां लुब्धानां धनं नागानां सर्पाणां फणमणिः फणारत्नम्, सिंहानां केसरिणां केसराः कुलबालिकानां कुलस्त्रीणां स्तनाः कुतः स्पृश्यन्ते न कथञ्चित् स्प्रष्टुं शक्यन्ते इति तदर्थः । अत्र वर्णनीयत्वेन प्रकृतानां कुलवधूस्तनानाम् उपमानत्वेन अप्रकृतानां कृपणादीनां स्पर्शनक्रियारूपसाधारणधर्मस्य सकृदुपादानात् क्रियादीपकम् । यः कौमारहर इत्यादावपि वर-चैत्रक्षपा-कदम्बानिल-रात्रिषु अस्मीति क्रियायाः पुरुषवचनविपरिणामेनान्वयेन क्रियादीपकं स्फुटं खल्विति शङ्काशयः । अत्र समाधानम् –अस्मीति नासधातो रूपम् । अहमर्थकमव्ययमेतत् । नायिकया अहमपि सैवेत्यर्थे सा चैवास्मीत्युक्तत्वात् । अस्मीति क्रियापदञ्चेदपि न पुनः क्रियादीपकमत्र शङ्क्यम् । अस्मीत्यनेन अन्वयं लभमानानां वरादीनां सर्वेषां प्राकरणिकत्वेन प्रकृतत्वात् दीपके तु प्रकृताप्रकृतयोरेकक्रियान्वयस्यापेक्षितत्वात् तद्विरहेण तत्स्फुटताशङ्कापि नोदेति । किञ्च पुरुषवचन विपरिणामस्यापि स्फुटतयान्वयो न हृदयङ्गमः । एवं क्रियादीपकस्य स्फुटत्वशङ्का निरस्ता । अथ परिसंख्यालङ्कारस्य स्फुटत्वेन प्रतीतिः शङ्क्यते । परिसंख्या च

किञ्चित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते ।
तादृगन्यव्यपोहाय परिसंख्या तु या स्मृता ॥

प्रमाणान्तरेणावगतमपि वस्तु शब्देन प्रतिपादितं प्रयोजनान्तराभावात् सदृशवस्त्वन्तरव्यवच्छेदाय यत् पर्यवस्यति सा भवेत् परिसंख्या । तदन्यस्य निषेधाय तस्योक्तिरित्यर्थः । यथा-

भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥

प्रायः महतां शक्तिः भवे शिवे न विभवे ऐश्वर्ये व्यसनं शास्त्रे न युवतिकामास्त्रे युवतिरूपे मदनास्त्रे चिन्ता यशसि न वपुषीत्यर्थः । अत्र भक्त्यादीनां


ISSN: 2249-538X

विभवाद्यधिकरणत्वस्य निषेधः भवादीनाञ्च तस्योक्तिरस्तीति परिसंख्यालङ्कारः । प्रकृते यः कौमारहरः इत्यादौ एवकारस्य प्रयोगात् वराद्यन्यनिषेधः, वरादेरुक्तिश्चेति लक्षणसमन्वयात् परिसंख्यालङ्कारः स्फुट इति शङ्काशयः । तत्समाधानम् – अत्र प्रयुक्तस्य एवकारस्य अभेदः अर्थः न तु इतरनिषेधः । पूर्वानुभुक्तवरादेर्वर्तमानकालिकवरादिना सह अभेदप्रतिपादकः एवकारः । एवञ्च तस्य इतरनिषेधपरत्वायोगात् न परिसंख्यालङ्कारः । अथ समुच्चयालङ्कारस्य स्फुटत्वं शङ्क्यते । समुच्चयश्च

तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत् ।
समुच्चयोऽसौ स त्वन्यो युगपद्या गुणक्रियाः ॥

प्रकृतस्य कार्यस्य एकस्मिन् साधके स्थिते साधकान्तराणि यत्र सम्भवन्ति स एकः समुच्चयः । अन्यः गुणयोर्यौगपद्यरूपः, क्रिययोर्यौगपद्यरूपः गुणक्रिययोर्यौगपद्यरूपश्चेति त्रिविधः । तत्र गुणक्रिययोर्यौगपद्यरूपो यथा –

कलुषञ्च तवाहितेष्वकस्मात्सितपङ्केरुहसोदरश्रि चक्षुः । हे महीपतीन्द्र स्वभावतः श्वेतकमलतुल्यकमलश्रीकं तव नेत्रं शत्रुषु अकस्मात् कलुषं कषायञ्च। तेषां शत्रूणां वपुषि विपत्तीनां कटाक्षैः प्रस्फुटं पतितञ्चेत्यर्थः । अत्र कलुषत्वपतनयोर्गुणक्रिययोर्यौगपद्यं चकारद्वयगम्यं समुच्चयालङ्कारः । तथा यः कौमारहरः इत्यादिपद्ये कौमारहरणं क्रिया उन्मीलितमालतीसुरभित्वादिर्गुणश्च उक्तः । चकारोऽपि पठितः । अतोऽत्र गुणक्रिययोर्यौगपद्यरूप- समुच्चयालङ्कारो भवत्विति शङ्काशयः । तस्य समाधानं यद्यपि अत्र गुणः क्रिया च बोध्येते, एवं चकारोऽपि वर्तते । किन्तु न तयोर्गुणक्रिययोर्यौगपद्यम् । खले कपोतन्यायेन युगपद्भावापन्नयोरेव तयोः सत्त्वे समुच्चयः । अत्र कौमारहराद्युपभुक्तसामग्रीविशेषणानां न तथा यौगपद्यमित्यतः समुच्चयालङ्कारशङ्का न कार्या । अथ तुल्ययोगितालङ्कारः शङ्क्यते । स तुल्ययोगितालङ्कारश्च नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता' इति लक्षितः ।


ISSN: 2249-538X

केवलप्रकृतानां केवलाप्रकृतानां वा गुणक्रियादिरूपैकधर्मान्वयस्तुल्य-योगितेत्यर्थः। केवलप्रकृतानां क्रियारूपैकधर्मान्वयस्योदाहरणम् –

पाण्डुक्षामं वदनं हृदयं सरसं तवालसञ्च वपुः ।
आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः ॥

हे सखि तव पाण्डुशुभ्रं क्षामं कृशञ्च वदनम्, सरसं सानुरागम् अन्नरससहितञ्च हृदयम्, अत एव आलस्ययुक्तं वपुः शरीरञ्च नितान्तं हृदयमध्ये क्षेत्रियरोगम् आवेदयति ज्ञापयतीत्यर्थः । अत्र विरहानुभावत्वेन प्रकृतानामेव पाण्डुतादीनां धर्मतया आवेदनक्रियारूपः साधारणो धर्मः सकृदुपात्त इति तुल्ययोगितालङ्कारः। अत्र प्रकृताप्रकृतभावः उपमानोपमेयभावार्थकः । यः कौमारहर इत्यादौ पद्ये वरचैत्ररात्र्यादीनां सर्वेषां प्रकृतत्वेऽपि नोपमेयोपमानभावः । अतोऽत्र तुल्ययोगितालङ्कारो न शङ्कनीयः । अथ स्मरणालङ्कारः शङ्क्यते । स्मरणालङ्कारश्च 'यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः स्मरणम्' इति लक्षितः । सदृशदर्शनोद्बुद्धसंस्कारजन्या स्मृतिः स्मरणालङ्कार इत्यर्थः । 'पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः' इति तदुदाहरणम् । मुखसदृशस्य पङ्कजस्य दर्शनेन उद्बुद्धसंस्कारवशात् मुखस्य स्मृतेः स्मरणालङ्कारः । 'स एव हि वरः' इत्यादेः सदृशदर्शनप्रयोज्यत्वाभावात् न स्मरणालङ्कारः । अत्र प्रत्यभिज्ञामात्रम् । अथ काव्यलिङ्गं शङ्क्यते । काव्यलिङ्गं हि – काव्यलिङ्गं हेतोर्वाक्यपदार्थता इति लक्षितम् । वाक्यार्थत्वेन पदार्थत्वेन च हेतोरभिधानं काव्यलिङ्गमित्यर्थः । 'जितोऽसि मन्दकन्दर्प मच्चित्तेऽस्ति त्रिलोचनः' इति तस्य उदाहरणम् । यतो मच्चित्तेऽस्ति त्रिलोचनः अतः मन्दकन्दर्प त्वं मया जितोऽसि इति । कन्दर्पजयरूपं कार्यं प्रति 'मच्चित्तेऽस्ति त्रिलोचनः' इति स्वान्तःकरणे शिवसन्निधिहेतुकथनात् काव्यलिङ्गम् । यः कौमारहर इत्यादौ पद्ये ' ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः' इत्यत्र यतः सुरभयः अतः प्रौढाः कदम्बानिला इति हेतोः कल्पयितुं शक्यतया काव्यलिङ्गत्वेऽपि न तस्य स्फुटत्वम् । रसवदलङ्कारो न शङ्कनीयः ।

ISSN: 2249-538X

रसवदलङ्कारश्च – अपरस्य रसादेर्वाच्यस्य प्रधानस्य अङ्गं रसादि रसवदलङ्कार इति ।

प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रदादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥

इति ध्वनिकारस्तत्स्वरूपमाह । तदुदाहरणम् –अयं स रशनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः । इति । महाभारते स्त्रीपर्वणि रणभूमौ पतितं भूरिश्रवसः छिन्नं हस्तमादाय तद्वधूविलापोक्तिरियम् । अत्र श्रृङ्गारः करुणश्च रसौ अभिव्यज्येते । श्रृङ्गाररसः प्रधानस्य करुणरसस्य अङ्गमित्यतः स श्रृङ्गाररसः रसवदलङ्कार इत्युच्यते । एवं यः कौमारहरः इत्यादौ पद्ये व्यज्यमानो विप्रलम्भश्रृङ्गारः वाच्यार्थस्य अङ्गमिति न शङ्कनीयम् । स वाच्यार्थापेक्षया अधिकचमत्कारित्वात् प्रधानः । अप्राधान्ये एव रसस्य अलङ्कारत्वम् । अतः काव्यप्रकाशकारः 'रसस्य च प्राधान्यान्नालङ्कारता' इत्याह। यद्यपि भामहोद्भटादिमतेन रसवदलङ्कारशङ्कासमाधानविचारः प्रस्तुतः। मम्मटमते तु रसवदादीनां नालङ्कारत्वमेव ।

विभावनालङ्कारो विशेषोक्त्यलङ्कारश्च अस्मिन् पद्ये वर्तते । विभावनालङ्कारः 'क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना' इति लक्षितः । प्रसिद्धकारणाभावेऽपि कार्योत्पत्तिर्विभावनेत्यर्थः । अप्यलाक्षारसासिक्तं रक्तं त्वच्चरणद्वयम् इति तदुदाहरणम् । लाक्षारससेकेन विनापि तव चरणौ रक्तावित्यत्र लाक्षारससेकस्य हेतोरभावेऽपि चरणयो रक्तत्वस्य कार्यस्य उत्पत्तेर्वर्णनाद्विभावना । अत्र अलाक्षारसासिक्तमित्यत्र स्थितेन नञा कारणप्रतिषेधः स्फुटः । यः कौमारहर इत्यादौ पद्ये वरादिसामग्रीणामनुपभुक्तत्वं कारणम् । उत्कण्ठा तत्कार्यम् । वरादिसामग्रीणामनुपभुक्तत्वस्य कारणस्य असत्त्वेऽपि उत्कण्ठारूपकार्यस्य उत्पत्तिवर्णनाद्विभावना । किन्तु न सा स्फुटा । चेतः समुत्कण्ठत इति कार्यस्य स्पष्टतया उक्तत्वेऽपि वरादिसामग्रीणामुपभुक्तत्वकारणस्य अभावः नञादिना स्पष्टतया न निर्दिष्ट


ISSN: 2249-538X

इत्यतः तस्या अस्फुटत्वम् । एवं विशेषोक्तिरपि । तस्या लक्षणम् – विशेषोक्तिरखण्डेषु कारणेषु फलान्वयः' इति । प्रसिद्धकारणेषु उक्तेषु सत्सु कार्याभाववचनं विशेषोक्तिरित्यर्थः । तदुदाहरणम् – 'हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि' इति । स्मरदीपज्वलनस्य कारणस्य सत्वेऽपि स्नेहक्षयरूपकार्यस्य अभावो वर्णितः । अत्र उपात्तेन नञा कार्याभावः स्फुटः । यः कौमारहर इत्यादौ पद्ये उपभुक्तत्वरूपकारणस्य सत्त्वेऽपि अनुत्कण्ठारूपतत्कार्यस्याभावकथनाद्विशेषोक्तिः । अत्रापि कार्याभावः अर्थात्सिद्धोऽपि नञादिना न निर्दिष्ट इत्यतो विशेषोक्तिर्न स्फुटा । विभावनाविशेषोक्त्योः सन्देहसङ्करस्य स्फुटत्वमपि न शङ्कनीयम् । द्वयोरस्फुटत्वात् तन्मूलकसन्देहसङ्कारस्यापि अस्फुटत्वमेव ।

एवञ्च यः कौमारहर इत्यादौ पद्ये विभावना विशेषोक्तिः काव्यलिङ्गञ्चेति त्रय अलङ्कारा अस्फुटतया वर्तन्ते । अनुप्रास-क्रियादीपकपरिसंख्या-समुच्चय-स्मरण-तुल्ययोगिता-रसवदलङ्काराश्च स्फुटतया अस्फुटतया वा न वर्तन्त इति सिद्धम् । अस्फुटतयापि काव्ये अलङ्कारस्य स्थितिं वदत आचार्यस्य मम्मटस्य मतेन काव्ये अलङ्कारः स्फुटः प्रयोक्तव्यः । नो चेदस्फुटो वा स प्रयोक्तव्य एव इति ज्ञायते । तन्नियतस्थितिश्च काव्यप्रकाशे पुनरष्टमोल्लासे आचार्येणोक्तेन अलङ्कारसामान्यलक्षणेन स्पष्टं भवति । उपकुर्वन्ति तं सन्तमित्यनेन अलङ्काराः सम्भविनं रसमुपकुर्वन्ति, यत्र रसो नास्ति तत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः, क्वचित्सन्तमपि रसं नोपकुर्वन्तीति त्रिधालङ्कारस्थितेः प्रतिपादनाच्चतुरस्रम् । एवञ्चेत् काव्यलक्षणे पुनः सालङ्कारौ इति कुतो नोक्तमिति न शङ्कनीयं तथात्वे काव्ये तस्य नियतस्थितिः स्फुटा न सिध्यतीति शम् ।

**********


ISSN: 2249-538X

# काव्यत्वस्य शब्दार्थोभयनिष्ठत्वम्

डा. चन्द्रकला आर्. कोण्डी

काव्यशास्त्राध्येतॄणां मनसि सर्वप्रथमतया काव्यलक्षणविषयकजिज्ञासैव जायत इत्यत्र न काऽपि संशीतिः । तां जिज्ञासां निवर्तयितुं सर्वेऽप्यालङ्कारिकाः स्वग्रन्थेषु काव्यलक्षणं प्रतिपादयामासुः । तेषु केषाञ्चिल्लक्षणानि शब्दार्थयोः काव्यत्वं निरूपयन्ति । कतिपयलक्षणानि विशिष्टशब्दस्यैव काव्यत्वं समर्थयन्ति। कानिचन लक्षणानि तु शब्दार्थौ विशिष्टशब्दं वा कण्ठतोऽनुक्त्वैव काव्यं लक्षयन्ति । तत्र शब्दार्थौ सहितौ काव्यमिति भामहः, शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि, बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणीति कुन्तकः, काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते इति वामनः, तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति मम्मटाचार्यश्च शब्दार्थपरकतया काव्यं लक्षयामासुः । शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलीति दण्डी, वाक्यं रसात्मकं काव्यमिति विश्वनाथः, रमणीयार्थप्रतिपादकः शब्दः काव्यमिति पण्डितराजजगन्नाथश्च विशिष्टशब्दपरकतया तथा । तथैव काव्यप्रकाशटीका-कारेषु चण्डीदास-गोविन्दभट्ट-श्रीवत्सलाञ्छनाख्याः मम्मटाचार्यस्य शब्दार्थपरककाव्यलक्षणं विरुध्य काव्यत्वस्य शब्दनिष्ठत्वमेवाङ्गीकुर्वन्ति । एतेषां लक्षणानामनुशीलनेन काचित् संशीतिः सर्वेषां मनसि भवति यत् काव्यं शब्दार्थयोर्वर्तते उत शब्दमात्रे वेति । स विचारोऽत्र यथामति प्रस्तूयते ।

शब्दार्थोभयपरककाव्यलक्षणानि आचार्यभामहस्य काव्यलक्षणेन प्रेरितानि, शब्दपरकाणि तु दण्डिनः । प्राचीनालङ्कारिकेषु दण्डिनं विहाय काव्यत्वस्य शब्दार्थपरकतैव प्राधान्येन प्रतिपाद्यते ।

आद्याचार्यः भामहः शब्दार्थौ सहितौ काव्यमिति काव्यं लक्षयामास । अलङ्कारवादी एषः सर्वमपि काव्यतत्त्वम् अलङ्कार एवान्तर्भावयति । तथापि


ISSN: 2249-538X

शब्दालङ्कारार्थालङ्कारयमकोपमादीनां विषयेऽपि "शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः" इति उभयविधालङ्कारेऽपि आत्मनोऽभीष्टतां प्रदर्शयति ।

ये शब्दपरकतया काव्यं लक्षितवन्तस्तेऽपि प्रकारान्तरेण अर्थेऽपि काव्यत्वमङ्गीकुर्वन्त्येव । केवलं प्रतिपादनरीतौ विशेषः । प्राचीनेषु दण्डी शब्दार्थव्यवच्छिन्ना पदावलीति काव्यं लक्षितवान् । इष्टार्थविशिष्ट-शब्दसन्दोहस्यैव काव्यत्वं तन्मते । 'इष-इच्छायामिति धातोः 'क्त'प्रत्यये निष्पन्नतया इच्छाविषयीभूत इत्यर्थः स्वीकरणीयः । तत्र च मनोहरस्यैव रमणीयार्थस्यैव वा सहृदयेच्छाविषयीभूतत्वात् स रमणीयार्थः गृह्यते। तेनार्थेन विरहितस्य सामान्यशब्दस्य काव्यत्वं नास्ति ।

एवमेव पण्डितराजजगन्नाथस्य काव्यलक्षणेऽपि काव्यलक्षणभूतः शब्दः रमणीयार्थपदेन विशिष्ट एव ।

एवं ये शब्दपरकतया काव्यलक्षणं प्रत्यपादयन्, ते केवलशब्दस्य काव्यत्वं नोक्तवन्तः, किन्तु विशिष्टपदस्यैव । तच्च वैशिष्ट्यमर्थाधारितम् । स चार्थः दोषाभावगुणालङ्कारैः सम्पादितो रमणीयार्थ एवेति समेषामालङ्कारिकाणां दोषगुणालङ्काराणां विवेचनेन स्पष्टं भवति । दण्डिना इष्टार्थरूपेण, जगन्नाथेन च रमणीयार्थरूपेण इत्यादि ।

ध्वनिमार्गप्रवर्तकः आनन्दवर्धनः यद्यपि शब्दपरकतया शब्दार्थपरकतया वा लक्षणं न चकार काव्यस्य, तथापि तत्प्रतिपादिततत्त्वावलोकनेन शब्दार्थयोरेव काव्यत्वं तस्य सम्मतमिति ज्ञायते । चतुर्थोद्योते आनन्दवर्धनः साहित्येनावस्थितयोः शब्दार्थयोः काव्यत्वं स्पष्टयति। "शब्दार्थयोः साहित्येन काव्यत्वे कथं तथाविधे विषये काव्यव्यवस्थेति चेत्" इति प्रश्नं विधाय समनन्तरमेव समाधानान्तरकथनेन, "परोपनिबद्धार्थविरचने यथा तत्काव्यत्वव्यवहारस्तथाविधानां काव्यसन्दर्भाणाम्" इत्युक्तम् । तेन आनन्दवर्धनेनापि शब्दार्थयोरुभयोः काव्यत्वं सिद्धम् ।



ISSN: 2249-538X

अभिनवगुप्तमतानुसारेणापि शब्दार्थयोरेव प्राधान्येन काव्यस्वरूपत्वं निर्विवादम् । यतः 'शब्दार्थशरीरं तावत् काव्यम्' इति ध्वन्यालोकपङ्क्तिसन्दर्भे व्याचक्षाणः लोचनकारः कथयति-"तावद्ग्रहणेन कस्याप्यत्र न विप्रतिपत्तिरिति दर्शयति" इति । अनेन तावत्पदव्याख्यानेन शब्दार्थयुगलस्य काव्यत्वविषये सर्वसम्मतिं दर्शयन्नेव स्वसम्मतिमपि सूचितवान् । किन्त्वन्यत्र अर्थात् भट्टनायकमतनिरूपणावसरे अभिनवगुप्तपादा एवं वदन्ति-"काव्यस्यात्मनः शब्दस्य" इति ।[1] अभिनवभारत्यामपि स्वमतनिरूपणावसरे "काव्यात्मकादपि शब्दात्"[2] । अनेन अभिनवगुप्ताचार्याणामपि काव्यपार्यन्तिकस्वरूपविषये शब्दैकपक्षपातः अस्ति वेति सन्देहः जागरितो भवति, तथापि प्रतिपादयिषितार्थप्रतिपादनदृष्ट्या काव्यपदस्य शब्दमात्रे प्रयोगेऽपि अभिनवगुप्ताभिमतं पार्यन्तिकं काव्यस्वरूपं शब्दार्थयुगल एवेति उपर्युक्ततावत्पदव्याख्यानस्वारस्यात्, गुणालङ्कारौचित्यसुन्दरशब्दार्थशरीरस्य सति ध्वननाख्यात्मनि काव्यरूपताव्यवहारः, इति लोचनग्रन्थाच्च प्रतीयते ।

भोजराजः सरस्वतीकण्ठाभरणे-

निर्दोषं गुणवत्काव्यम् अलङ्कारैरलङ्कृतम् ।
रसान्वितः कविः कुर्वन्---[3] इति काव्यस्वरूपं वर्णयति । इयं कारिका निर्दोषस्य गुणवतः अलङ्कारैरलङ्कृतस्य रसान्वितस्य शब्दस्य काव्यत्वं प्रतिपादयति ? उत शब्दार्थयुगलस्येति सन्देहो जायते । किन्तु शृङ्गारप्रकाशे तेन, "तत् (काव्यं) पुनः शब्दार्थयोः साहित्यमामनन्ति तद्यथा, शब्दार्थौ सहितौ काव्य"मिति[4] इत्युक्तम् । अस्मात् ग्रन्थात् शब्दार्थयुगलस्यैव काव्यत्वं भोजाभिमतमिति ज्ञायते । शब्दार्थयोः साहित्यं तेन अभिधा-विवक्षा-

[1] ध्व.लो.. लो. पृ. १८२

[2] अभिनवभारती-भा-१, पृ-६५२

[3] स.कण्ठ.पृ-१

[4] शृ.प्र. भा-I, पृ-२


ISSN: 2249-538X

तात्पर्य-प्रतिभाग-व्यपेक्षा-सामर्थ्य-अन्वय-एकार्थीभाव-दोषहान-गुणोपादान-अलङ्कारयोग-रसावियोगभेदेन द्वादशधा विभक्तम्[1]। एषु सम्बन्धेषु प्रथमोऽष्टौ सम्बन्धाः सामान्यलौकिकवाक्ये शब्दार्थयोः सम्बन्धभावं भजन्ते । दोषहानादिकं तु सम्बन्धचतुष्टयं काव्यसम्बन्धिशब्दार्थयोरेव स्यादित्याशयेन भोजः निर्दोषं गुणवदित्यादिना काव्यस्वरूपं निरूपयति । एवं निर्दिष्टं सगुणम् अपेक्षितालङ्कारसौन्दर्यं रसयुक्तं शब्दार्थयुगलमेव काव्यमिति भोजराजस्य काव्यलक्षणं फलति ।

औचित्यप्रस्थानप्रवर्तकः क्षेमेन्द्रः यः औचित्यमेव काव्यजीवितं मत्वा, तद्विना गुणालङ्कारावपि निष्फलावेवेति अभिप्रैति, सः औचित्यविचारचर्चायाम्, "परस्परोपकाररुचिरशब्दार्थरूपस्य काव्यस्य" [2] इत्युक्त्वा काव्यस्य शब्दार्थोभयात्मकत्वं प्रत्यपादयत् ।

वक्रोक्तिसिद्धान्ताधारेण काव्यं लक्षयता कुन्तकाचार्येण

शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि ॥

इत्युक्तम् । वर्णविन्यासादिषड्विधवक्रताशालिनि सहृदयहृदयाह्लादिनि बन्धे साहित्येनावस्थितौ शब्दार्थावेव काव्यमिति कथनात् कविकौशलकल्पित-कमनीयतातिशयशाली वाचकः शब्द एव काव्यम् अथवा तादृशार्थ एव काव्यमिति पक्षद्वयमपि निरस्तं भवति, इत्यभिप्रायं प्रकटीकुर्वाणः कुन्तकः स्वाभिमतं शब्दार्थयोरेव काव्यत्वं गाढं समर्थयति-"तेन यत्केषाञ्चिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति, केषाञ्चिद्वाच्यमेव रचनावैचित्र्यचमत्कारि काव्यम्, पक्षद्वयमपि निरस्तं भवति। [3]

---

[1] श्रृ.प्र.भा-I, पृ-३

[2] औ.वि.च.पृ.५

[3] वक्रोक्तिजीवितम्-पृ. १८


ISSN: 2249-538X

विद्याधरः एकावलीग्रन्थे "शब्दार्थौ वपुरस्य तत्र विबुधैरात्माभ्यधायि ध्वनिः"[1] इत्युक्तवान् । विद्यानाथः, "गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ"[2] इति । विश्वेश्वरकविचन्द्रः "वागर्थौ सचमत्कारौ काव्यं काव्यविदो विदुः"[3] एवं यद्यपि साहित्यशास्त्रे शब्दपरककाव्यलक्षणानि-अर्थपरककाव्यलक्षणानि च सन्ति तथापि शब्दार्थपरककाव्यलक्षणानामेव बाहुल्यं दृश्यते । तत्र,

शब्दपरकलक्षणं यैः कृतं तैः तस्य कारणं तावन्नोपन्यस्तं स्पष्टतया । किन्तु पण्डितराजजगन्नाथः तदेवमुपन्यस्यति-

"शब्दार्थयुगलं न काव्यशब्दवाच्यम्, मानाभावात् ।" "काव्यमुच्चैः पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतम्, अर्थो न ज्ञातः, इत्यादिविश्वजनीनव्यवहारतः, प्रत्युत शब्दविशेष्यस्यैव काव्यपदार्थत्व-प्रतिपत्तेश्च। एतादृशव्यवहारेभ्यः काव्यपदस्य शब्द एव शक्तिः, न त्वर्थे । तथा हि-व्यवहारः शक्तिग्राहकप्रमाणेषु मूर्धन्यभूतः । स च काव्यपदस्य शब्द एव शक्तिं निरूपयति । यतः श्रावणसाक्षात्कारगोचरत्वं हि शब्दस्यैव, नार्थस्य । एवं कण्ठताल्वाद्यभिघातसंयोगाश्रयत्वमपि शब्द एव सम्भावनीयम्, न त्वर्थे । किञ्च काव्यादर्थोऽवगम्यते इत्यत्र काव्यपदात् पृथक्, अर्थपदस्योपादानात्, अर्थस्य च सामान्यतः शब्दादेवावगतेः तादृशव्यवहारादपि काव्यपदस्य मुख्यतया शब्दार्थकत्वमेव ज्ञायते । न ह्यर्थः श्रूयते पठ्यते वा । अतः निरुक्तव्यवहारप्रामाण्यात् काव्यशब्दस्य शब्द एव शक्तिरिति ज्ञायते "।

एष काव्यत्वस्य शब्दनिष्ठत्ववादः, आपाततः बाह्यप्रमाणेभ्यश्च समीचीन एवेति भाति । किन्तु काव्यम् आन्तरप्रमाणकम् । काव्यजगति सहृदयानामनुभवापेक्षया अधिकं प्रमाणं वेदानामपि न । सहृदयानां तु

[1] एकावली-पृ.२१

[2] प्रतापरुद्रीयम्-पृ.२९

[3] चमत्कारचन्द्रिका-पृ-२ ।

ISSN: 2249-538X

रसास्वादस्य शब्दापेक्षया अर्थ एव प्रधानं कारणमिति तस्यैव प्राधान्यं काव्ये वर्तत एव । तदतिरिच्यापि अनेकैः प्रमाणैः शब्दार्थयुगलस्यैव काव्यत्वमेवं समर्थयितुं शक्यम्-

१. शब्दप्रयोगः अर्थमुद्दिश्यैव क्रियते । न हि अर्थप्रतीतिं विना शब्दप्रयोगस्य सार्थक्यमस्ति ।

२. काव्यस्यात्मा रसः प्राधान्येनार्थेनैवाक्षिप्यते । यद्यपि शब्दशक्तिमूलध्वन्यादौ शब्दस्यैव प्राधान्यमिति भाति, तथापि तादृशशब्दशक्त्या व्यज्यमानस्यार्थस्यैव प्राधान्यं कविविवक्षितत्वात् ।

३. चित्रकाव्ये अर्थापेक्षया शब्दस्यैव चमत्कारित्वात् तन्नाद्रियते सहृदयैः आलङ्कारिकैश्च । आनन्दवर्धनेन तु चित्रकाव्यं काव्यच्छायामात्रमिति स्पष्टमुक्तम्।

४. महिमभट्टादीनां मतानुसारं शब्दार्थयोः साध्यसाधनभावाङ्गीकारेऽपि साधनापेक्षया साध्यस्यैव प्राधान्यात् साधनभूतस्य शब्दस्यापेक्षया साध्यभूतस्यार्थस्य प्राधान्यं सिद्ध्यत्येव ।

५. आलङ्कारिकैः रसधर्माणां गुणानां निरूपणावसरे शब्दगुणा अर्थगुणाश्चेति द्वैविध्यमुक्तम् । तथैवालङ्कारा अपि । दोषास्तु शब्द-अर्थादिपञ्चसु उक्ताः सन्ति । एवं दोष-गुणा-लङ्कारादीनामुभयनिष्ठत्वे काव्यत्वं कथं शब्दमात्रनिष्ठं भवतीति चिन्तनीयम् ।

६. पण्डितराजजगन्नाथेन या भावना प्रतिपादिता सा अर्थसम्बद्धैव । पुनः पुनरनुसन्धानात्मा भावनाविशेष इत्यत्र अनुसन्धीयते अर्थ एव न तु शब्दः। एवं सति तेन कथं काव्यलक्षणं शब्दपरकतया कृतमिति आश्चर्यमनुभूयते ।

७. अपि च जगन्नाथकृतकाव्यविभागेऽपि तस्य काव्यलक्षणस्यानन्वय एव भासते । अधमाधमकाव्येऽङ्गीकृते तत्र शब्दस्य रमणीयार्थ-प्रतिपादकत्वाभावात् रमणीयार्थप्रतिपादकत्वरूपं काव्यलक्षणं न घटत इति तन्नाङ्गीकृतमित्युक्तं जगन्नाथेन । तत्तु अङ्गीकर्तुमुचितमेव । किन्तु मम्मटादिभिः


ISSN: 2249-538X

अधमकाव्यत्वेनाङ्गीकृतं वाच्यचित्रं जगन्नाथेन मध्यमत्वेन परिगणितम् । तत्र कारणं तु अर्थस्य रमणीयतैव । किन्तु अधमकाव्यं, यत्र अर्थचमत्कृत्युपस्कृतशब्दचमत्कृतिः प्राधान्यं भजते, तत्र क्व वर्तते रमणीयार्थत्वं शब्दस्य ?

एवं काव्यस्य परमप्रयोजनस्य रसास्वादस्य जनकत्वं शब्दापेक्षया अर्थस्यैव प्राधान्येन

सङ्गच्छते। तथापि तादृशार्थप्रतिपत्तौ तादृशस्यैव शब्दस्य आवश्यकता न केनापि निराकृता । शब्दपरककाव्यलक्षणरचयितृभिः अर्थापेक्षया शब्दस्य प्राधान्यमभीप्सितम् । किन्तु शब्दार्थोभयपरत्वेन लक्षणविधायिभिः शब्दः न न्यक्कृतः । महाकविभिरपि तादृशशब्दैर्विना विवक्षितार्थाभिव्यक्तिर्न शक्यत इति ज्ञात्वैव तैः काव्यलक्षणे शब्दार्थोभयस्यैव काव्यत्वमुक्तम्, न केवलमर्थस्य । आस्वादव्यञ्जकत्वम् उभयत्राविशेष इत्येव तेषामभिप्रायः । न केवलं काव्यलक्षणानां किन्तु महाकवीनां काव्यानामवलोकनेनापि शब्दार्थोभयनिष्ठत्वमेव काव्यत्वस्य समीचीनमिति भाति । इति शम् ।

**********


ISSN: 2249-538X

# अनौचित्यप्रकारेषु विधेयाविमर्शः

डा. कोम्पेल्लि विनयकुमारः

शब्दार्थशरीरात्मकस्य काव्यस्य आत्मा रसः। रामायणादारभ्य सर्वेषु महाकविप्रबन्धेषु रस एव जीवातुभूतः। स च रसः विभावानुभावव्यभिचारिणाम् औचित्येन काव्ये सन्निवेशात् सिद्ध्यति। प्राणभूतस्य अस्य रसस्य प्रतीतौ ये विघ्नकारिणः ते सर्वेऽपि काव्ये दोषा अत एव हेयाश्च।

आनन्दवर्धनाचार्यः दोषानिमान् अनौचित्यशब्देन प्रतिपादयति। विवक्षितरसादिप्रतीतिविघ्नविधायित्वम् अनौचित्यमिति सामान्यलक्षणम्। इदं च अर्थविषयकं शब्दविषयकं चेति द्विविधम्। तत्र विभावादीनाम् अयथायथं रसेषु यो विनियोगः तन्मात्रलक्षणं प्रथमम् आनन्दवर्धनेन समग्रतया प्रतिपादितम्। शब्दविषयकमनौचित्यं तु विधेयाविमर्शः, प्रक्रमभेदः, क्रमभेदः, पौनरुक्त्यं, वाच्यावचनञ्चेति बहुविधम्।

प्राधान्येन प्रतिपिपादयिषितः अर्थः विधेयः, तस्य उपसर्जनीकरणात् अननुसन्धानं विधेयाविमर्शः।

**अयथावद्विनिर्देशो विधेयांशस्य यत्र तत्।**
**अविमृष्टविधेयांशमलङ्कारविदो विदुः।।**

इत्युक्त्या अविमृष्टविधेयांश एव विधेयाविमर्शः।

यत्र द्वयोः अर्थयोः उद्देश्यविधेयाभावः तत्रायं विधेयाविमर्शदोषः। तत्र उद्देश्यं नाम अनुवाद्यं, तत् पूर्वमुपस्थाप्यम्। विधेयं साध्यम् एतदुत्तरमुपस्थाप्यम्। तन्त्रवार्तिके भट्टपादैः एतदेवोक्तम् -

**यच्छब्दयोगः प्राथम्यं सिद्धत्वञ्चाप्यनूद्यता।**
**तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता।।** इति।।

विधेयस्य अंशस्य विमर्शाभावेन गुणीभूतत्वम् अविमृष्टविधेयांशत्वम्। "उद्देश्यविधेययोः पौर्वापर्यभावो नियन्त्रितः" इति लक्षणम् । उक्तं च


ISSN: 2249-538X

व्यक्तिविवेके महिमभट्टेनापि -

**अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्।**
**न ह्यलब्धास्पदं किञ्चित्कुत्रचित्प्रतितिष्ठति।।**
**विधेयोद्देश्यभावोऽयं रूप्यरूप्यकतात्मकः।**
**न च तत्र विधेयोक्तिरुद्देश्यात्पूर्वमिष्यते।।**इति।।

यच्छब्दप्रतिपाद्यं सिद्धत्वेन प्रतीयमानमुद्देश्यम्, तदादिशब्दप्रतिपाद्यम् उद्देश्यसम्बन्धितया अपूर्वबोधविषयीभूतं विधेयम् इति। अर्थात् वाक्ये अंशद्वयं विद्यते – उद्देश्यांशः, विधेयांशश्चेति। विधातुं योग्यं विधेयम्। यत्र विधीयते तत् उद्देश्यम्। "शङ्खः पूणड्डरो भवति" इति वाक्ये शङ्खमुद्दिश्य पाण्डुरत्वं विधीयते। अस्मिन्वाक्ये शङ्खरूपः उद्देश्यांशः पूर्वं प्रयुक्तः, तदनन्तरं पाण्डुरः इति विधेयांशः। तथैव "यः क्रियावान् स पण्डितः" इत्यादौ क्रियावन्तमुद्दिश्य अभेदेन पण्डितः स्वुरूपसम्बन्धेन पण्डितत्वं वा विधीयते। अपि च "इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः" इत्येव, "पर्वतो वह्निमान्" इत्येव चेष्यते न व्यत्ययेन। अस्य वैपरीत्ये विधेयाविमर्शदोषः सम्भवति।

**"**न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः" इति साहित्यदर्पणे स्थिते प्रसिद्धे उदाहरणश्लोके "न्यक्कारो ह्ययमेव मे यदरयः" इत्यत्र वाक्यद्वयस्य विपरीतक्रमेण उपन्यासात् वाक्यगतः विधेयाविमर्शदोषः। निर्दुष्टं तु "मे यदरयः अयमेव न्यक्कारः" इत्येवं स्यात्। किन्तु निर्देशोचितस्य वाक्यद्वयस्य विपरीतक्रमेण उपन्यासात् वाक्यगतः विधेयाविमर्शदोषः।

तत्रैव श्लोके "स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः" इति चतुर्थपादे "वृथोच्छूनैः" इत्यत्र भूजानाम् उच्छूनतया वृथात्वं विधेयं यत् समासे गुणीभावात् अनुवाद्यप्रतीतिकृदिति पदगतः विधेयाविमर्शः। अत्र उच्छूनत्वं वृथा इति विधेयाविमर्शः। तत्पुरुषसमासे प्रायेण उत्तरपदस्यैव प्राधान्यात् पूर्वपदस्य विधेयस्य गुणीभूतत्वात् उच्छूनत्वांशे विशेषणीभूतत्वात् प्राधान्येन अनिर्देशात् अनुवाद्यत्वप्रतीतिकृत् तस्यैव उद्देश्यत्वबोधजनकम्। एवं प्रकृते उच्छूनत्वमात्रस्य

ISSN: 2249-538X

अनुवाद उचितो न तु वृथात्वविशेषितस्य। तथा च विधेयत्वेन विवक्षितं वृथात्वं समामे गुणीभूतम् इति दोषः। किञ्चिदुद्देश्यं विधेयं च यदि पृथक्पदाभ्यामुपतिष्ठते तदा प्राप्तमुद्दिश्य अप्राप्तं विधीयते "पर्वतो वह्निमान्" इतिवत् न तु समासे अन्यथा वह्निमत्पपर्वतः इत्यभिधानापत्तेः।

एवं वाक्ये पदे वा विधेयांशस्य सर्वथा मुख्यत्वमागच्छति। तस्य च मुख्यतया प्रतिवादनाभावे विधेयाविमर्शप्रसङ्गः। अयं नित्यो दोषः प्रतिप्रसवाभावेन सर्वदैव हेयत्वात्। अयं विधेयाविमर्शः प्रधानतया त्रिविधो भवति –

1. प्रसज्यप्रतिषेधस्य स्थाने पर्युदासप्रयोगः

2. यत्र यत्तदोः एकतरनिर्देशेन उपक्रमः, तत्र तत्प्रत्यवमर्शिना तदितरेण उपसंहाराभावः

3. यत्र समासान्तर्गतत्वेन विधेयस्य उपसर्जनीभावप्रसङ्गः। एतेषां त्रयाणां विधेयाविमर्शप्रकाराणा-मुदाहरणरूपेण एकः श्लोकः प्रदर्श्यते महिमभट्टेन –

**संरम्भः करिकीटमेघशकलोद्देशेन सिंहस्य यः**
**सर्वस्यैव स जातिमात्रविहितो हेवाकलेशः किल।**
**इत्याशाद्विरदक्षयाम्बुदघटाबन्धेऽप्यसंरब्धवान्**
**योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी।**।इति।।

अत्र श्लोके "असंरब्धवान्" इत्यत्र प्रथमः विधेयाविमर्शप्रकारः। अत्र नञ् समासः, स च उत्तरपदार्थप्रधानभूतः। नञश्च अप्रधानत्वम्। अयमेव पर्युदासः इति उच्यते। तल्लक्षणं तु –

**प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता।**
**पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।**।इति।।

एतद्विपरीतः प्रसज्यप्रतिषेधो भवति। तल्लक्षणं तु -


ISSN: 2249-538X

**अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।**

**प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ्।** ।इति।।

अत्र श्लोके "असंरब्धवान्" इत्यत्र पर्युदासः समाश्रियते तदा अर्थस्य अयुक्तत्वप्रसङ्गः। समासात् सरम्भक्रियायाः निषेधस्य अप्रतीतिः संरम्भसदृशक्रियाकर्तुः विधेः प्रतीतिः इत्यर्थस्य अयुक्तत्वम्। अस्मिन्वाक्ये नञः क्रियान्वयितया लक्षणया संरब्धवत् पुरुषनिष्ठक्रियायाः संरम्भस्य प्रतिषेधः अभिमतः। असंरब्धवतः संरब्धवत्सदृशस्य अर्थात् संरम्भसदृशक्रियाकर्तुः उदासीनप्रायस्य विधिः नाभिमतः। एवमावमावश्यकोऽप्यसौ प्रसज्यप्रतिषेधः संरम्भरूपक्रियानिषेधस्य समासेन गुणीभूतत्वात् प्रधानतया न प्रतीयते, किन्तु विधौ प्राधान्यात् तदपेक्षया अर्थान्तरस्य संरब्धवत्सदृशस्य संरम्भसदृशक्रियाकर्तुः उदसीनस्य प्रतीतिर्भवति। "असंरब्धवान्" इत्यत्र संरम्भरूपा क्रिया, संरम्भसदृशक्रियायाः कर्ता च इति द्वावंशौ। उभयार्थनिषेधे प्रसक्ते शब्दशक्तिस्वाभाव्यात् वाक्ये क्रियांशस्यैव निषेधः।

समासे संरम्भसदृशक्रियायाः कर्तुरेव निषेधः प्राधान्येन विवक्षितः। स च समासगतत्वेन न सम्भवति इति विधेयाविमर्शः। एष नियमः सङ्ग्रहश्लोकैरुच्यते -

**क्रियाकर्त्रंशभागर्थौ वाक्येऽपोह्यो नञा यदि।**

**क्रियांश एवापोह्यः स्यान्नेष्टवानितिवत्तदा।।**

**अकुम्भकार इतिवत् वृत्तौ तु स्यात् विपर्ययः।**

**इत्येष नियमोऽर्थस्य शब्दशक्तिस्वभावतः।।** ।इति।।

ननु पर्युदासो नञेव समस्यते, न तु प्रसज्यप्रतिषेधे इति नास्ति नियमः। "अश्राद्धभोजी ब्राह्मणः", "असूर्यपश्याः दाराः" इत्यादिषु प्रसज्यप्रतिषेधोऽपि नञ्समासान्तर्गतो दृश्यते। तस्मात् "असंरब्धवान्" इत्यत्र प्रसज्यप्रतिषेध एवास्तु इति चेत् उच्यते – "अश्राद्धभोजी" इत्यत्र नञः श्राद्धेन उत्तरपदार्थेन न कश्चत् अभिसम्बन्धः प्रतीयते। अपि तु श्राद्धभोज्यार्थेन कर्त्रा सहैव सम्बन्धः,



ISSN: 2249-538X

तत्रापि कर्त्रंश एव प्रधानं न क्रियांशः। स तु कर्तरि विशेषणत्वात् अप्रधानम्। अतः समासान्तर्गतस्य नञः न कदापि कुत्रापि प्रसज्यप्रतिषेधत्वम्। प्रसज्यप्रतिषेधता वाक्यादेव आसीयते न वृत्तेरिति समर्थयितुम् उदाहरणान्तरं यथा –

**भुङ्क्ते सदा श्राद्धमयं परांश्चोपतापयेदित्ययार्थमेव।**

**सम्यक् स्वभावोऽवगतोऽस्य यावन्न श्रद्धभोजी न परोपतापी।।**इति।।

अत्र प्रतीयमानसत्तादिक्रियासमन्वयो नञर्थस्य प्राधान्येन प्रतीयते। न तु तद्विशिष्टस्य उत्तरपदार्थस्य विधिः। एष एव प्रसज्यप्रतिषेधस्य विषयो युक्तः नान्यः। अत्र सङ्ग्रहश्लोकोऽपि कथ्यते यथा -

**नञर्थस्य विधेयत्वे निषेध्यस्य विपर्यये।**

**समासो नेष्यतेऽर्थस्य विपर्यासप्रसङ्गतः।।**इति।।

**द्वितीयो विधेयाविमर्शप्रकारः -**

"योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी" इत्यत्र "योऽसौ" इत्यत्र द्वितीयः विधेयाविमर्शः। "यत्तदोर्नित्यमभिसम्बन्धः" इत्यस्ति नियमः। यस्मिन्स्थले यत्तदोर्मध्यादेकतरस्य निर्देशेन आरम्भः, तत्र तदितरेण समापनं कार्यम्। तच्छब्देनोपक्रमे यच्छब्देनोपसंहारः। यच्छब्देनोपक्रमे तच्छब्देनोपसंहारः उचितः। तदेवोच्यते यथा -

**यश्चैकवाक्ये कर्तृत्वेनोक्तो यश्चेदमादिभिः।**

**तच्छब्देन परामर्शो न तयोरुपपाद्यते।।**

**यतोऽध्यक्षायमाणोऽर्थः स तेभ्यः प्रतिपाद्यते।**

**न चासौ तत्परामर्शसहिष्णुरसमन्वयात्।।**इति।।

यत्तदोः उपक्रमोपसंहारक्रमे प्रकृतश्लोकस्थस्य "योऽसौ" इत्यत्र विद्यमानस्य यच्छब्दस्य अन्तर्भावो न भवति। तदुच्यते एवं च "योऽयम्" इह "योऽसौ" इत्यत्र यदः केवलस्यैव प्रयोगः, स केन अभिसम्बध्यताम्, न ह्यत्र मुक्तके तदभिसम्बन्धसहः प्रक्रान्तः कश्चिदर्थः सम्भवति यदभिसम्बन्धोऽस्य


ISSN: 2249-538X

परिकल्प्येत। न च प्रक्रंस्यमानाम्बिकाकेसरिविषयोपकल्पितेन तदा अस्य अभिसम्बन्धः सम्भवी तदुपादान एव तत्सम्बन्धप्रतीतिदर्शनात् इति।

एवं च अयुक्त एवायं यदःप्रयोगः।

ननु योऽसौ कुत्र चमत्कृतेः इत्यादिविचारविषयीभूते श्लोके तच्छब्दाभिन्नार्थकस्य असाविति अदश्शब्दस्य प्रयोगदर्शनात् नियमस्य कुत्र दोषस्य अवकाश इति चेत् उच्यते – अदश्शब्दः नैव तच्छब्दाभिन्नार्थकः। तथा स्वीकारेण दोषद्वयमापतति । यदि उभयोरभिन्नार्थकत्वे -

**असौ मरुच्चुम्बितचारुकेसरः**
**प्रसन्नताराधिपमण्डलाग्रणीः।**
**वियुक्तरामातुरदृष्टवीक्षितो**
**वसन्तकालो हनुमानिवागतः।।**

अत्र श्लोके अदश्शब्दस्य प्रयोगेऽपि यच्छब्दो न प्रयुक्तः इति तदाकाङ्क्षा स्यादित्येको दोषः। द्वितीयो दोषो यथा –

**यस्य प्रकोपशिखिना परिदीपितोऽभू-**
**दुत्फुल्लकिंशुकतरुप्रतिमो मनोभूः।**
**योऽसौ जगत्त्रयलयस्थितिसर्गहेतुः**
**पायात्स वः शशिकलाकलितावतंसः।।**

इत्यस्मिन्श्लोके अदश्शब्दस्य तच्छब्दाभिन्नार्थकत्वं स्वीक्रियते चेत् तच्छब्दपरामर्शस्य पौनरुक्त्यं स्यात्। यतः "यौऽसौ" 'सः' इति प्रयोगदर्शनात्। अनेन नयेन तावत् अदश्शब्दतच्छब्दयोः अभिन्नार्थत्वकल्पनम् अनुपपन्नम् इति वस्तुस्थितिः। एवं "यौऽसौ कुत्र चमत्कृतेः" इति प्रकृते श्लोके द्वितीयस्यास्य विधेयाविमर्शप्रकारस्य अपरिहार्यत्वमेव।

**तृतीयो विधेयाविमर्शप्रकारः -**

यत्र विशेष्येण सह विशेषणानां पदानां समासकरणेन तत् प्राधान्यं


ISSN: 2249-538X

विनष्टं भवति, विशेषणं च गुणीभूतं भवति, असौ विधेयाविमर्शस्य तृतीयः प्रकारः।

पूर्वोक्तश्लोके "अम्बिकाकेसरी" इत्युदाहरणम्। अत्र षष्ठीसमासो नोपपद्यते। अम्बिकायाः केसरी इत्येवात्र वक्तव्यमासीत्। समासाङ्गभूत इति तस्य अर्थोपसर्जनीभूतत्वापत्तिः। अत्र समासान्तर्गतत्वात् अम्बिकायाः उद्देश्यत्वप्रसङ्गः। अत्र समासगतविशेषणेन विशेष्यभावः निरूप्यते। तत्र विशेष्यविशेषणभावो द्विधा। समानाधिकरणः व्यधिकरणश्च। तत्राद्यः कर्मधारयस्य विषयः। यत्र द्वे बहूनि वा पदानि अन्यस्य पदस्य अर्थे विशेषणभावं भजन्ते सा बहुव्रीहेः सरणिः। तत्रैव यदा सङ्ख्यायाः प्रतिषेधस्य च विशेषणभावो भवेत् तदा स द्विगोः नञ्समासस्य च विषयः। व्यधिकरणस्तु कारकाणां विशेषणस्य च सम्बन्धित्वात् बहुविधः। स तत्पुरुषस्य पन्थाः। तत्रापि यदा अव्ययार्थस्य विशेष्यता, सोऽव्ययीभावस्य मार्गः।

एषां समासानां विशेषणविशेष्योभयांशस्पर्शित्वेऽपि तत्र विशेषणांशः स्वाश्रयोत्कर्षमुखेन वाक्यार्थचमत्कारणतया प्राधान्येन विवक्षितो विधेयतामधिगच्छेत्, विशेष्यांशश्च अनूद्यमानकल्पतया न्यग्भावमेव भजेत् तदासौ न वृत्तेर्विषयः।

अथ विशेषणं तु अवच्छेदकत्वात् सर्वथा अप्रधानम्। विधेयश्च विवक्षितत्वात् प्रधानभूतः। कथमनयोः अन्योन्यं विरोधादेकत्र समावेशः येनैकत्र नियमेन समासो निषेध्यते अन्यत्र चोपकल्प्येत।

महिमभट्टमतानुसारेण नैष दोषः। यतो हि विरोधः उभयवस्तुनिष्ठः। शीतोष्णादिवत्। प्रकृते उभयोः वस्तुत्वं नैव उपपद्यते। एकः विशेषणांशस्य गुणीभावः वास्तवरूपः। तस्यैव प्राधान्यं विवक्षाधीनम्। न च वास्तववस्तुनोर्विरोधः। अत्र अनयोर्फलभेदः अस्त्येव इति महिमभट्टस्य अभिप्रायः। स च भेदः सहृदयैकसंवेद्यः।


ISSN: 2249-538X

सत्यामेतस्यां वस्तुस्थित्यां यदत्र अम्बिकायाः केसरिणः विशेषणभावेन उपादानं तत् किमितरकेसरिव्यावृत्तिमात्रफलम् आहोस्वित् असमासे केसरिगतविश्वातिशायि शौर्यातिरेकप्रतिपादनप्रयोजनम्। प्रथमपक्षे केवलमम्बिकासम्बन्धेन अकस्मात् कोऽपि चमत्काराविर्भावः न सम्भाव्यते। द्वितीयपक्षे तु समास एव न भवति। एवं श्लोकेऽस्मिन् विधेयाविमर्शलक्षणमनौचित्यं त्रिधा प्रदर्श्य तत्परिहृत्य श्लोकं परिष्करोति महिमभट्टः –

**उद्योगः करिकीटमेघशकलोद्देशेन सिंहस्य यः**
**सर्वस्यैव स जातिमात्रनियतो हेवाकलेशः किल।**
**इत्याशाद्विरदक्षयाम्बुदघटाबन्धेऽपि नोद्युक्तवान्**
**योऽसौ कुत्र चमत्कृतेरतिशयं गौर्य्या हरिर्यातु सः।।**इति।।

**आधारग्रन्थाः -**

1. व्यक्तिविवेकः – आन्ध्रव्याख्याता श्रीभागवतकुटुम्बराव्
2. व्यक्तिविकेकः – संस्कृतव्याख्याता राजानकश्रीरुय्यकः
3. वैयाकरणसिद्धान्तकौमुदी – भट्टोजिदीक्षितः
4. तन्त्रवार्तिकम्
5. वक्रोक्तिजीवितम् – कुन्तकः

**********


ISSN: 2249-538X

# श्रीमद्रामायणे अङ्गिरसविचारः

डा. श्रीनिवासमूर्तिः

**आदिकाव्यमिदंत्वार्षं पुरा वाल्मीकिना कृतम् ।**
**यः पठेच्छ्रुणुयाल्लोके नरः पापाद्विमुच्यते ॥ इति ।**

श्रीमद्रामायणे युद्धकाण्डे प्रोक्तम्।

रामायणपठनेन श्रवणेन च पापानि अपाक्रयन्ते इति हेतोः बहवः पारायणं कुर्युः । पठितृणाम् आमुष्मिकं दृष्टिमार्गस्य दृढालम्बनं स्यात् । किन्तु काव्यं काव्यत्वेन पठितुम् अन्यः कश्चन मार्गः वर्तते – स एव रसमार्गः ।

काव्यपठनेन रसानन्दः जायते । रसानुभूत्यै ये पठन्ति ते एव सहृदयाः– "येषां काव्यानुशीलनवशात् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते हृदयसंवादभाजः सहृदयाः इति अभिनवगुप्तपादाः सहृदयविवेचनमकार्षुः । काव्यानुशीलनसन्दर्भे सहृदयाः बाह्यविषयज्ञानविमुक्ताः भूत्वा विशुद्धदर्पणा इव भासन्ते । तेषु काव्यपात्राणां चित्तवृत्तयः रसभावाः विनिर्मलं प्रतिफलन्ति । तैः सहृदयाः तादात्म्यं प्राप्नुवन्ति। इममेव विषयं प्रेक्षकाधिकारनिर्देशावसरे भावप्रकाशकारः इत्थं व्यवृणोत् –

य स्तुष्टो तुष्टिमाप्नोति शोके शोकमुपैति च ।
क्रोधे क्रुद्धो भये भीरुः स श्श्रेष्ठः प्रेक्षकस्मृतः ॥ इति ।

एतादृशतादात्म्यसिद्धये सहृदयः रजस्तमोगुणवर्जितेन सत्त्वगुणशोभितेन च मनसा परगतसुखदुःखादि भावभावनापरतन्त्रेण भावितान्तःकरणेन काव्यार्थान् आस्वादयेत् । साधारणीकृतानां विभावादीनां तदा तादाम्त्यस्थितिः जायते । तच्चर्वणं रसानुभूतियोग्यतां कल्पयति । सुखदुःखात्मकाः रसभावाः साधारणीकरणं प्राप्य सहृदयस्य वासनाबलेन


ISSN: 2249-538X

स्वस्वरूपसंवलिताः भूत्वा रसानंदत्वेन पर्यवस्यन्ति तदा सहृदयस्य ब्रह्मानन्दसब्रह्मचारी रसानन्दः सिद्ध्यति।

मानवजीवितपरामार्थः पुरुषार्थसाधनं स्यात्, किन्तु काव्यजीवितपरमार्थस्तु रसः ।

तथापि मानवजीवितपुरुषार्थान् काव्यजीवितपरमार्थञ्च समन्वीय काव्यार्थसमालोचनकरणं साहित्यशास्त्रीयः संप्रदायः ।

**नायकचरित्रमेव काव्यवस्तु ।** शब्दार्थयोरपि पुण्यश्लोकचरितनिबन्धनेन सहृदयानन्दित्वं अतो नायकस्यैव काव्य प्राधान्यम् इति विश्वानाथः । तादृशः नायकः चतुर्विधः । चतुर्विधपुरुषार्थानुसारं चतुर्विधनायकविभागः कृतः ।

धीरोदात्तः - धर्मसाधकः

धीरोद्धतः - अर्थसाधकः

धीरललितः - कामसाधकः

धीरशान्तः - मोक्षसाधकः ।

एतेषां कृते काव्यरसनिर्देशमपि कृतवान्तः अभिनवगुप्तपादाः ।

धर्मयुद्धवीरप्रधानः धीरोदात्तः वीररौद्रप्रधानः धीरोद्धतः, वीरश्रृङ्गारप्रधानः धीरललितः दानधर्मवीरप्रधानः धीरशान्तः इति । काव्यकथायां नायकैः साध्यमानैः पुरुषार्थैः विभागाः निश्चीयन्ते । नायकाश्रितः स्थायिभावैः तत्तद्रसाः संकेतिताः भवन्ति । काव्येतिवृत्ते नायकेन पुरुषार्थः प्राप्यते, सहृदयेन रसानन्दः अवाप्यते ।

रामायणे अङ्गीरसः कः ? इति प्रश्नं समाधातुमेव पूर्वरङ्गोऽयं प्रवृत्तः । आनन्दवर्धनाचार्याः ध्वन्यालोके रामयणं करुणरसप्रधानमिति, महाभारतं शान्तरसप्रधानमिति च प्रत्यपादयन् । अभिनवगुप्तपादश्च लोचने(व्याख्यायां) तत्सिद्धान्तमुपास्थापयन् । तदारभ्य अद्यावधि लाक्षणिकग्रन्थेषु स एव (वादः) सिद्धान्तः शिरोधार्यः वर्तते ।


ISSN: 2249-538X

"रामायणे हि करुणो रसः स्वयमादिकविना सूत्रितः शोकः श्लोकत्वमागतः इत्येवं वादिना निर्व्यूढश्च स एव सीतात्यन्तवियोगपर्यन्तमेव स्वप्रबन्धमुपरचयिता" इति ध्वन्यालोककर्ता आनन्दवर्धनः।

एतत्करुणरसवादस्य प्रधानतया द्वे उपपत्ती असूचयत् आनन्दवर्धनः ।

प्रथमा- वाल्मीकेः शोकस्य श्लोकरूपत्वं तच्छ्लोकस्य रामायणकाव्यत्वेन परिणतिः ।

द्वितीया – काव्यावसाने रामस्य सीतात्यन्तवियोगदुःखम् । आनन्दवर्धनस्य मते काव्यप्रारम्भ परिसामप्ती । एते द्वे रसनिर्णायकलिङ्गे इति तस्य तात्पर्यम् ।

रामायणस्य प्रारम्भः कः इति प्रश्नः ? आदिकाव्यरचनाय उपक्रान्तुं हेतुभूतं सन्निवेशकथनं काव्यकथायाः पूर्वरङ्गः। वस्तुतः बालकाण्डे पञ्चमसर्गात् काव्यकथा प्रारभ्यते – अयोध्यापुरीवर्णनेन । प्राथमिकाः चत्वारोऽपि सर्गाः काव्यावतारिकारूपाः। तत्र वाल्मीकिः काव्यरसनिर्देशमकरोदिति लाक्षणिकोक्तिः । तथाविधकरणम् अवतारिकासम्प्रदायश्च ।

अवतारिकायां कथा सूक्ष्मतया

कोन्वस्मिन् सांप्रतं लोके गुणावान् कश्च वीर्यवान् ।
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः ॥

इत्यादिरूपेण समग्रगुणगम्भीरं सत्पुरुषं ज्ञातुं वाल्मीकिः नारदं परिपृच्छति । तदा नारदः – बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः - इति ब्रुवन् दिव्यदृष्ट्या श्रीरामं ज्ञात्वा

इक्ष्वाकुवंशप्रभवो रामो नाम जनैः श्रुतः ।
नियतात्मा महावीरो द्युतिमान् । धृतिमान् वशी ॥ इति

रामगुणकीर्तनं कृत्वा, रामकथां च श्रावयित्वा "इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितं यः पठेद्रामचरितं सर्वपायैः प्रमुच्यते" इति फलश्रुतिमपि


ISSN: 2249-538X

श्रावयति। तत्र उत्तररामायणकथा नास्ति । यद्यस्तीति वक्तव्यं तर्हि – दृश्यमानः श्लोकः –

दशवर्षसहस्राणि दशवर्षशतानि च
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥ इति ।

अतः नारदप्रोक्ता रामकथा रामः 'सीतामनुप्राप्य राज्यं पुनरवाप्तवान् ।' इति तावत्पर्यन्तमेव ।

रामकथां श्रुत्वा सत्त्वगुणाविष्टेन निर्मलेन मनसा शिष्यैस्साकं तमसानदीतीरं गत्वा भरद्वाजम् एवम् अवोचत् ।

अकर्दमिदं तीर्थं भरद्वाज निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥

अत्र रमणीय शब्दः आस्वादयोग्यां अवस्थां सूचयति । तत्र ऋषिः न केवलं द्रष्टा अपि च सहृदयः, कविश्च आसीत् । आदिकविचित्ते रामकथाचित्रणाय नारदः भित्तिकां सज्जीकृतवान् । तमसानदी तस्य वर्णनाप्रतिभाम् अजागरयत् । तत्समनन्तरं प्रवृत्तः क्रौञ्चविषादोदन्तः आदिकवेः कवितावेष्यं अभिव्यक्त्यकरोत् ।

मानिषाद प्रतिष्ठां त्वमगमः शाश्वतीस्समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥

वचनानीमानि क्रौञ्चमानसिकस्थितौ तादात्म्यं प्राप्तवतः मुनेः वचनानि। तदानीं मुनौ यावानाग्रहः आसीत्, तावती आर्द्रताऽपि आसीत् । पात्रमनोगत भावानुगुणं स्पन्दित्वा काव्यार्थरचनं कर्तुं समर्थं सृजनात्मक चैतन्यं मुनीद्रस्य मनसि जागराञ्चकार। शोकः श्लोकत्वेन आविर्भूतः । भरद्वाजः गुरुहृदयं तस्य वाक्छन्दश्च विज्ञातवान् ।

समाक्षरैः चतुर्भिः यः पादैः दीतो महर्षिणा ।
सोऽनुव्याहरणाद्भूयः शोकः श्लोकत्वमागतः ॥


ISSN: 2249-538X

भरद्वाजादीनां समीक्षत्वेन प्रोक्तोऽयं श्लोकः आनन्दवर्धनस्य रसनिर्णयाय उपस्कारकोऽभवत् ।

वस्तुतः सः शोकः कस्य ? यद्यपि वाल्मीकेः मूखात् तानि वचनानि प्रोक्तानि तथापि क्रौञ्चपक्षिणः पक्षे समन्वितानि भवन्ति । अर्थात् पात्रे तादात्म्यं प्राप्तवतः कवेः वचनानि ।

तत्सन्दर्भे वाल्मीकिना सीतावियोगदुःखितः श्रीरामः स्मारितः स्यादिति, रामकथारचनाय वाल्मीकेः वाचः समीचीनः आविष्कारावकाशः लब्धः इति आनन्दवर्धनः अभावयत् । लौकिकभावः अलौकिकरसाविष्कारणाय योग्यां चित्तवृत्तिं महर्षौ अकल्पयदिति, क्रौञ्चमिथुनविषादगाथायां भावः शोकः भवतीति, अतः रामायणकथायां रसः करुणः भवतीति आनन्दवर्धनः निरधारयत् ।

अत्र केचन अंशाःविचारणीयाः वर्तन्ते – श्रीरामस्य सीतावियोगः उत्तररामायणे अन्तिमघट्टे भवति । सीता यदा भूगर्भं प्रविशति, तदा रामः मूर्छां प्राप्य पुनरुत्थाय क्रुद्धो भवति । रामस्य क्रोधः ब्रह्मादीनां स्तुत्या उपसंह्रियते । कथा तत्रैव स्थगिता नाभवत् । अश्वमेधयागं कृत्वा बहूनि वर्षाणि रामः राज्यं परिपालयति । तदनन्तरं कुशलवयोः राज्यं दत्वा भ्रातृभिस्साकं सरयूनद्यां प्रविश्य तनुं त्यजति ।

रामायणे रसः करुणः उत्युच्यते चेत् वाल्मीकि हृदयगतशोकः तस्य स्थायी भवितुं नार्हति । रामस्य शोकः एव स्थायी भवितुमर्हति ।

“रसस्तु कथानायकाश्रयः तद्विपक्षश्रयो वा “ इति आनन्दवर्धस्यैव निर्देशः ।

रामायणे स्थायी शोकः रामाश्रयः भवेत् । कथाव्यापिनः रामस्य चित्तवृत्तिमाश्रित्य शोकः काव्ये लिङ्गषट्के स्फुरेत् । उपक्रमः – उपपत्तिः इत्यादीनि रसनिर्देशकानि षट्लिङ्गानि । अर्थात् सङ्केताः ।


ISSN: 2249-538X

लिङ्गषट्के शोकभावस्फूर्तिः रामायणे रामे नैव दृश्यते । रामः राज्यं गतमिति नाशोचत् अपि तु पितुः मरणेन दुःखितवान् । अरण्यवासं कर्तुं नाशोचत् । सीतायाः अदर्शनेन दुःखितवान् । सीतां परित्यक्तुं नाशोचत् सीतायाः मरणेन दुःखितवान् । यदा रामः दुःखितवान् ते सर्वेऽपि घट्टाः मानवसहजा एव । तत्तद्घट्टेषु शोकः नितरां मानव सहजः । तथापि रामः आजीवनं नाशोचत् । यदा यदा शोकाविष्टः आसीत् तदा सर्वदा गाम्भीर्येण सधैर्यमेव अशोचत् । तद्धीरोदात्तस्य लक्षणम् ।

रामस्य जीवने शोक एव स्थायी चेत् तर्हि तेन साधितः पुरुषार्थः कः ? शोकेन कोऽपि पुरुषार्थः न साध्यते । जन्यजनकरसेषु जन्यरसाः पुरुषार्थप्रवृत्तेः तथा उपकारकाः न भवन्ति । (हास्य-अद्भुत-करुण-बीभत्साः) जनकरसस्य पोषका भवन्ति चेदेव तेषां सार्थक्यम् । अतः रामाश्रितः स्थायी शोकः इति कथने अस्माकं सुखं नास्ति, रामस्य लाभः नास्ति, रामकथायाः अन्वयः नास्ति।

कौश्चिदेवमुच्यते रामः जीविते कदा सुखी आसीत् ? सर्वदा कष्टमेवानुभूतवान् खलु? अतः रामायणं करुणरसप्रधानमिति। तथाविधकथयितृणां रामस्योपरि अपारकृपा एव तत्र कारणम् । रामः कदापि दैन्यं नावाप्तवान् । अपि च स एव पठितृन् सान्त्वयित्वा धीरत्वमबाधयत् । रामः वीरः, धीरः च । कष्टानुभवेनैव धीरस्यगुणः तप्तं काञ्चनमिव विभासते । रामः सीतायै एव यदि जीवितः तर्हि श्रृङ्गारनायकत्वेन स्थितः स्यात् । सीताविप्रलम्भः सीतावियोगः तस्य धीरत्वस्य अग्निपरीक्षे । तस्य धर्म एव ध्येयः । धर्माचरणमेव तस्य शीलम् । गाम्भीर्यं तस्य गुणः । सौजन्यं तस्य प्रवृत्तिः । पराक्रमः तस्य कवचम् । सत्यं तस्य आत्मा ।

रामस्य जीविते तस्य स्वीयसुखस्य धर्मस्य च मध्ये अनवरतसंघर्षणं दृश्यते । रामः धर्मस्य कृते स्वकीयं सुखं सर्वस्वं तत्याज भीरुः त्यजन् शोचति। धीरः त्यक्त्वा हर्षति । रामस्य त्यागः सामाजिकेषु कृपानुभूतिं जनयेत् किन्तु


ISSN: 2249-538X

काव्ये सहृदस्य नायकेन साकं सहानुभूतिः जायते । रामेण सहानुभूतिं प्राप्तवत्सु सहृदयेषु जायमानः रसः धर्मवीरः ।

रामस्य जीवने शोकः स्थायीनास्ति, संचारीमात्रमेव । धर्मोत्साहः स्थायी । अतः रामयणे अङ्गीरसः धर्मवीरः ।

"एको रसः करुण एव" इति भवभूतेः रससमन्वयस्य केन्द्रबिन्दुः उत्तररामायणम् । तत्रापि भार्यावियोगदुःखेन रामः शोकमग्नोऽभवदिति कथने तस्य लभ्यमानं गौरवमपि अल्पमेव । एतादृशकथनेन सीतारामयोः अद्वैतप्रणयस्य गौरवं न परिगण्यते इति न । उत्तररामायणे रामः जानकीपतित्वेन स्थितः वा? जनपतित्वेन स्थितो वा प्रणयधर्मः आचरितो वा प्रजाधर्मो वा इति प्रश्ने समाधानं जगद्विदितमेव । व्यक्तिधर्मापेक्षया लोकधर्मः महीयान् । शोकतरंगाः उत्प्लवन्ति चेदपि धर्मः तान् सीम्नि एव संस्थाप्य शास्ति। अतः पूर्वरामायणे इव उत्तररामायणेऽपि धर्मोऽत्साह एव स्थायी । धर्मवीर एव अङ्गी करुणः अङ्गरसः ।

**********


ISSN: 2249-538X

# प्रव्रज्यायोगाः

डा. रामकृष्णपेजत्तायः

जनिमतां पूर्वजन्मार्जितदृढादृढकर्मजन्यफलानां चिन्तनार्थं होराशास्त्रे प्रकल्पिताः सन्ति बहवो योगाः । ते च केषाञ्चिल्लक्षणानामाधारेण राजचान्द्रनाभसादिभेदेन विभाजिता विद्यन्ते । तेष्वन्यतमाः सन्ति प्रव्रज्यायोगाः । प्रोपसृष्टाद् व्रजतेर्भावे क्यपि[1] निष्पन्नस्य प्रव्रज्याशब्दस्य प्रव्रजनं सन्न्यासो वेत्यर्थः । तमेतं वैराग्यसम्पत्तिजन्यं सन्न्यासं ये व्यञ्जयन्ति त एव प्रव्रज्यायोगाः । तद्विषये होराविदां राद्धान्तं मिहिरवचनैरुपन्यस्यामि ।

तत्रादावध्यायसङ्गतिविचारः । राशिभावग्रहाणां नानाविधैः सम्बन्धैर्जायमानान् विविधान् योगान् प्रस्तुवन् भगवान् वराहमिहिर आदौ राजयोगान्, ततो नाभसान् चान्द्रांश्च योगान् प्राह । ततः स द्वयोर्ग्रहयोर्युत्या विचार्याणां फलविशेषाणाम् आख्यानाय द्विग्रहयोगनामकमध्यायं निबध्य तत्रान्ते 'कथितफलैः परतो विकल्पनीयाः' इत्याह । द्विग्रहयोगोक्तानि फलान्याधृत्य त्र्यादिग्रहयोगानां फलानि स्वयमूह्यानीत्यस्य भावः । किञ्च चत्वारस्तदधिका वा ग्रहा यदि युतिमाप्तास्तर्हि तत्र पूर्वोक्तानि फलानि बाधित्वा प्रव्रज्यारूपः फलविशेषः सम्भवति । तस्यां प्रव्रज्यायामपि शाक्याजीवकादीनां बहूनां प्रकाराणाम्, प्रव्रज्याकारकाणां योगान्तराणां च सत्त्वात् तदर्थं पृथगध्यायमारभताचार्यः प्रव्रज्यायोगनाम्ना ।

इत्थमारब्धेऽस्मिन्नध्याये प्रथमेन श्लोकेन चतुर्णां तदधिकानां वा युत्या जायमानं प्रव्रज्यायोगं तत्प्रकारविशेषांश्चाह यथा –

**एकस्थैश्चतुरादिभिर्बलयुतैर्जाताः पृथग्वीर्यगैः**
**शाक्याजीकवृद्धभिक्षुचरका निर्ग्रन्थिवन्याशनाः ।**

[1] व्रजयजोर्भावे क्यप् ३-३-९८



ISSN: 2249-538X

**माहेयज्ञगुरुक्षपाकरसितप्राभाकरीनैः क्रमात्**

**प्रव्रज्या बलिभिः समा परजितैस्तत्स्वामिभिः प्रच्युतिः ॥**[1]

चत्वारस्तदधिका वा ग्रहा एकस्थाश्चेज्जातः प्रव्रज्यां भजते । तेषु चैकस्थेषु अधिकबलस्याधारेण प्रव्रज्याप्रकाराः प्रोक्ता यथा – कुजेऽधिकबले शाक्यः, बुधे आजीवकः, गुरौ भिक्षुः, चन्द्रे वृद्धः, शुक्रे चरकः, शनौ निर्ग्रन्थिः, रवौ वन्याशनश्चेति ।

यदि ब्यादयो ग्रहा बलिनस्तर्हि तत्तत्प्रव्रज्याप्रकाराः सर्वेऽपि समाश्रीयन्ते जातकेन । तथात्वे सति स यस्य दशा तदुक्तां प्रव्रज्यां भजते, दशान्तरे प्रव्रज्यान्तरञ्चेति । अथ चेत् कारकग्रहः पराजितस्तदुक्तां प्रव्रज्यां भजते ततः प्रच्युतश्च भवति जातकः ।

अत्र चतुरादिभिः माहेयज्ञगुरुक्षपाकरसितप्राभाकरीनैः एकस्थैः - इत्यस्यार्थविशेषं पश्यति रुद्रो यथा – चतुर्थादयो भावाः क्रमेण कुजादिभिर्युक्ताश्चेत् तत्तद्ग्रहोक्तां प्रव्रज्यां जातकः समाश्रयतीति । अनेन चतुर्थे कुजः, पञ्चमे बुधः, षष्ठे गुरुः, सप्तमे चन्द्रः, अष्टमे शुक्रः, नवमे शनिः, दशमे रविश्च प्रत्येकं प्रव्रज्याकारका भवन्तीति फलितम् । अयञ्चार्थः पुष्टतरो भवति 'नवमभवनसंस्थे मन्दगेऽन्यैरदृष्टे' इत्यनेनान्तिमश्लोकस्योत्तरार्धेन । इदमपि लक्षणं प्रव्रज्याविचारे स्वीकार्यमिति व्याख्यातू रुद्रस्य भावः ।[2]

इत्थं प्रोक्तानां प्रव्रज्यायोगानां त्रीनपवादान् प्राह यथा –

१. प्रव्रज्याकारकेषु ग्रहेष्वस्तङ्गतेषु सत्सु जातः सन्न्यासदीक्षां न प्राप्नोति । (तथापि तदीयं हृदयं विरक्तं भवतीति भावः ।)
२. एतद्योगकारका ग्रहा बलिनो भवन्ति चेज्जनाः तस्मिन् सन्न्यासिनि भक्तिमन्तो भवन्ति ।

[1] बृहज्जातकम् १५-१

[2] रुद्रकृते विवरणव्याख्याने



ISSN: 2249-538X

अयमप्यर्थोऽत्र व्यज्यते यदस्तङ्गता ग्रहा बलिनो भवन्ति चेज्जातः प्रव्रज्यां न विन्दति तथापि तस्य ज्ञानवैराग्यादिभिर्गुणैस्तस्मिन् भक्तिमन्तो भवन्ति जना इति ।

३. प्रव्रज्याकारका ग्रहाः युद्धे पराजिताः अन्यनिरीक्षिताश्च भवन्ति चेज्जातस्तां प्रार्थयमान एव भवति नतु प्राप्नोतीति । तथा चोक्तम् -

**रविलुप्तकरैरदीक्षिता बलिभिस्तद्गतभक्तयो नराः ।**
**अभियाचितमात्रदीक्षिता निहतैरन्यनिरीक्षितैरपि ॥**[1]

अत्र तृतीयो योगः पूर्वोक्तस्य 'परजितैस्ततस्वामिभिः प्रच्युति'रित्यस्यापवादः । एवञ्चैतत् फलितं यद् युद्धे पराजिता एकस्था ग्रहा यद्यन्यैर्न निरीक्षितास्तर्हि जातः प्रव्रज्यां गृहीत्वा परित्यजति, अन्यथा तु तां प्रार्थयमानोऽपि न विन्दति इति । इत्थं चतुर्ग्रहयुत्या जायमाना प्रव्रज्या तद्भेदास्तदपवादाश्च प्रदर्शिता आचार्येण । अथ प्रसङ्गात् कांश्चिदन्यान् योगान् निजगाद यथा –

१. अन्यैरदृष्टो जन्मराश्यधिपतिः शनिं पश्यति चेज्जातः प्रव्रज्यां भजते ।
२. केनाप्यदृष्टः शनिः बलविरहितं जन्मराश्यधिपतिं पश्यति चेज्जातः सन्न्यासी भविष्यति ।
३. शनिद्रेष्काणे कुजशन्योरन्यतरनवांशे च स्थितश्चन्द्रः अन्यैरदृष्टः सन् शनिना दृष्टश्चेदपि जातः प्रव्रजति ।

अथाग्रे द्वौ विशिष्टौ योगावुवाच यथा –

**सुरगुरुशशिहोरास्वार्किदृष्टासु धर्मे**
**गुरुरथ नृपतीनां योगजस्तीर्थकृत् स्यात् ।**
**नवमभवनसंस्थे मन्दगेऽन्यैरदृष्टे**
**भवति नरपयोगे दीक्षितः पार्थिवेन्द्रः ॥**[2]

---

[1] बृहज्जातकम् १५-२
[2] बृहज्जातकम् १५-४

ISSN: 2249-538X

धनुर्मीनकर्कटानामन्यतमे लग्ने शनिदृष्टे, नवमस्थे गुरौ, राजयोगे च सति जातस्तीर्थकृत् स्यादित्येको योगः । अथ यस्य जन्मनि केनाप्यदृष्टः शनिः नवमभवनस्थः, राजयोगविशेषश्च स्यात् स दीक्षितः पार्थिवेन्द्रो भवतीति द्वितीयो योगः ।

इत्थं चतुर्भिः श्लोकैराचार्यमिहिरेण प्रव्रज्यायोगाः प्रादर्शिषत ।

अत्रान्तिमाभ्यां द्वाभ्यां श्लोकाभ्यामुक्तेषु सर्वेषु योगेषु शनिसम्बन्धो वर्तते । शनिर्वैराग्यकारक इत्यर्थोऽनेन व्यक्तो भवति । तथा चैनमर्थं दृढीकरोति 'अदृष्टार्थो रोगी'इति श्लोकस्य रुद्रेण कृता व्याख्या । तथा च स श्लोकः –

**अदृष्टार्थो रोगी मदनवशगोऽत्यन्तमलिनः**

**शिशुत्वे पीडार्थः सवितृसुतलग्नेऽत्यलसवाक् ।**[1] इति ।

- लग्नस्थे शनौ जातः अदृष्टार्थादिको भवतीत्यस्य वाक्यस्य वाच्यार्थः । किन्तु रुद्रोऽस्य वैराग्यपरमर्थमपि कथयति यथा – विरक्तः अर्थं न पश्यति तिरस्करोतीत्यतः सः अदृष्टार्थः । स्नानानुलेपनादिषु विरक्तेः स दर्शनेन रोगीव अत्यन्तमलिनश्च भवति । तथा च मदनो वशगो यस्येति बहुव्रीहिबलेन जितकाम इत्यर्थः । इत्थमत्र लग्नस्थेन शनिनाऽपि प्रव्रज्याऽभिव्यक्ता, शनेर्वैराग्यकारकत्वं च प्रपञ्चितमिति स्फुटमेव नः ।

उक्तेषु योगेषु शनिकृता याः प्रव्रज्याः सन्ति ताः सहजेन कष्टमयजीवनोत्पन्नेन जीवनानुभवोद्भवेन वा वैराग्येण जन्याः, गुरुकृतास्तु वेदान्ताद्यध्ययनोत्पन्नज्ञानजन्याः इति वृद्धानामनुभवप्राप्तो विशेषोऽप्यवधार्यः । अन्येषु, बुधेन जायमाना प्रव्रज्या न वैराग्यजन्या, जीवननिर्वहणार्थं स्वीकृतं किञ्चिदुपायमात्रम् इति तत्त्वम् । एवमन्या अपि प्रव्रज्याः युक्त्या वेद्याः ।

ननु अत्रोक्ता योगाः पुंसामेव किमुताहो स्त्रीणामपीति जिज्ञासायामुच्यते । यद्यत् फलं नरभवेऽक्षममङ्गनानामित्यादिना

[1] बृहज्जातकम् २०-९

ISSN: 2249-538X

स्त्रीजातकाध्यायादिवाक्येन पुंजातकोक्तानि फलानि सत्यन्वये स्त्रीणामपि वक्तव्यानीत्युपदिष्टम् । प्रव्रज्याहेतोर्वैराग्यस्य स्त्रीष्वपि सद्भावात् तथाभूतानां स्त्रीणां दृष्टत्वाच्च अमी योगाः स्त्रीष्वपि सङ्गच्छन्त एवेति निश्चप्रचम् । तथा च स्त्रीजातकाध्यायान्ते –

**पापेऽस्ते नवमगतग्रहस्य तुल्यां प्रव्रज्यां युवतिरुपैत्यसंशयेन ।**[1]

- इति कथितमप्यत्र प्रमाणं भवति ।

इत्थमिह यथाशास्त्रं प्रादर्शिषत प्रव्रज्यायोगाः । किञ्चैतद्वेद्यं यदत्रोक्तः सन्न्यासः सर्वसङ्गपरित्यागरूपः । परन्तु लोके तेऽपि विद्यन्ते ये सन्न्यासिनः सन्तोऽपि कस्यचित् पीठस्याधिपत्यं वहन्ति । नामैव स्फुटं व्यञ्जयति यदेतेषु निःसङ्गत्वेन सह आधिपत्यम् (प्रभुत्वम्) अपि वर्तत इति । तदेतत् पीठाधिपत्यं दर्शयन् न कोऽपि योगविशेषो मिहिरेण तत्समानमानैर्वा न्यगादि । तस्मादत्र युक्तिरभियुक्तानुभवश्च शरणम् । तयोराधारेणैतन्निर्णीतमस्ति यद् –

- बलवता शनिना कृतः प्रव्रज्यायोगः पीठाधिपत्याय कल्पते । यतः – 'गुरुस्वर्क्षोच्चस्थे नृपतिसदृशो ग्रामपुरपः', 'ख्यातः स्वोच्चे गणपुरबलग्रामपूज्योऽर्थवांश्च', 'जीवक्षेत्रगतेऽर्कजे पुरबलग्रामाग्रनेताऽथ वा' इत्यादिषु शनेः स्वोच्च-स्वक्षेत्र-गुरुक्षेत्राणां सम्बन्धैः प्रभुत्वं पूज्यत्वं च निगदितमस्ति । तस्माद् बलवान् उक्तेषु स्थानेषु स्थितो वा शनिः प्रव्रज्याकारको भवति चेज्जातः संन्यासः पीठाधिपत्यं चोभयमपि समर्हति ।
- गुरुणा कृतः प्रव्रज्यायोगः पूज्यत्वप्रभुत्वकारकः कश्चन योगविशेषश्च भवति चेदपि जातः प्रव्रज्यां पीठाधिपत्यं च प्राप्नोति । यतो हि गुरुः स्वभावतो ज्ञानकारकः । स एव प्रव्रज्यां जनयति चेत् ज्ञानजन्यः संन्यास इति भावः । तेनैव पुनः प्रभुत्वपूज्यत्वादिकं द्योत्यते चेत् स

[1] बृहज्जातकम् २४-१६


ISSN: 2249-538X

सन्न्यासः पीठाधिपत्यायेति अभियुक्तानामुक्तिर्युक्तैव ।

➢ राजग्रहेण रविणा कृता प्रव्रज्यापि पीठाधिपत्याय कल्पत इति केचित् ।

तदित्थं स्वल्पमर्थबहुलं च होराशास्त्रं प्रणिनीषुराचार्यो वराहमिहिरः स्वप्रतिज्ञानुसारमध्यायमेनं निरमादिति सुव्यक्तमेव । रुद्रकृता व्याख्याविशेषा अपीह नितरां स्पृहणीयाः । अभियुक्तानुभवसिद्धा युक्तयोऽपि जिज्ञासितानर्थान् स्फुटमवगमयन्ति । तदेतत्सर्वं हृदि निधाय यो दैवज्ञः फलान्यादिशति तस्य न मिथ्या भवेद्वाणीति शम् ।

**********


ISSN: 2249-538X

# कर्तृदोषाः

डा. मुरलिकृष्ण ठि.

विदन्त्येव भवन्तः यच्छुभकार्येषु शुभकाल अपेक्षित इति । उक्तमपि माधवीये -

**कालः शुभक्रियायोग्यो मुहूर्त इति कथ्यते ।** [1]

तादृशकार्येषु कर्तुः कर्त्रोः कर्तॄणां वा जन्मनक्षत्रं जन्मराशिः जन्मलग्नञ्च आधृत्य शुभकर्मणाम् आचरणकाले परिहर्तव्यानां दोषाणां समूहः कर्तृदोषाः इति पदेन मुहूर्तशास्त्रप्रतिपादकेषु ग्रन्थेषु अभिहिताः ।

अथ सामान्यतः विवाहे कन्यावरौ कर्तारौ । निषेके भार्याभर्तारौ कर्तारौ। गर्भोत्पादनात् परं प्रसवान्तं गर्भिण्येव कर्त्री । जन्मतः आरभ्य शिशुरेव कर्ता इति कर्ता क इत्यत्र निर्णयः । तदुक्तं यथा -

**कन्यावरौ विवाहे तु सेके जायापती स्मृतौ ।**
**गर्भोद्भवात्तु भार्यैव कर्ता स्याज्जन्मतः शिशुः ॥** [2]

**कर्तृदोषविवेचनम् -** कर्तृदोषचिन्तने मुहूर्तपदव्याः प्रमाणश्लोकोऽयं वर्तते यथा -

**अष्टाशीतितमांशकं परिहरेत् पूर्वञ्च जन्मांशतो**
**भं जन्माष्टममेतदिन्दुमसदच्छेशांस्तदंशानपि ।**
**आद्ये प्रत्यरभे विपद्यपि वधे त्याज्योऽखिलोंऽशोऽसता-**
**मन्त्येऽन्त्याऽद्यतृतीयभागमितरत्रर्क्षञ्च लग्नाष्टमम् ॥** [3]

आहत्यात्र अष्टावंशाः वर्तन्ते । तत्क्रमशः निरूप्यते यथा –

1. अत्रादौ **अष्टाशीतितमांशकं जन्मांशतः पूर्वञ्च परिहरेत्** । - एकैकस्य नक्षत्रस्य चत्वारो अंशाः । अश्विन्याः प्रथमः अंशः मेषः । द्वितीयांशः वृषभः ।

---

[1] वि. मा. – १अ. २०श्लो.

[2] मु. प. व. व्या. - ४श्लो.,

[3] मु. प. - ४श्लो.


ISSN: 2249-538X

तृतीयांशः मिथुनः । चतुर्थांशः कर्कटः । एवं नव नव अंशाः एकैकस्मिन् राशौ भवन्ति । कर्तुः जन्मनक्षत्रस्य चतुर्ष्वंशेषु यदंशसमये जननं तदंशः स्वजन्मांशः। तदंशकमारभ्य गणयित्वा अष्टाशीतितमम् अंशकं शुभकर्मसु त्यजेत् । अर्थात् जन्मनक्षत्रात् द्वाविंशतितमे अष्टाशीतितमम् अंशकं भवति । उदाहरणार्थं अश्विन्याः द्वितीयांशे जातश्चेत् तदा श्रवणायाः द्वितीयांशः अष्टाशीतितमांशः भवति ।

एवमेव **स्वजन्मांशस्य पूर्वभवम् अंशम् अर्थात् अष्टोत्तरशततमांशम् अपि वर्जयेत्** । एतयोः द्वयोः वैनाशिकांश इति संज्ञा । आचारसङ्ग्रहे तदुक्तं यथा-

**अष्टाशितितमं भागं वैनाशांशं विवर्जयेत् ।**
**अष्टोत्तरशतांशञ्च विवाहे तं विशेषतः ॥**[1]

अत्र अष्टाशीतितमांशकं नक्षत्रमेव त्यजेत् इति केचित्पक्षः । केवलं नक्षत्रांशं त्यजेत् इत्येतत् मुहूर्तपदव्याः पक्षः ।

2. **जन्माष्टमं भं त्यजेत् ।** - जन्मसमये यस्मिन् राशौ चन्द्रः तिष्ठति स राशिः जन्मराशिरित्युच्यते । तस्मात् जन्मराशितः अष्टमराशिमपि शुभकर्मसु त्यजेत् । तन्नाम मुहूर्तकाले जन्माष्टमराशिः लग्नत्वेन न भवेत् । वृषराशौ जातस्य धनुराशिः अष्टमः जायते । अतः धनुर्लग्नं परिहरेत् ।

3. **एतदिन्दुमपि त्यजेत्** । - अर्थात् अत्रैतत् पदेन जन्माष्टमराशिः त्याज्यः । जन्मराशितः अष्टमे चन्द्रस्य सञ्चारकाले शुभकर्माणि कर्त्रा नाचरेत् । चन्द्राष्टम इति लोके प्रसिद्धोयऽम् ।

4. **असदच्छेशांस्तदंशानपि त्यजेत् । -** अत्र असत्पदेन पापग्रहाः, अच्छपदेन शुक्रः । अतः येषामंशानां पापग्रहाः शुक्रश्च अधिपतयः भवन्ति तान् त्यजेत् । अर्थात् मकरराशौ जन्मिनां अष्टमराशिः सिंहः । तदधिपः रविः । तदा शुभकर्मकाले चन्द्रः सिंहांशं स्वीकरोति तदा तस्य त्यागः कर्तव्यः ।

---

[1] मु. प. व. व्या. - ४श्लो.


ISSN: 2249-538X

5. **आद्ये प्रत्यरभे विपद्यपि वधे त्याज्योऽखिलोंऽशः । -** ततोऽग्रे जन्मनक्षत्रस्याधारेण विचारः । स्वजन्मनक्षत्रादारभ्य नव नव नक्षत्राणां क्रमशः जन्म सम्पदिति गणना कर्तव्या तदुक्तं बार्हस्पत्यसंहितायां यथा –

**जन्म सम्पद्विपत्क्षेम प्रत्यरस्साधको वधः ।**

**मैत्रं परममैत्रञ्च जन्मादीनि पुनः पुनः ॥**[1]

एवं गण्यमाने नवनक्षत्राणां वर्गत्रयं जायते । प्रथमवर्गः (प्रथमपर्यायो वा) जन्मादिवर्गः । द्वितीयवर्गः द्विजन्मादिवर्गः अनुजन्मादिवर्गो वा । तृतीयवर्गः त्रिजन्मादिवर्गः । आद्ये प्रत्यरभे इत्याद्यनुसारेण प्रथमवर्गगतानां प्रत्यरविपद्वधानां चत्वारः पादाः (सम्पूर्णं नक्षत्रं) अपि त्याज्याः ।

6. **अन्त्ये असतामंशाः त्याज्याः । -** अन्त्यवर्गगतेषु विपत्प्रत्यरवधेषु पापग्रहाणामंशाः त्याज्याः ।

7. **इतरत्र अन्त्याद्यतृतीयभागं त्यजेत् । -** मध्यमवर्गे पञ्चमनक्षत्रे प्रत्यराख्ये अन्त्यांशं, तृतीयनक्षत्रे विपदाख्ये आद्यांशं, वधाख्ये सप्तमनक्षत्रे तृतीयांशं च त्यजेत् । एतदुक्तं यथा -

**त्याज्याः क्रमान्मध्यमजन्मताराद्गोमासतारेष्वथ केवलांशाः।**[2]

अथवा व्यावहारिकः पक्षे तु यथोच्यते - **गोमांसं केवलं त्यजेत्** इति । कटपयाद्यक्षरगणनायां सति गोमांसमित्येतत् क्रमशः ३, ५, ७ सङ्ख्यानां सूचकः। केवलमित्येतत् १, ४, ३ सङ्ख्यानां सूचकः । एवं तृतीय-पञ्चम-सप्तमनक्षत्राणां क्रमशः प्रथम-अन्त्य-तृतीयचरणास्त्याज्याः इत्येतत्पूर्वोक्तवत्सिध्यति ।

**8. ऋक्षञ्च लग्नाष्टमम् ।** - जन्मलग्नादष्टमगतः राशिः वर्ज्यः । मुहूर्तकाले स्वजन्मलग्नादष्टमगतं चन्द्रं वर्जयेत् ।

एवमुक्तेषु कर्तृदोषेषु त्रयः दोषाः बलवत्तराः (यद्यपि अपवादगुणैरपि न ग्राह्याः)। तदप्युक्तं यथा –

[1] मु. प. व. व्या. - ४श्लो.

[2] मु. प. व. व्या. - ४श्लो.


ISSN: 2249-538X

**जन्माष्टमर्क्षतच्चन्द्रौ वधर्क्षञ्च विशेषतः ।**

**विवर्ज्याः कर्तृदोषेषु सर्वेषु शुभकर्मसु ॥** [1]

लग्नाष्टमराशिः जन्माष्टमराशिः वधसंज्ञकं नक्षत्रमित्येते त्रयः अंशाः सर्वत्र शुभकर्मसु अग्राह्याः । अत्यापदि प्रायश्चित्तं विधाय लग्नाष्टमराशिः गृह्यते।

एवं केरलीयसम्प्रदायानुगामिभिः जनैः अथवा मुहूर्तपदवी-महूर्तरत्नादिकेरलीयमुहूर्तग्रन्थेषु एते विचाराः सङ्ग्रहेण **कर्तृदोषाः** इति पदेनाभिहिताः । अन्यत्र विद्यामाधवीय-मुहूर्तचिन्तामणि-मुहूर्तमार्तण्डादिषु ग्रन्थेषु इमे विचाराः मुहूर्तदोषकथनप्रसङ्गे त्याज्यदोषसमूहे निवेशिताः ।

**<u>सङ्केताक्षरसूची -</u>**

१. मु. प. – मुहूर्तपदवी ।

२. मु. प. व. व्या. – मुहूर्तपदवी वरदीपिका व्याख्यायाम् ।

३. वि. मा. – विद्यामाधवीयम् ।

**<u>आकरग्रन्थाः</u>**

१. **मुहूर्तपदवी – वरदीपिकाव्याख्यासहिता,** सं- ज्योतिर्निधिः श्रीअनन्तपद्मनाभतन्त्री, बैल्लूरु; प्रकाशनम् – बैल्लूरुअनन्तपद्मनाभतन्त्रिणामभिनन्दनसमितिः ।

२. **मुहूर्तपदवी सटीका –** सं – च. मू. ईश्वरशास्त्री; प्रकाशनम् – च. मू. ईश्वरशास्त्री, शास्त्रिनिवासः, केदिल - ५७४२२० ।

३. **विद्यामाधवीयम् (खण्डत्रयात्मकम्) –** सं. - डा. आर्. शामशास्त्री, सर्वकारीयप्राच्यविद्यासंशोधनालयः, मैसूरु ।

**********

[1] मु. प. व. व्या. - ४श्लो.


ISSN: 2249-538X

# उदयान्तरम्

डा. अनिरुद्धनारायणशुक्लः

"यात्रा विवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वमिति,, भास्करोक्तवचनानुसारेण फलस्य स्फुटत्वमं स्फुटग्रहविना नासंभवम् , अतः ज्योतिषश्शास्त्रे सर्वप्रथमं ग्रहस्थितिः ग्रहसाधनार्थं वा अहर्गणोत्पन्नमध्यमग्रहसाधनं करणीयं भवति । तदहर्गणोत्पन्नमध्यमग्रहाः लंकादेशीयाः शून्याक्षांशीयाः गर्भक्षैतिजग्रहाः भवन्ति । एवं प्रायः सर्वेषु सिद्धान्तग्रन्थेषु वर्णितमस्ति, परन्तु अचार्यभास्करैः सिद्धान्तशिरोमणावहर्गणोत्पन्नमध्यमग्रहाः लंकादेशीयाः गर्भक्षितिजसन्निधिगाः साधिताः । यथोक्तम्-

द्युचरचक्रहतोदिनसंचयः कहहितो भगणागिफलंग्रहाः । दशशिरः पुरिमध्यमभास्करे क्षितिजसन्निधिगे सति मध्यमः ॥ [1] इति, तद् लंकादेशीयगर्भक्षितिजसन्निधिगग्रहान् लंकादेशीयवास्तविकगर्भ-क्षितिजस्थान् ग्रहान् सिध्यर्थमुदयान्तर –संस्कारस्यावश्यकता भवति । उक्तञ्च भास्कराचार्यैः -अहर्गणो मध्यमसावनेन् कृतश्चलत्वात् स्फटसावनस्य । तदुत्थखेटा उदयान्तराख्यः कर्मोद्भवेनोन युता फलेन ॥ - लंकोदये-स्युनर्कृतास्तथाद्यैर्यतोन्तरं तच्चलमल्पकं च । [2] इति, तत्र च तावत् किं नाम उदयान्तरमित्याशंकायाम् उदयोः अन्तरमुदयान्तरमिति तत्र कयोः उदयोः अन्तरमिति प्रश्नोत्तरे मध्यम-कल्पितग्रहयोः (मध्यमस्पष्टग्रहयोः) क्षितिजोपरि उदये यदन्तरं तदेवोदयन्तरम्, विषुवांश –भुजांशयोऽन्तरमुदयान्तरम् , रविगतिकलातुल्यासु-

---

[1] सिद्धन्तशिरोमणिः मध्यमाधिकारः श्लोक सं. ४ ।

[2] सिद्धान्तशिरोमणेः गोलाध्यायः मध्यगतिवासना -श्लोक सं. १९. १/२

ISSN: 2249-538X

रविगतकलोत्पन्नासवोऽन्तरम् उदयान्तरमिति । सैद्धान्तिकदृष्ट्या भुजांशस्य ज्ञानं नाडीवृते भवति, अर्थात् मध्यमसूर्य: मध्यमगत्या क्रान्तिवृत्ते भ्रमति तथा कल्पितमध्यमसुर्य: तादृश्या मध्यमगत्या (मध्यगतिकलाल्या -सुभि:) नडीवृत्ते भ्रमति । तत्र कल्पितार्कस्य नडीवृत्ते स्थानज्ञानार्थं गोलसन्धित: मध्यमार्कभुजांशचापेन एकं वृत्तं करणीयं तद् वृत्तं नाडीवृत्ते यत्र लगति तत्र कल्पितार्कस्य स्थानं भवति । क्रान्तिवृत्तस्थमद्यमसूर्यस्य वास्तविकरुपेण नात्तवृत्ते कुत्र स्थानं भवति इत्याशङ्कायां क्रान्तिवृत्तस्थग्रहोपरिगतध्रूवप्रोतवृत्तं करणीयं तद् ध्रूवप्रोतवृत्तं नाडीवृत्ते यत्र लगति तद् नडीवृत्तीयवास्त-विकमध्यमसूर्य: भवति । अत: नडीवृत्तस्थ- कल्पितवास्तविकमध्यमसूर्ययो: स्थानं निश्चितं जातम् , अर्थात् एकवृत्तीय(नडीवृत्तीय) उभयो: साजत्यवशात् कल्पितवास्तविकमध्यमसूर्ययो: योगान्तरं भवितुं शक्यते । अत्र प्रश्न: संजायते यत् कल्पितवास्तविकमध्यमार्कयो: कथमन्तरं समायतीति प्रश्नोत्तरे क्रान्तिनाडीवृत्तयो: पृष्ठीयकेन्द्रयो: अन्तरे सति कल्पितवास्तविकमध्यमार्कयोर्मध्ये अन्तरं समायाति, तदन्तरमेवोदयान्तरमिति कथ्यते । वस्तुतस्तु मध्यमार्क: क्रान्तिवृत्ते स्वगतिकलोत्पन्नासुभि: स्वकालं सिध्यति , येन क्रान्तिवृत्तीया एका कला एकेन असुकालेन न उदेति , अत: क्रन्तिवृत्ते सममध्यमगत्या मध्यमार्को भ्रमन्नपि विभिन्नया स्वगतिकलोत्पन्नासुमितया स्वविषुवांशाख्या गत्या विषुवतवृत्ते निवसति । कल्पितार्कस्तु मध्यगतिकलासमानासुभि: स्वकालं सिध्यति, तत्र एकाकला एकेन असुकालेन उदेति, तत्र कलाऽसव: समत्वात् । अतएव मध्यमार्कस्य मध्यमगतिकलोत्पन्नासुगत्या विषुवद्वृत्ते भ्रमन्नपि कल्पितार्क: सततं मध्यमार्कापेक्षया भुजकलातुल्यासु अग्रे भवति । अस्मिन्नेवक्रमे आचार्यभास्करै: सिद्धान्तशिरोमणे: गणिताध्याये उदयान्तरानयनस्य प्रक्रिया दत्ता । तद्यथा –


ISSN: 2249-538X

"युक्तायनांशस्य तु मध्यमस्य भुक्तासवोर्कस्य निरक्षदेशे" ।[1] अर्थात् सायनमध्यमार्कस्य भुक्तांशसकाशात् यदि त्रिंशदंशै: स्वनिष्ठराशेरुदयासवस्तदा भुक्तांशै: किमिति ?, इति त्रैराशिकेन भुक्तासव: संसाधनीय: ।

सूत्रात्मकस्वरुपम् – : $\frac{\text{रविनिष्ठराश्युदयासव:} \times \text{भुक्तांशा:}}{\text{३०}}$ = लब्धि: भुक्तासव: भवन्ति । तदनन्तरं रविभुक्तमेषादिराश्युदयासुभि: युक्तास्तदा सायनसूर्यस्य मेषादयो भुक्तासव: भवन्ति । एवमेव क्रान्तिवृत्तीयसायनमध्यमार्कस्य कलां ज्ञात्वा भुजकला कलातुल्यासवो वा ज्ञातव्या । अत्र भुजकला तथा कलोत्पन्नासवोन्तरेण " उदयान्तरकला असवो वा " भवन्ति । कलासवोऽन्तर्जन्य ग्रहगतिज्ञानाय - यदि षडशताधिकैकविंशतिसहस्त्रमितम् (21600) अहोरात्रासुभि: ग्रहगतिकलास्तदा उदयान्तरासुभि: किमिति ? इति त्रैराशिकेन ग्रहगतिसापेक्षोदयान्तरकला: भवन्ति ।

सूत्रात्मकस्वरुपम् – : $\frac{\text{ग्रहगतिकला:} \times \text{उदयान्तरासव:}}{\text{अहोरात्रासव:}}$ = उदयान्तरकला: , एताभ्यो उदयान्तरकलाभ्यो आगतोदयान्तरकलाऽसवो वा अल्पका: स्युस्तदा आगतोदयान्तरकलाऽसवो वा मध्यमग्रहे वियोज्या, अधिकश्चेत्तदा योज्या भवन्ति ।

यतोहि तत्र सायनमध्यमार्कस्य क्रान्तिवृत्ते यावान् राश्यादिप्रदेश: तदन्ते तावद्भिरंशैरेकं भुजांशवृत्तं तथा तद्राश्यन्तविन्दूपरिगं ध्रुवप्रोतवृत्तञ्च करणीयम्, नाडीवृत्ते सायनमेषादितो तद्ध्रुवप्रोतवृत्तावधि: मध्यगतिकलोत्पन्नासवो भवन्ति, यदधिका: नाक्षत्रषष्ठिघट्यो स्पष्टसावनदिनं , तथा च भुजांशवृत्तावधि: मध्यगतिकलातुल्यासुभिरधिकनाक्षत्रषष्ठिघट्यो

[1] सिद्धान्तशिरोमणि: स्पष्टाधिकार: श्लोक सं. ६२ ।

ISSN: 2249-538X

मध्यमसावनदिनं भवति । तत्र नडीवृत्ते विषुवांशस्य कोटिरुपत्वात् क्रान्तिवृत्ते क्षेत्रांशस्य च कर्णरुपत्वात् रवेर्मध्यगतिकलोत्पन्नास्वन्तचिन्हं यदा क्षितिजे लगति न तदा मध्यगतिकलातुल्यास्वन्तचिन्हं, किन्तु तच्चिन्हद्वयान्तरोत्थकालेन उदयान्तराख्येन विषमपदे क्षितिजादधः समपदे चोर्ध्वं भवति । अतः साधितफलं विषमपदे ऋणं समपदे धनं च क्रियते चेत्तदा ग्रहाः क्षितिजस्थाः भवन्ति ।

इदानिमुदयान्तरस्यास्य कुत्राऽभावो कुत्र च परमत्वमिति विचार्यते -- तत्र क्रान्तिवृत्तस्य प्रत्येकं पदं पञ्चदशभिः घटिकाभिः उद्गच्छति, किन्तु पदान्तर्गतैकैको राशिः पञ्च- पञ्चघटिकाभिः समानकाले न उद्गच्छति, अर्थात् पदारम्भे पदान्ते च भुजांशविषुवांशयोः अभावात् समत्वाद्वा, (भुजांशविषुवांशयोः कला-असवोः समत्वाद्) अथवा कला-असवोः अन्तराभावात् , यत्र पदान्तं भवति तत्र कलाऽसवोः मानं 5400 भवति तथा तद् पदान्तैव उदयान्तराभावः, पदमध्ये कलाऽसवः उपचीयत्वे सति परमता भवति ।

निष्कर्षः-

दृक्सिद्धकरणार्थं ग्रहेषु भास्करोक्तोदयान्तरनामकः विशिष्टसंस्कारः क्रियते चेद् ग्रहाः स्फुट्दृक्सिद्धाः भवन्तिः । इति

**********



ISSN: 2249-538X

# निर्देशनमनोविज्ञानम्

डा. चन्द्रकान्तः

लोके निर्देशनं विना कोऽपि जन्तुः किमपि कार्यं कर्तुमेव न शक्नोति । जननादारभ्य मरणपर्यन्तं निरन्तरं येन केनचित् रूपेण निर्देशनं प्राप्यैव जीवः कर्मणि प्रवर्तते । अतः निर्देशनं मानवानां प्रादुर्भावादारभ्य निरन्तरं विद्यमानं तत्त्वं भवति । प्राचीनकाले ज्येष्ठाः बाल्यावस्थायां विद्यमानेभ्यः बालेभ्यः मूलभूतावश्यकताविषये यथा भोजनवस्त्रधारणवाससुरक्षादिषु विषयेषु निर्देशनं यच्छन्तिस्म । जीवनस्य प्रत्येकमंशं स्वीकृत्य निर्दिशन्ति स्म । अतः समाजे निर्देशनं स्वभावतः एव सम्मिलितमासीत्। परन्तु मनोविज्ञानस्य क्रमिकः विकासः यदा जातः तदारभ्य सर्वेषु क्षेत्रेषु निर्देशनस्य विशिष्टं चिन्तनं समारभ्यत। साम्प्रतं मनोविज्ञानस्य पृथक् शाखारूपेण निर्देशनमनोविज्ञानमिति नाम्ना लोके प्रसिध्यति निर्देशनम् ।

निर्देशनप्रक्रिया तादृशी प्रक्रिया भवति या च यस्मिन् कस्मिन् अपि विषये अन्तिमनिर्णय स्वीकरणे मूलभूतं सहायमाचरति । निर्देशनद्वारा कश्चन व्यक्तिविशेषः स्वव्यक्तित्वं, सामर्थ्यं, योग्यताञ्च अवगत्य समस्यायाः परिहारप्राप्तौ समर्थो जायते । निर्देशनकर्ता निर्देश्यस्योपरि स्वविचारान्नारोपयति परन्तु समस्यासमाधाने, कर्मानुष्ठाने वा समर्थं करोति । अत उदाहरणरूपेण हनूमता समुद्रोल्लङ्घने प्राप्तं निर्देशनं, अर्जुनस्य रणाङ्गणे युद्धे प्रवृत्त्युत्पादकं निर्देशनं दर्शयितुं शक्यते । निर्देशनम् उपदेश एवेति न मन्तव्यम्, अथवा अभिप्रेरणमिति । यतः उपदेशे विशेषतः ज्ञानाधानं जायते । अभिप्रेरणायां प्रेरकतत्त्वस्य बलाधानं भवति । अतः उपदेशभिन्नत्वे अभिप्रेरणभिन्नत्वे च सति कर्मसामर्थ्योत्पादकत्वं निर्देशनत्वमिति वक्तव्यमापतति ।

ननु निर्देशनं निर्देश्यरूपव्यक्तिकेन्द्रितं भवति, न तु तस्य व्यक्तिविशेषस्य समस्याकेन्द्रितं वा कार्यकेन्द्रितं भवति । तस्मात्


ISSN: 2249-538X

निर्देशनस्योद्देश्यं व्यक्तौविद्यमानायाः अन्तर्निहितायाः शक्तेः सर्वाङ्गीणविकाससम्पादनं वर्तते येन सः पुरुषः कर्मणि समर्थो जायेत ।

Jones महोदयः वदति यत् निर्देशनस्यार्थः केवलं सहायताप्रदानं नास्ति परं पथप्रदर्शनं, चिन्हाङ्कनं संसूचनमपि वर्तत इति ।

To guide means to indicate to point out to show the way it means more than to assist.

एमरीस्टूप्स अभिप्रैति यत् निर्देशनं सहायता प्रदानस्य तादृशी निरन्तरप्रक्रिया वर्तते या व्यक्तौ सामाजिकदृष्ट्या समुचितक्षमतानां विकासात्मिका इति ।

एवञ्चेत् निर्देशनस्यावश्यकता वर्तते किमिति प्रश्नः समुदेति । मनोविज्ञानमस्य निर्देशनस्य महती आवश्यकता मानवजीवने वर्तत इति वदति। निर्देशनं द्विविधं भवितुमर्हति यथा स्वमस्तिष्कप्राप्तं निर्देशनं यत् आन्तरिकं निर्देशनमिति वक्तुं शक्यते, येन निर्देशनेन सर्वोऽपि जन्तुविशेषः जीवनं यापयति। अन्यच्च बाह्यं निर्देशनं यत् पितृभ्यां, परिवारसदस्यैः, ज्येष्ठैः, शिक्षकैः, शिक्षणेन, विद्यालयेन, समाजेन च प्राप्यते येन बालः सत्पथे स्वजीवनयापनं कर्तुं समर्थो जायते । अपि च मानवः सामाजिकः प्राणिविशेषः वर्तते । अतः तं मानवं समाजोपयोगिनं, दायित्वनिर्वाहकं, समाजस्योत्पादकसदस्यं सम्पादयितुं निर्देशनस्यावश्यकता वरीवर्ति । आधुनिके काले वैज्ञानिकप्रगतितः मानवजीवनं निरन्तरं परिवर्तनशीलं समस्याभिमुखीकरणभूयिष्ठं च वर्तते । परम्परागतमान्यताः विनश्यमानाः दृश्यन्ते, नूतनमान्यताः उदीयमानाः वर्तन्ते, तस्मात् परम्परायाः संरक्षणेन सह नूतनज्ञानस्य प्राप्त्यर्थं समुचित निर्देशनस्यावश्यकता जागर्ति । अतः बिन्दु रूपेण वक्तव्यं चेत् –

१. व्यक्तिगतविकासार्थं निर्देशनस्यावश्यकता वर्तते ।

२. समाजिकहितार्थमपि सर्वत्र निर्देशनस्यावश्यकता वर्तते ।

३. राजनैतिकदृष्ट्यापि निर्देशनस्यावश्यकता वर्तते ।


ISSN: 2249-538X

४. शैक्षिकदृष्ट्यापि निर्देशनस्यावश्यकता वर्तते ।

व्यक्तिगतायामवश्यकतायां रुचिसम्बद्धं क्षमतासम्बद्धं, परिस्थितिसम्बद्धं, व्यक्तित्वसम्बद्धं च निर्देशनं समायति ।

सामाजिकहितसम्बद्धावश्यकतायां पारिवारिकजीवनपरिवर्तनसम्बद्धं, व्यावसायिकपरिस्थितिसम्बद्धं, जनसंख्यावृद्धिसम्बद्धं, धार्मिकमूल्यसम्बद्धं, नैतिकमूल्यसम्बद्धं च निर्देशनं समायाति ।

राजनैतिकावश्यकतायां राष्ट्रस्य सुरक्षासम्बद्धं, धर्मिनिरपेक्षतासम्बद्धं, भावात्मकैकतासम्बद्धं, प्रजातन्त्रसम्बद्धं च निर्देशनं समायाति ।

शैक्षिकावश्यकतायां पाठ्यक्रमचयनसम्बद्धम्, अनुशासनसम्बद्धं, वृत्तिसम्बद्धम्, शैक्षिकावसरसम्बद्धं च निर्देशनं समायाति ।

एवञ्च निर्देशनस्य सम्बन्धः जीवनस्य प्रत्येकपक्षेण सह वर्तते । तथापि केषु चित् प्रकारेषु निर्देशनं विभक्तुं शक्यते ।

1930 तमे वर्षे विलियम् मार्टिन् प्रोक्टर महोदयेन स्वकीय Educational and vocational Guidance नामके पुस्तके केचन षड्प्रकाराः प्रादर्शि तद्यथा –

'१. व्यावसायिकं निर्देशनं, २. शैक्षिकं निर्देशनं, ३. नागरिककार्यनिर्देशनं,

४.स्वास्थ्यनिर्देशनं,

५. चारित्रिकं निर्देशनं, ६. समयस्य सदुपयोगार्थं निर्देशनमिति ।

पुनः वर्षद्वयानन्तरं 1932 तमे वर्षे जान् एम्. ब्रिवर् महोदयेन दशप्रकाराः प्रादर्श्यन्त । ते च – '१. शैक्षिकनिर्देशनं, २. व्यावसायिकं निर्देशनं, ३. गृहकार्यनिर्देशनं, ४. धार्मिकं निर्देशनं, ५. मनोरञ्जनस्य निर्देशनं, ६. नागरिकतायाः निर्देशनं, ७. वैयक्तिकविकासस्य निर्देशनं, ८. समुचितकार्यनिर्देशनं, ९. परस्परं सहयोगस्य निर्देशनं, १०. सांस्कृतिकं निर्देशनम् ।

एतेषु शैक्षिकनिर्देशनं प्रधानं भवति यस्योद्देश्यं छात्रस्य सर्वाङ्गीणविकासः वरीवर्ति ।


ISSN: 2249-538X

भाविनि कालेऽपेक्षितानां मानवसंसाधनानां निर्माणस्य समग्रं दायित्वं शिक्षणस्य वर्तते इत्यत्र नास्ति विसंवादः । तस्मात् शिक्षणं समुचितं भवेत् येन तत्तत्कालापेक्षितस्य मानवसम्पदः निर्माणं जायेत । तत्तादृशशिक्षणव्यवस्था यद्यभिलष्यते तर्हि समुचितनिर्देशनपरिपोषितं शिक्षणं प्रकल्पितं स्यात् । तदा शिक्षणं समग्रमपि निर्देशनाधारितं जायते । यदा निर्देशनाधारितं शिक्षणमनिवार्यतां भजते तदा निर्देशनं सुदृढं, सुस्पष्टं, सकारात्मकं विकासोद्दिष्टं भवेत् । तादृश निर्देशनस्य कृते मनोविज्ञानस्य भूमिका अपरिहार्या वर्तते । यथा शिक्षणं समुचितनिर्देशनपरिपोषितं तथा निर्देशनं मनोविज्ञानस्य तत्त्वपरिपोषितं जायते । तदा मनोविज्ञानाधारितानि निर्देशनतत्त्वानि पृथक् वैविध्यं प्राप्य निर्देशनमनोविज्ञानरूपेण शिक्षाक्षेत्रे मूलभूतानां तत्त्वानां योगदानं विधास्यन्ति । यतो हि शिक्षायाः विविधाः स्तराः वर्तन्ते, येषु स्तरेषु अध्येतुः मानसिकता भिन्ना भवति, तदनुगुणं निदेशनमपि भिन्नं जायते । एवञ्च विद्यालयीयैः शिक्षकैः सर्वैरपि निर्देशनतत्त्वानां मनोविज्ञानान्तर्गतानां ज्ञानसंम्यस्पादनम् अनिवार्यं वर्तते । अपि च निर्देशनमनोविज्ञानस्योद्देश्यसिद्धान्तप्रक्रियादीनां विषयः विशालः, विशिष्टश्च विद्यते । समग्रस्यापि तस्य विवरणस्यौचित्याभावात्, विस्तरभयाच्च अत्रैवोपसंह्रियते ।

**सहायकग्रन्थसूची -**


1. उच्चतरशिक्षामनोविज्ञान – एस्. पी. गुप्ता – २०१०, शारदापुस्तक भवन, इलहाबाद
2. शिक्षामनोविज्ञान – डा. एस्. एस्. माथुर – २००७, अगरवाल् पब्लिकेशन्स्, आगरा
3. शैक्षणिकमनोविज्ञान – एन्. बि. कोङ्गवाडा – २००९, विद्यानिधि प्रकाशन, गदग
4. शिक्षातकनीकी – डा. जे. एस्. वालिया – २००९, अहम् पाल् पब्लिशर्स, जलन्धर
5. शैक्षणिक तन्त्रज्ञान – सि. वि. म्यागेरी – २००९, विद्यानिधि प्रकाशन, गदग


**********



ISSN: 2249-538X

# स्मृतिः विस्मृतिः

## (Memory and Forgetting)

डा. रामचन्द्रुल बालाजी

अस्माकमनुभवाः सर्वे मस्तिष्के केन्द्रिताः भवन्ति । ततः चिन्तनानि,विवेकः,ऊहा इत्यादीनाम् उत्पत्तिर्भवति । अतः चिन्तनादीनां जननी स्मृतिर्भवतीति वक्तुं शक्यते ।मानवजीवने स्मरणविस्मरणयोः अत्यन्तमहत्वं वर्तते । विशेषतया शिक्षाप्रक्रियायां स्मरणस्य विशेषमहत्वं वर्तते । स्मरणशक्तिं विना बौद्धिककार्यकरणं दुष्करं भवति । अधिगमप्रक्रियायां स्मरणमत्यन्तमावश्यकं भवति । मनोवैज्ञानिकचिन्तने स्मरणं,स्मृतिरपि समानार्थे प्रयोगे भवतः वर्तते । स्मृतिशब्दः वस्तुतः एकसंज्ञा भवति, स्मरणमेकं क्रियाद्योतकपदं भवति । स्मरणेन साकं मानवस्य स्मृतिरपि आवश्यकी । वस्तुतः स्मृतिः मानवानामेकं वरं भवति, कदाचित् शापो भवतिश्च । प्राणिनामियं शक्तिः निसर्गादेव सिद्धा वर्तते यत् अनुभूतानाम् अंशानां मनसि सङ्कलय्यधारणम् । अस्याः शक्तेरेव स्मृतिरिति नाम । स्मृतिशक्त्या पूर्वानुभूतानाम् अंशानां पुनरपि चिन्तनं भवति । यद्यपि संस्कृतभाषायां “स्मृतिस्मरणधीच्छासुशास्त्रे” इति पर्यायत्वमुक्तमस्ति । अत्र कश्चन भेदः ज्ञातव्यः- स्मृतेः कार्यं भवति स्मरणम् । स्मृतिशक्तिरेव स्मर्यमाणविषयं मनोयवनिकायां सन्निधापयति ।

**“स्मृतिर्व्यतीतविषया मतिरागामिगोचरा ।**
**बुद्धिः तात्कालिकीज्ञेया प्रज्ञात्रैकाल्यगोचरा “॥**

इति विद्याधरचक्रवर्तिनः सम्प्रदायप्रकाशिकायां प्रतिपादितवन्तः ।

बालानां स्मरणशक्तिः प्रवयसां स्मरणशक्त्यपेक्षया न्यूना भवति । इयं बालानां क्रमशः वृद्धिर्भवति । पञ्चविंशे वयसि पूर्णतां लभते । चतुष्पञ्चाशत् वयः पर्यन्तम् अन्यूना वर्तते । ततः परं शनैः शनैः न्यूनी भवतीति


ISSN: 2249-538X

मनोवैज्ञानिनः । इयं सर्वेषां समाना न भवति । केचन श्रुतधारिणः, केचन ग्रहणेमन्दाः, धारणे अतिसमर्थाः, केषाञ्चित् नामसंख्यादिषु स्मरणशक्तिः, केचित् सकृद्दृष्टं परमुखं नैव विस्मरन्ति ।

मनसः स्वच्छरूपेण नित्यनूतनतया भवितव्यमित्युक्तौ स्मृतिः भारः न भवितव्या । प्राचीनविषयाणां सर्वेषां स्थितिः नूतनज्ञानार्जने अवरोधरूपेण न भवितव्या । अतः स्मृत्या साकं विस्मृतिरपि आवश्यकी ।

स्मृतिः एका मानसिकाप्रक्रिया भवति यस्यां व्यक्तिः विषयवस्तुनः धारणं, स्मरणञ्चकृत्वा चेतनावस्थायामुपयोगं कर्तुं शक्नोति । विषयस्य धारणार्थं प्रथमतया विषयवस्तुनः अधिगमः आवश्यकः भवति । अधिगमं विना धारणं नैव सम्भवति, धारणं विना स्मरणं नैव सम्भवति । अधिगमस्य फलस्वरूपेण मानवेषु कानिचन संरचनात्मकपरिवर्तनानि (Structural Changes) भवन्ति । तान्येव स्मृतिचिह्नानि (Memory Traces) नाम्ना व्यवह्रियन्ते । एतानि स्मृतिचिह्नानि यावत्पर्यन्तं बाह्योद्दीपकं नैव भवति, तावत् पर्यन्तं निष्क्रियारूपेणैव भवन्ति । एतानि स्मृतिचिह्नानि कीदृशरूपेण भवन्तीति कथनमत्यन्तकठिनं भवति । तज्ज्ञानार्थं स्मरणस्य कानिचन निर्वचनानि दीयन्ते -

1) पूर्वार्जितज्ञानस्य प्रत्यक्षरूपेण उपयोग एव स्मरणं भवति ।

   Memory consists in remembering what has previously been learned. **- Wood Worth**

2) पूर्वार्जितप्रतिक्रियायाः केषाञ्चनलक्षणानां वर्तमानप्रक्रियायां व्यक्तीकरणमेव स्मरणं भवति ।

   To remember means to show in present response some signs of earlier learned responses. **- Hilgard and Atkinson**

3) स्मृतिः प्राणिनामेकायोग्यता भवति, यया पूर्वाधिकप्रक्रियाणां सूचनाः एकत्रिताः भवन्ति । एवं, विशिष्टोत्तेजनानां प्रत्युत्तरदानाय तासां सूचनानां पुनः प्रस्तुतीकरणं भवति ।


ISSN: 2249-538X

Memory is the ability of an organism to store information from earlier learning process (experience, retention) and reproduce that information in answer to specific stimuli.

-**H.J. Eysenek**

उपर्युक्तनिर्वचनैः ज्ञायते यत् स्मृतिः एकामानसिकयोग्यता भवति या पूर्वानुभवानां सञ्चयने कालान्तरे तेषां चेतनप्रपञ्चे प्रयोगे च सम्बद्धा भवति । केषाञ्चन मनोवैज्ञानिकानां चिन्तनानुसारं स्मृतिः एकाशारीरिकी (physiological) प्रक्रिया भवति, केचन स्मृतिः मानसिकप्रक्रिया इति मनुते । वास्तवरूपेण स्मृतिः मनोभौतिक (Phychophysical) योग्यता भवतीति कथनमुत्तमं भवति ।

अत्र दार्शनिकाः स्मृतिविषये बहुनिरूपणं कृतवन्तः । तत्र न्यायसूत्रकारः "**स्मरणन्त्वात्मनः ज्ञस्वाभाव्यात्**" इत्यवोचत् । आत्मनः ज्ञस्वाभाव्यात् स्मरणमुपपद्यते । तत्र भाष्यकारः **"आत्मनः एव स्मरणं, न बुद्धिसन्ततिमात्रस्य"** इति वदति । तत्र न्यायवार्तिकतात्पर्यटीकाकारः **"त्रिकालव्यापिनी ज्ञानशक्तिरेव ज्ञस्वाभाव्यम्"** [ज्ञास्यामि, जानामि,अज्ञासिषम् इति त्रिकालव्यापिनी] इति वदति । तत्र जैनाः **"संस्कारोद्बोधनिबन्धनतदित्याकारस्मृतिः"** इति वदन्ति । तत्र विद्यानन्दः **"तदित्याकारानुभूतार्थविषयास्मृतिः"** इति वदति । सांख्यैः **"स्मृतिः संस्कारजन्यं ज्ञानम्"** [विज्ञानभिक्षुः] इति वदन्ति । योगदर्शने **"अनुभूतविषयासम्प्रमोषः स्मृतिः"** इति पतञ्जलिः वदति । तत्र भामतिकारः **"संस्कारमात्रजं हि विज्ञानं स्मृतिः"** इति वदति । छान्दोग्योपनिषदि **"आहार्यशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवास्मृतिः"** इत्युच्यते ।

"**When the food is pure the Mind is pure, When the Mind is pure memory becomes Firm"**



ISSN: 2249-538X

उपर्युक्तनिर्वचनानां विश्लेषणेन संस्कारमात्रजन्यंज्ञानं स्मृतिः इति सिध्यति । प्रशस्तपादः उत्तमसंस्कारार्थं त्रीणि कारणानि वदति –

**1)** Intense cognition

**2)** Repeated cognition

**3)** Interest cognition

न्यायभाष्ये उत्तमधारणार्थं सप्तविंशति हेतवः प्रतिपादिताः वर्तन्ते । यथा –

**"प्रणिधानिबन्धाभ्यास - - - - -- - - धर्माधर्मनिमित्तेभ्यः "॥ न्या. सू. 3-2-43**

- **स्मृतेः तत्त्वानि [**Elements of Memory]

निस्सन्देहेन वक्तुं शक्यते यत् स्मृतिः एका जटिला मनोशारीरिकी योग्यता (Psycho physiological ability), यस्यां चतस्रः प्रक्रियाः सन्निहिताः भवन्ति ताः-

1. अधिगमः (Learning)
2. धारणम् (Retention)
3. पुनःस्मरणम् (Recall)
4. प्रत्यभिज्ञानम् (Recognition)

i. **अधिगमः –** अभ्यासेन प्रशिक्षणेन संसूचनैः वा जीवव्यवहारे जायमानः शाश्वतपरिणामविशेषः अधिगमः भवति । विषयवस्तुनः स्मरणार्थमादौ अधिगमः आवश्यको भवति । अधिगमं विना स्मरणमेव नैव सम्भवति । अतः स्मृतेः प्रथमाङ्गं भवति अधिगमः ।

**ii. धारणा -** स्मृतेः द्वितीयाङ्गं भवति धारणा । अधीतविषयस्य मस्तिष्के सञ्चयनम् अथवा स्थिरीकरणं वा धारणा इत्युच्यते । इयं मस्तिष्कस्य एकाशक्तिः । Wood Worth महोदयस्य कथनानुसारं धारणा सा शक्तिः भवति यस्याम् अधीतविषयाणां सक्रियावस्थां प्रत्यानयनपर्यन्तं निष्क्रियारूपेण स्थापयति । यदा एकस्य विषयस्य अधिगमः भवति सः विषयः मस्तिष्कस्य अचेतने अर्द्धचेतने वा रक्षितो भवति । अस्यैव स्मृतिचिह्नमिति नाम ।



ISSN: 2249-538X

आवश्यकतानुसारं तस्य विषयस्य स्मरणं कर्तुं शक्यते । परन्तु स्मृतिचिह्नानां नाशेसति व्यक्तिः तत्सम्बद्धांशानां विस्मरणं प्राप्नोति । इयं धारणात्मिकाशक्तिः व्यक्तिषु मात्राभेदेन भिन्नभिन्नरूपेण भवति । मानसिकयोग्यता, शारीरिकस्वास्थ्यम्, अभिरुचिः, चिन्तनानि च धारणाशक्तेः प्रभावोत्पादककारकाः भवन्ति।

iii. **पुनः स्मरणम् –** एतत् स्मृतेः तृतीयाङ्गं भवति । एतत् धारणाशक्तेरुपरि आधारितं भवति । यावत्धारणं भवति तावत् पुनःस्मरणं भवितुमर्हति । भीतिः, मानसिकक्लेशाः, विकाराः, पुनःस्मरणे बाधकाः भवन्ति । अध्यापकाद्भीतः छात्रः उत्तमरूपेण धृतस्यविषयस्यापि अध्यापकस्य पुरतः स्मर्तुमसफलः भवति ।

**iv. प्रत्यभिज्ञानम् –** एतत् स्मृतेः चतुर्थाङ्गं भवति । प्रत्यभिज्ञानं नाम पुनःस्मरणदशायां दोषरहितज्ञानप्राप्तिः ।

सामान्यतः पुनःस्मरण-अभिज्ञानयोः क्रियाः सम्मिल्यैव भवन्ति । एतेषु उपर्युक्ताधिगमादिषु पूर्वांशद्वयं स्मरणकारणे भवतः, उत्तरांशद्वयं तत्फलं भवतीति विवेकः ।

- **स्मृतेः प्रकाराः [Types of Memory]**

**1) तात्कालिकस्मृतिः [Immediate Memory]**

तात्कालिकस्मृतेरेव सांवेदिकीस्मृतिः[Sensory Memory] इत्यपि नामान्तरं वर्तते । विषयवस्तुनः अधिगमसमनन्तरं जायमाना भवति इयम् ।

2) **अस्थायीस्मृतिः / अल्पकालिकस्मृतिः [Temporary or Short-Term Memory]**

William James महोदयः अस्याः स्मृतेः प्रतिपादकः । सर्वेषाम् अंशानां दीर्घकालपर्यन्तं स्मरणावश्यकता नास्ति ।

उदा – रैल्याने गमनवेलायामस्माकं स्थानसङ्ख्या [Seat Number] प्रयाणपर्यन्तमेव स्मर्तव्या भवति, तदनन्तरं तस्याः आवश्यकता नैव भवति ।


ISSN: 2249-538X

**3) स्थायीस्मृतिः [Permanent Memory]**

अस्याः एव दीर्घकालिकस्मृतिः[Long Term Memory] इति उच्यते । अत्र ज्ञातविषयस्य धारणं बहुकालपर्यन्तं भवति ।

4) **आवर्तनस्मृतिः[Rote Memory]**

कस्यापि विषयवस्तुनः अर्थज्ञानं विना आवश्यकतानुगुणं पुनः स्मर्तुं प्रयासोऽत्र भवति । अस्याः एव यान्त्रिकीस्मृतिः [Mechanical Memory] इति नामान्तरम्।

5) **तार्किकीस्मृतिः[Logical Memory]**

अत्र विषयवस्तुनः समीचीनरीत्या अवगमनद्वारा अधिगमं प्राप्य धारणंकृत्वा पुनः स्मरणार्थमावश्यकीं स्मृतिं तार्किकस्मृतिः इति वदन्ति । अस्याः बौद्धिकीस्मृतिः[Intellectual Memory] इति नामान्तरम् ।

6) **निष्क्रियास्मृतिः[Passive Memory]**

पूर्वसञ्चितानुभवानाम् अत्यधिकप्रयासेन क्रियाद्वारा वा पुनःस्मरणं निष्क्रियात्मकस्मृतिः भवति ।

7) **सक्रियास्मृतिः[Active Memory]**

पूर्वानुभवानां प्रयासं विना पुनःस्मरणमेव सक्रियात्मकस्मृतिः ।

- **स्मृतेः विशेषताः -**

मनोवैज्ञानिकैः उत्तमस्मृतिसम्बद्धविशेषतानां विषये महान् विचारः कृतः । तेषां कथनानुसारम् उत्तमस्मृतेः एताः विशेषताः भवन्ति ।

1) **शीघ्राधिगमः [Quick Learning] -** उत्तमस्मृतेः प्रथमं लक्षणं भवति शीघ्राधिगमः । यः कोऽपि जनः यावत्शीघ्रेन अधिगमं प्राप्नोति तावदुत्तमस्मृतिं प्राप्नोति ।

**2) उत्तमधारणम् [Good Retention] -** उत्तमस्मृतेः द्वितीयं लक्षणं भवति अधिकसमयपर्यन्तं धारणम् । उत्तमधारणेन बालकाः स्थायीरूपेण स्मृतिं प्राप्तुं शक्नुवन्ति ।



ISSN: 2249-538X

3) **शीघ्रपुनःस्मरणम् [Quick Recall] –** उत्तमस्मृतेः तृतीयं लक्षणं भवति शीघ्रतयापुनःस्मरणम् । यस्य जनस्य अधीतविषयस्य शीघ्रतया पुनःस्मरणं भवति तस्य स्मृतिरपि उत्तमरूपेण भवति ।

4) **शीघ्रयथार्थप्रत्यभिज्ञानम् [Quick and Accurate recognition] –** शीघ्रतया यथार्थतया च प्रत्यभिज्ञानम् उत्तमस्मृतेः एका विशेषता भवति ।

- **उत्तमस्मरणार्थं केचनविधयः –**

1) **पूर्णः खण्डश्चविधिः [Whole Vs Part Method] –** उत्तमस्मरणार्थं पूर्णविधिः खण्डविधिश्च उत्तमौ भवतः । ज्येष्ठानां नूतनविषये अधिगमं प्राप्तुं पूर्णविधिः उत्तमो भवति । एवमेव, सरलविषयाधिगमाय च पूर्णविधिरुत्तमो भवति । अत्र प्रारम्भात् अन्तपर्यन्तं सर्वस्यापि पाठवस्तुनः पठनं कृत्वा अधिगमः प्राप्तव्यः । बालकानां विषये तु नूतनाधिगमार्थं खण्डविधिरुत्तमो भवति । खण्डविधौ पाठ्यांशस्य खण्डशः विभज्य अध्ययनं क्रियते तेन बालकाः शीघ्रतया नूतनविषयस्याधिगमं प्राप्तुं शक्नुवन्ति । वस्तुतः उभयोर्विध्योः मध्ये काश्चन न्यूनताः वर्तन्ते इत्यतः अधिगमसमये व्यक्तेः आवश्यकतानुसारं खण्डविधेः अथवा पूर्णविधेश्च उपयोगः कर्तव्यः ।

2) **सान्तरनिरन्तरविधिः** [**Spaced Vs Non-spaced Method] –** स्थायीस्मृत्यर्थं सान्तरविधिः अधिकतया उपयुक्तो भवति । तात्कालिकस्मृत्यर्थं तु निरन्तरविधिः उपयुक्तो भवति । सान्तरविधौ विषयवस्तुनः अधिगमः अनेकान्तरेषु पुनः पुनःस्मृत्यर्थं प्रयासः क्रियते । निरन्तरविधौ तु एकस्मिन्नेव समये विषयवस्तुनः अधिगमाय यत्नः भवति ।

3) **स्क्रियनिष्क्रियश्चविधिः [**Active Vs Passive Method] **–** प्राथमिकस्तरबालकानां सक्रियविधिः अत्यन्तोपयोगी भवति । परन्तु


ISSN: 2249-538X

उच्चस्तरीयछात्राणां निष्क्रियविधिः अत्यन्ताधिकोपयोगी भवति । सक्रियविधौ विषयवस्तुनः पुनः पुनःलेखनार्थं कथनार्थञ्च अवसरः भवति । निष्क्रियविधौ तु पठित्वालिखित्वादृष्ट्वा वा विषयवस्तुनः ज्ञानं प्राप्नोति बालकः ।

4) **अवबोधन-रटनविधिः [**Understanding Vs Cramming Method] – अवबोधनविधौ विषयवस्तुनः अवबोधं प्राप्य उत्तमस्मृतिं प्राप्नोति बालकः । परन्तु रटनविधौ विषयवस्तुनः पुनः पुनः पठनेन केवल रटनमात्रेण स्मृतिं प्राप्नोतो बालकः । अवबोधनविधिः मनोवैज्ञानिकः भवति, परन्तु प्राथमिकस्तरे, उच्चस्तरे केषाञ्चन नियमानाम् अधिगमार्थम् अयं विधिः उत्तमो भवति ।

स्मृत्यासाकं विस्मृतिरपि आवश्यकी भवति । भूतकालानुभवानां चेतन जगति आनयने विफलता एव विस्मृतिर्भवति । सामान्यतः विस्मृतिः नकारात्मकपक्षरूपेण चिन्तयन्ति । परन्तु तदा तदा विस्मृतिरपि एकं वरं भवति। मन् महोदयस्य कथनानुसारं –

**"अधिगतविषयस्य चिरधारणे पुनः स्मरणे च असफलता एव विस्मृतिः** इति ।

**Forgetting is failing to retain for to be able to recall what has been acquired".**

प्रायः विस्मृतेः कारणानि एवं भवन्ति **–**

**1)** उपयोगाभावः **5)**

अपसामान्यविस्मृतिः

**2)** उत्तमसंस्काराभावः **6)**

मादकद्रव्याणामुपयोगः

**3)** अधिकाधिगमः **7)**

कोपभीत्यादिविकाराः



ISSN: 2249-538X

**4)** विश्रान्तेरभावः **8)**

उत्तमस्वास्थ्याभावः

- **स्मृतेः प्रभावोत्पादक केचन उपायाः –**

**1)** स्मरणे इच्छा उत्तमसङ्कल्पश्च

**Will and determination to remember**

**2)** रुचिः अवधानञ्च

**Interest and Attention**

**3)** पुनरावर्तनम् अभ्यासश्च

**Repetition and Practice**

**4)** विषयस्य परिवर्तनम् उचितविश्रान्तिः

**Provision for change and proper rest**

**5)** साहचर्यसिद्धान्तानुसरणम्

**To follow the principle of association**

आयुर्वेदे "वचा"ख्यस्य द्रव्यस्य दानं शिशोः मेधावृद्धिकरं मन्यन्ते ।तदुक्तम् –

**"अद्भिर्वापयसाज्येन मासमेकं तु सेविता ।**

**वचाकुर्यानरंप्राज्ञं श्रुतधारण संयुतम् "॥**

एवं स्मृतेः वर्धनाय उपर्युक्तोपायानुसरणेन अध्ययने विस्मृतिं निवार्य उत्तमस्थितिं प्राप्तुं शक्यते ।

**उपर्युक्तग्रन्थाः**

1) **उच्चतरशिक्षामनोविज्ञान** – Susheel Gupta and Alak Gupta

2) **शिक्षामनोविज्ञान** – Dr. A.B. Bhatnagar and others

3) **शिक्षामनोविज्ञानम्** – Venkataraghavaacharyah



ISSN: 2249-538X

4) The Indian Cognition – G. N. Sinha

5) विद्यामनोविज्ञानशास्त्रभूमिकलु – G. Aruna Mohan

6) वैशेषिकसूत्रम् – कणादः

7) न्यायसूत्रम् – गौतमः

8) चरकसंहिता – चरकः

9) सांख्यकारिकाः

10) योगसूत्राणि

11) भामतिः

**********



ISSN: 2249-538X

# क्रियात्मकानुसन्धानम्

## Action Research

डा. हरिप्रसादः के.

### उपोद्घातः

मनुष्यः अनादिकालादारभ्य उत्तमजीवनं यापयितुं उपायानाम् अन्वेषणे रतः अस्ति एव । इत्युक्ते जीवनम् सुखयमयं कर्तुं सः निरन्तरं प्रायोगिकरूपेण (Experimentation) अध्ययनं कुर्वन्नेव अस्ति । तत्र साफल्यस्य यशसः च प्राप्तेः प्रमुखसाधनत्त्वेन अनुसन्धानं वर्तते इति सिद्धं वर्तते। अनुसन्धानं यशःप्राप्तेः समीपतमः मार्गोऽपि वर्तते ।

शिक्षेतरक्षेत्रेषु एतादृशानुसन्धानं यद्यपि अविरतं जायमानमेव वर्तते, शिक्षाक्षेत्रे तावत्, आधुनिकशैक्षिकलक्ष्यानां पूर्त्यर्थं एतादृशानुसन्धानं करणीयमापद्यत, साम्प्रतिके युगे तदनुसारं क्रियमाणं च वर्तते । तत्र शिक्षकाणाम् अस्माकं पात्रं बहु प्रमुखं (भूमिका) भवति ।

एतादृशम् अनुसन्धानं यथा चिन्त्यते तथा सुकरं तु नास्ति । तदर्थं वैज्ञानिकक्रमः आश्रयणीयः । विकसितसाधनानां तीक्ष्णचिन्तनानां अविरतप्रयासस्य च आवश्यकता वर्तते । किन्तु एतादृशरीत्या अनुसन्धानं कस्याश्चित् सार्वभौमिकसमस्यायाः निवारणार्थं वा, व्यापकविकासोद्देश्यत्वेन वा क्रियते ।

शिक्षकैरस्माभिः दैनन्दिनशैक्षिकक्रियाकलापेषु बहुविधाः समस्याः सम्मुखीक्रियन्ते । एतासां समस्यानां समाधानाय कापि वैज्ञानिकी व्यवस्था अपेक्ष्यते । सा वैज्ञानिकी व्यवस्था एव क्रियात्मकानुसन्धानम् इति उच्यते ।

### शैक्षिकानुसन्धानम्

शिक्षासिद्धान्तमाश्रित्य (सिद्धान्तानां प्रभावः / उपयोगः / ...)


ISSN: 2249-538X

शिक्षणपद्धतिमाश्रित्य (आविष्कारः / उपयोगः / विषय-स्तर-परिस्थित्यादिभेदेन प्रभावः)

छात्राधिगममाश्रित्य (नैदानिकम् / उपचारात्मकम् / विकासात्मकम्)

शिक्षणसामग्रीः आश्रित्य (निर्माणम् / विकासः / प्रभावः)

छात्राभिरुचिमाश्रित्य

छात्रमूल्याङ्कनमाश्रित्य

सर्वेक्षणात्मकम्, तुलनात्मकम्, प्रायोगिकम् (Experimentation), नैदानिकम्, उपचारात्मकम्, ऐतिहासिकम् वा अध्ययनम्

**क्रियात्मकानुसन्धानम् नाम किम् ?**

शिक्षकैः शैक्षिकप्रशासकैश्च सम्मुखीक्रियमाणानां तत्क्षणस्य समस्यानां समाधानार्थम् अनुस्त्रियमाणः अनुसन्धानस्य कश्चन प्रकारः एव क्रियात्मकानुसन्धानम् इति उच्यते ।

**क्रियात्मकानुसन्धानस्य विशेषताः ACTION RESEARCH- Characteristics**

प्राप्यमाणस्त्रोतसाम् आधारेण / माध्यमेन / साहाय्येन तत्क्षणस्य समस्यानां तत्समाधानानां च उपरि क्रियात्मकानुसन्धानं बलं ददाति ।

Action research is focused on the immediate problems and their solutions within the available resources.

क्रियात्मकानुसन्धानं सिद्धान्तनिर्माणेन वा सामान्यीकरणेन वा तत्त्वसम्पादने वा सम्बद्धं नास्ति ।

It is not concerned with the building of theories, broad generalizations and principles.

ये एतदनुसन्धानं कुर्वन्ति तेषां अभ्यासप्रक्रियायाः कार्यपरिस्थितेः वा विकासं उद्दिश्य क्रियात्मकानुसन्धानं प्रवर्तते ।

It aims to improve the practices or work conditions of the people who conduct such researches.



ISSN: 2249-538X

मौलिकानुसन्धानेन शुद्धानुसन्धानेन वा सह तुलनां कुर्मः चेत् क्रियात्मकानुसन्धाने श्रमः अपि नास्ति, महाव्ययः अपि नास्ति, साधनानि अपि अधिकानि न आवश्यकानि । **(**It involves little efforts, resources and finances in comparison to fundamental or pure researches.**)**

अत्र अनुसन्धाता, परिणामानां कार्यान्वयनकर्ता च समानः/एक एव भवति । **(**The person who conducts the research and applies its findings is the one and the same.**)**

एतत् अनुसन्धातृषु तदीयकर्मणां वृद्ध्यर्थं चैतन्यं सामर्थ्यं च वर्धयति । It inculcates a spirit and an ability in the practitioners to improve their practices.

एतस्य प्रधानोद्देश्यं तावत् इदमस्ति यत् छात्रस्य उत्कर्षार्थं शिक्षणाधिगमानुकूलपरिस्थितेः वातावरणस्य च निर्माणम् । **(**Its main purpose is to create such healthy and proper conditions and environment as to facilitate better teaching as well as learning for the maximum welfare of the students.**)**

**लक्ष्यानि उद्देश्यानि च (**GOALS OR OBJECTIVES**)**

विद्यालयीयक्रियाकलापानां विकासः **(**To improve the practices going on in the schools.**)**

शैक्षिकानुसन्धानं केवलं विशेषज्ञानामेव इति भ्रमस्य निवारणम् **(**To remove the notion that educational research is the job of specialists only.**)**

शिक्षकाणां शैक्षिकप्रशासकानां च अनुसन्धित्सुत्वेन निर्माणम् **(**To make teachers and the educational administrators research minded.**)**

स्वीयसमस्यानां समाधानप्राप्त्यर्थम् अनुसन्धातृषु आत्मविश्वासस्य अनुसन्धानकार्य-निर्वहण-क्षमतायाश्च वर्धनम् **(**To develop in the



ISSN: 2249-538X

practitioners the required confidence and ability to carryout research for solving their own problems.)

छात्रान्, अध्यापकान् शैक्षिकप्रशासकांश्च तदीयसमस्यानां तत्क्षणस्य तत्परिहाराणां च विषये जागरूकान् करोति क्रियात्मकानुसन्धानम् (To make the students, teachers and the educational administrators more conscious about their problems and immediate solutions.)

विद्यालयानां शैक्षिकसंस्थानां वा तदीयकर्मणि इतोऽप्यधिकलोकतान्त्रिकरूपेण अधिकसहायकत्वेन च परिणमनम् । (To make the schools or educational personal more cooperative and democratic in their work.)

प्रभावपूर्णशिक्षणाधिगमयोः निमित्तं विद्यालयीयवातावरणस्य अधिकपलदायकत्वेन निर्माणम् । (To make the environment of the school more conducive for effective teaching and learning.)

**प्रक्रिया** (Procedure)

1. समस्यानाम् अभिज्ञानम् (Identification of the problem)
2. समस्यायाः सम्भाव्यकारणानां सारिणीनिर्माणम् (Listing the probable cause of the problem.)
3. सम्भाव्यकारणानां विश्लेषणम्, क्रियात्मकप्राक्कल्पनायाः निर्माणम् च (Analyzing the probable causes and formulation of action hypothesis.)
4. कार्ययोजना (Action programme.)
5. कार्ययोजनायाः मूल्याङ्कनम् (Evaluation of the action programme.)
6. आविष्कृततत्त्वस्य अनुसरणम् अन्यत्र अनुप्रयोगश्च (Fallow-up and communicating the findings to others.)

**समस्यानाम् अभिज्ञानम् (Identification of the problem)**


ISSN: 2249-538X

शिक्षणाभ्यासवेलायां छात्राध्यापकाः विशिष्टोपकरणानाम् उपयोगं कुर्वन्ति । तेषाम् उपयोगस्य क्रमः, औचित्यं, समयः इत्यादिविषयेषु छात्राध्यापकानां नैपुणी अत्यल्पा इति तेषां पाठनावलोकनेन भासते । अतः साम्प्रतिकस्य क्रियात्मकानुसन्धानस्य समस्या इत्थं निर्वक्तुं शक्या –

- "छात्राध्यापकानां विशिष्टोपकरणप्रयोगज्ञानाभावः" इति ।
- समस्यायाः सम्भाव्यकारणानां सरिणीनिर्माणम्
- शिक्षकप्रशिक्षकाः विशिष्टोपकरणानां उपयोगपद्धतिं न पाठितवन्तः ।
- प्रदर्शनपाठेषु (Demonstration/Model Lesson) शिक्षकप्रशिक्षकाः विशिष्टोपकरणानि न प्रायुञ्जत ।
- नगरे समुचितानि सिद्धोपकरणानि नोपलभ्यन्ते ।
- सूक्ष्मशिक्षणे विशिष्टोपकरणप्रयोगकौशलस्य अभ्यासः न कारितः ।
- छात्राध्यापकाः प्रदर्शनपाठं श्रद्धया नावालोकयन् ।
- छात्राध्यापकाः सैद्धान्तिकभागस्य प्रयोगपद्धतिविषयकम् अध्ययनं नाकार्षुः ।
- छात्राध्यापकाः शिक्षणाभ्यासवेलायां पाठयोजनालेखनाय यावदवधानं प्रयच्छन्ति न तावदवधानं तत्प्रस्तुत्यर्थं प्रायच्छन् ।
- सम्भाव्यकारणानां विश्लेषणम्, क्रियात्मकप्राक्कल्पनायाः निर्माणम् च

**क्रियात्मकप्राक्कल्पना**

शिक्षकप्रशिक्षकाः विशिष्टोपकरणानां निर्माणप्रयोगयोः विषये सैद्धान्तिकभागं सम्यगध्याप्य प्रदर्शनपाठमाध्यमेन प्रयोगप्रकारं प्रदर्श्य विशिष्टोपकरणानां प्रयोगपुरस्सरं शिक्षणाभ्यासं कारयन्ति चेत् छात्राध्यापकेषु विशिष्टोपकरणानां प्रयोगज्ञानं सुदृढं भवेत् ।

**कार्ययोजना (Action Programme.)**


ISSN: 2249-538X

क्रियात्मकानुसन्धाने कार्ययोजना एकं महत्वपूर्णम् अङ्गं अस्ति । क्रियात्मक-प्राक्कल्पनायाः परीक्षणार्थम् अथवा क्रियात्मकप्राक्कल्पनां साधयितुम् अत्र प्रयासो विधीयते ।

**कार्ययोजनायाः मूल्याङ्कनम् (Evaluation of the action programme.)**

शिक्षकप्रशिक्षकः / क्रियात्मकानुसन्धानकर्ता कार्ययोजनायाः निर्वहणं कुर्यात् ।

तदर्थं इतरेषाम् अध्यापकानां अभ्यासविद्यालयस्य शिक्षकाणां च साहाय्यं स्वीकुर्यात् ।

कार्ययोजनायाः प्रत्येकं क्रियाकलापस्य शब्दशः लिखितप्रतिवेदनं सज्जीकरणीयम् ।

अभ्यासविद्यालये छात्राध्यापकैः विशिष्टोपकरणानि कथं प्रयुज्यन्ते इत्यस्य मात्रात्मकं मूल्याङ्कनम् आहत्य कार्ययोजनायाः वास्तविकमूल्याङ्कनं भवति ।

**आविष्कृततत्त्वस्य अनुसरणम् अन्यत्र अनुप्रयोगश्च (Fallow-up and communicating the findings to others.)**

अभ्यासविद्यालये छात्राध्यापकैः विशिष्टोपकरणानि कथं प्रयुज्यन्ते इत्यस्य मात्रात्मकं मूल्याङ्कनं यत् कृतं तदाश्रित्य छात्राध्यापकानां आसादितकौशलस्य अन्यत्र अनुप्रयोगः करणीयः ।

अवसरेऽस्मिन् चितानां कतिपयच्छात्राध्यापकानाम् एव प्रयोगकौशलस्य प्रदर्शनपाठः अभ्यासविद्यालये एव अवशिष्टानां छात्राध्यापकानां पुरतः आयोजनीयः ।

**अनुशीलिताः ग्रन्थाः**


1. Essentials of Educational technology S.K. Mangal
2. Research in education, John W. Best
3. Education Technology, R.A. Sharma


**********


ISSN: 2249-538X

# स्वप्ने सर्वं प्रतिष्ठितम्

डा. गणेश ति. पण्डितः

वराभये पद्मयुगं दधानां करैश्चतुर्भिः कनकासनस्थाम् ।
सिताम्बरां शारदचन्द्रकान्तिं स्वप्नेश्वरीं नौमि विभूषणाढ्याम्॥

मानसिकक्रियाणां विश्लेषणबलेन चैतन्योपचैतन्याचैतन्यञ्चेति मनसः स्तरत्रयं कल्पयन्ति मनोविश्लेषणवादिनः । चैतन्यस्तरगतव्यापाराः सामान्यतः लोकव्यवहारेषु दृग्गोचराः भवन्तीत्यतः चैतन्यस्य अथवा जाग्रदवस्थायाः व्यापारविशेषेषु नाधिका रूचिर्मनोविश्लेषणवादिनाम् । शास्त्रान्तरे स्मृतिपदवाच्यम् उपचैतन्यमपि स्मृतिपथे विद्यमानान् विचारान् उत भावान् प्रसङ्गानुसारं चैतन्यं प्रति सम्प्रेषयति इत्यत उपचैतन्यगतव्यापारेष्वपि एतेषां नास्ति श्रद्धा ।

तत्र हि मनोविश्लेषणवादिभिः चैतन्यमिति यदुच्यते तदेव शास्त्रकारैः जाग्रदवस्था इति कीर्त्यते । उपचैतन्यं पुनः स्मृतिरिति सम्बोध्यते । सुषुप्तिस्तु गाढनिद्रायाः द्योतिका चास्ति । किञ्च स्वप्नावस्था इति दार्शनिकैः यन्निर्दिश्यते तदेव मनोविश्लेषणवादिभिः अचैतन्यमनसः सत्तायां विद्यमानं प्रबलं प्रमाणमिति निश्चीयते । किञ्च अवस्थात्रये स्वप्नावस्थां केचन शास्त्रज्ञाः भ्रान्तिमूलां मन्वते, तामेव परमार्थमूलां मन्वते मनोविश्लेषणवादिनः । स्वप्नस्य निजगृहम् अचैतन्यमित्यतः, मनः तस्य च स्तराः आदौ मया व्याख्याताः । स्वप्नसम्मोहननिद्रासञ्चारमनोविकृत्यादयः अचैतन्यस्य अस्तित्वे प्रमाणानि वर्तन्ते । प्रत्येकमपि व्यक्तिविशेषस्य समतीतं वर्तमानं भविष्यञ्च विज्ञातुं स्वप्नमन्तरा नान्यो उपायो विद्यत इत्यत एव मनोविश्लेषणवादिभिः सधैर्यं जोघुष्यते “स्वप्ने सर्वं प्रतिष्ठितम्” इति ।

सुखदुःखलज्जापमानातृप्तानैतिकविचाराणां बृहद्भाण्डागारोपमात् अचैतन्यात् उद्गतः स्वप्नरूपापन्नः मानवमनोरथः कालान्तरे मानवव्यक्तित्त्वं


ISSN: 2249-538X

सुस्थिरीकरोति तदभावे च मानवः मनोरोगग्रस्तः सन् विनश्यति इति मनोविश्लेषणवादिनां राद्धान्तः । अत एवोक्तम् अभियुक्तैः – '**अर्धरोगहरी निद्रा, पूर्णरोगहरो स्वप्नः**' इति ।

स्वप्नस्य लक्षणं यथा योगवासिष्ठे –

**अनाक्रान्तोन्द्रियच्छिद्रो यतः क्षुब्धोऽन्तरेव सः ।**

**संविदानुभवत्याशु स स्वप्न इति कथ्यते ॥** इति ।

निद्रावस्थायाम् इन्द्रियाणि विषयोपभोगैः निवृत्तानि जायन्ते परन्तु मनः आहोस्वित् अचैतन्यं सक्रियमेव भवतीत्यतः मानवः नानारूपं स्वप्नं पश्यति इति अष्टाङ्गहृदये प्रोक्तम् । यथा –

**सर्वेन्द्रियव्युपरतौ मनोऽनुपरतं यदा ।**

**विषयेभ्यस्तदा स्वप्नं नानारूपं प्रपश्यति ॥** इति ।

एतत् शङ्कराचार्यैरपि उक्तमेव । यथा –

**इन्द्रियाणामुपरमे मनोऽनुपरतं यदि ।**

**सेवते विषयानेव तद्विद्यात्स्वप्नदर्शनम् ॥** इति ।

स्वप्नः सुखाय कल्पेते आहोस्वित् दुःखाय? स्वप्नः सुन्दरः ?आहोस्वित् भयङ्करः इति पूर्वपक्षिणः पुङ्खानुपुङ्खरूपेण सन्देहान् प्रकटीकुर्युः । तत्र समाधत्ते चरकः –

**नातिप्रसुप्तः पुरुषः सफलानफलानपि ।**

**इन्द्रियेशेन मनसा पश्यति स्वप्नानेकधा ॥** इति ।

अनेन श्लोकेन अतिप्रसुप्तः तन्नाम सुषुप्तौ विद्यमानः मानवः स्वप्नान् न पश्यति इति ज्ञायते । एवं सति शिष्टयोः अवस्थयोः का कथा ? इति पृष्टे सति अत्र सिद्धोत्तरमस्त्येव । तद्यथा –

**जाग्रत्स्वप्नदशाभेदो न स्थिरतास्थिरते विना ॥** इति । (योगवासिष्ठे)



ISSN: 2249-538X

निशावसनसमये दृष्टाः स्वप्नाः नूनमेव सफलाः भवन्तीति भट्टबाणेनापि प्रोक्तम् । “अवितथफलाश्च प्रायो निशावसानसमयदृष्टाः भवन्ति स्वप्नाः” इति । अद्यत्वे केचन बालाः प्रातः विलम्बेन उत्तिष्ठन्ति, तत्र कारणं सुस्वप्नफलाकाङ्क्षा स्यादित्यहं शङ्के । स्वप्नविश्लेषणसन्दर्भे महानिशा, त्रियामा, भूतधात्री इत्यादयः रात्रेः पर्यायवाचिनः शब्दाः उदाह्रियन्ते । परन्तु एते सर्वे विशिष्टार्थद्योतकाः अनुसन्धेयाश्च सन्तीति अहमत्र निवेदयितुम् अभिलषामि ।

भट्टनारायणस्तु शुभाशुभसूचकान् स्वप्नान् सोदाहरणं निर्दिशति । यथा–

**पर्यायेण हि दृश्यन्ते स्वप्नाः कामं शुभाशुभाः ।**
**शतसंख्या पुनरियं सानुजं स्पृशतीव माम् ॥** इति ।

अत्र पूर्वपक्षिणा उच्यते -

**व्याधितेन सशोकेन चिन्ताग्रस्तेन जन्तुना ।**
**कामर्तेनाथ प्रमत्तेन दृष्टः स्वप्नो निरर्थकः ॥** इति ।

निरर्थकाः स्वप्नाः न भवन्त्येव अपि तु सर्वे स्वप्नाः सार्थकाः, स्वप्नविश्लेषणसामर्थ्याभावात् निरर्थका इव आभान्ति इति मनोविश्लेषणवादिभिः समर्थ्यते । शोकग्रस्तो वा भवतु व्याधिग्रस्तो वा, शोकस्य व्याधेश्च मूलं किमित्यत्रैव मनोविश्लेषणवादिनां दृष्टिः न तु फलाफलेषु इति सर्वैः ज्ञातव्यमत्र । प्रत्येकमपि स्वप्नस्य वस्तुनिष्ठविश्लेषणाभावे सर्वमपि व्यर्थं भ्रममात्रमिव भासते ।

स्वप्नः चोरोपमः । अतः सुशीलेन दृष्टः अश्लीलोऽपि स्वप्नः सुखाय कल्पते न तु दुःखाय इति मनोविश्लेषणवादिभिः गद्यते । व्यासवचनमेवात्र प्रमाणम् । तद्यथा –

**शस्त्रास्त्रेण यथा विद्धो वृणेन कृमिणा तथा ।**
**विष्ठया रुधिरेणैव सयुक्तोप्यर्थवान् भवेत् ॥** किञ्च
**पक्षिणां मानुषाणां च भुङ्क्ते मांसं नरो यदि ।**
**बह्वर्थं शुभवार्तां च लभते वाञ्छितं फलम् ॥** इत्यपि ।


ISSN: 2249-538X

एवमेव यदि कश्चित् स्वप्ने अन्यम् उद्दिश्य "**त्वं मे दासो भव**" इति कथयति तर्हि सः विष्णोः दासः सन् वैष्णावोत्तमः भविष्यति इति व्यासमहर्षिणेवोक्तम् । तद्यथा –

**स्वप्ने वदति यं विप्रो मम दासो भवेति च ।**

**हरिदास्यं च मद्भक्तिं स लब्ध्वा वैष्णवो भवेत् ॥** इति ।

"स्वप्नः सप्तविधो स्मृतः" इति केचन शास्त्रज्ञाः सोदाहरणं स्वप्नं व्याख्यान्ति । कः स्वप्नं पश्यति ? कीदृशं स्वप्नं पश्यति ? इत्यादीनाम् उत्तरं प्रश्नोपनिषदि लभ्यते ।

तद्यथा – "अत्रैव देवः पश्यति, स्वप्ने महिमानमनुभवति । यद् दृष्टं दृष्टमनुपश्यति, श्रुतं श्रुतमेवार्थमनुश्रृणोति देशदिगन्तरैश्च प्रत्यनुरूपं पुनः पुनः प्रत्यनुभवति, दृष्टं चादृष्टं च श्रुतं चाश्रुतं च अनुभूतं चाननुभूतं च, सचासच्च सर्वं पश्यति सर्वः पश्यति" इत्यलं विस्तरेण ।

**परिशीलितग्रन्थसूची –**

१. वसिष्ठसंहिता – चौखाम्बा संस्कृत संस्थान – काशी संस्कृत ग्रन्थमाला, वाराणसी ।

२. मन्त्रमहार्णवः – खेमराज श्रीकृष्णदास प्रकाशन मुम्बई – ४

३. साहित्यकसुभाषितवैद्यकम् – चौखम्बा संस्कृतसंस्थान, वाराणसी ।

महाभारतसूक्ति सुधा – सुभाष विद्यालंकार प्रतिभाप्रकाशन दिल्ली ।

**********



ISSN: 2249-538X

# पाठयोजना

डा.वेङ्कटरमणभट्टः

अध्याप्यमानविषयस्य सज्जीकरणमेव पाठयोजना इति सामान्यार्थः । निश्चितं विषयं निश्चितसमये निश्चितकक्षायां बोधयितुं पाठयोजनानिर्माणं क्रियते। इयं हि बोधनीयविषयसंबन्धिनी योजना इति सङ्कीर्त्यते । अध्यापकानां छात्रणां च कक्षासम्बद्धकार्यकलापसमवायस्य चित्रणं भवति ।

कार्टर् वि गुड् महोदय एवं निगदति यत् – A lesson plan as a teaching outline of the important point of a lesson organized in order in which they are to be presented may included objectives point to be asked reference to materials assignment etc..

पाठयोजनायामस्यां सामान्योद्देश्यानि, विशिष्टोद्देष्यानि, बोधनांशाः, प्रश्नाः, आधारग्रन्थाः, मूल्याङ्कनं छात्राणां व्यवहारादयश्च अन्तर्भवन्ति । Lesson plan is a teaching method and emotional visualization of classroom activities. शिक्षकस्य कक्षायां मानसिक: भावनात्मकश्च मनोवैज्ञानिक: कल्पनाविशेष: भवति |

Lesson plan is a plan of action for a classroom activity. पाठयोजना अधिगमानुकूलं वातावरणं निर्माति । गृहनिर्माणार्थम् आदौ योजना क्रियते । योजनामनु गृहं निर्मीयते । यदि योजनामन्तरा गृहं निर्मातुं कश्चित् प्रयतते चेत् तेन निर्मितं गृहं सुदृढं न तिष्ठति । तद्वत्पाठयोजनामन्तरा पाठनं न शोभते । लक्ष्यप्राप्तिः न जायते इति भावः । पाठयोजनानिर्माणात् प्राक् सम्यक् पाठः अध्येतव्य: । पाठान्तर्गतोपविषयाः सर्वेऽपि अवगन्तव्याः । ततः परमेव पठयोजनां लेखितुं प्रयत्नो विधेयः । उद्देश्यानां साफल्याय आधारसहिताध्यापनाय च पाठयोजना अपेक्षते । पाठ्यांशं यथाक्रमं पाठयितुं पाठयोजनेयं सहकरोति । किं बोधनीयम् ? कियत् बोधनीयम् ? कथं


ISSN: 2249-538X

बोधनीयम्? केन अनुक्रमणेन विषयाः उपस्थापनीयाः ? कस्य अंशस्य कृते कियन्महत्वं देयम् ? कीदृशाः प्रश्नाः प्रष्टव्याः ? कीदृक् अध्ययनानुभवः प्रदातव्यः ? अध्ययनस्पष्टता कीदृशी स्यात् ? कथं छात्राः पाठोन्मुखिनः कर्तव्याः ? अध्ययनवेलायां सन्धिग्धताः काः ? तासां निवारणोपायाः के ? अध्ययनतीक्ष्णता कथम् उत्पादनीया ? छात्रेभ्यः विषयकौशलानि भाषाकौशलनि च कथं बोधनीयानी ? इत्येतेषां प्रश्नानाम् उत्तरं ददाति पाठयोजना । छात्रान् अनुस्यूततया एकाग्रबुध्या पाठश्रवणाय प्रेरयति ।

मनोविज्ञानिभिः मानवमस्तिषकस्य त्रेधा विभाग: कृत: ज्ञानविभाग:, कौशलविभाग:, सौन्दर्यविभागश्चेति । अनया दृष्ट्या बोधनीयविषयाणामपि त्रेधा विभागः सिध्यति ज्ञानपाठाः, कौशलपाठा: सौन्दर्यपाठाश्चेति । भाषाविषये तावत् त्रयाणामेतेषां समवाय एव दृश्यते । तथापि सामान्यव्यपदेश इति न्यायेन विषयोऽयं संगच्छते ।

अध्यापकस्य चिन्तनस्य कृते पाठयोजना अवसरं प्रकल्पयति । पाठयोजनां निर्माय तस्याः अवलोकनम् अध्यापकेन असकृत् कर्तव्यमस्ति । न्यूनातिन्यूनं सप्ततिप्रतिशतं पाठयोजनामनु कक्षायां बोधनीयम् । सोपानक्रमं पाठयोजना निर्माणेन अध्यापनमपि तदाधारेणैव जायते । कौशलानाम् अभ्यासः सुष्ठु जायते । विविधानां विधीनाम् उपयोगपुरस्सरं पाठनेन पाठितविषयाः सुदृढाः जायन्ते । इत्थं पाठयोजनायां स्वरूपं वैशिष्ट्यं च शिक्षाविद्भिः निरूपितं वर्तते ।

अधुनातनकाले शिक्षकप्रशिक्षणमहाविद्यालयेषु सर्वत्र हर्बर्टमहोदयस्य पञ्च सोपानान्यनुसृत्यैव पाठयोजनानिर्माणं क्रियते । एष: महोदय: महान् दार्शनिक: मनोविज्ञानी च आसीत् । शिक्षणस्यार्थं बोधनापद्धतिञ्च मनोवैज्ञानिकाधारेण न्यरूपयत् । इत्थं बोधनविधौ विशिष्टम् अयनं प्रादर्शि । अस्य मतानुसारेण बोधनस्य पञ्च स्तरा: वर्तन्ते । शिक्षाक्षेत्रे अनेन सूचितस्य शिक्षणस्तरस्य नाम हर्बर्टपञ्चपदमिति प्रसिद्धम् । अधिगमस्य पूर्वसिद्धता


ISSN: 2249-538X

प्रस्तावनया समारभ्यते । उद्दिष्टस्य शिक्षणस्य सिद्धता परमावश्यकी । मानसिकरूपेण छात्रम् अधिगन्तुं प्रेरयितुं अभिप्रेरणमपेक्षते । स्तरेऽस्मिन् बोधनाविषयमवलम्ब्य छात्राणां पूर्वज्ञानमाधारीकृत्य च प्रस्तावना निर्मातव्या भवति । छात्राणां कौतूहलम् आसक्तिञ्च प्रेरयितुं क्वचित्प्रश्नमाध्यमेन, क्वचित्कथया, क्वचिल्लघुना व्याख्यानेन च प्रस्तावना निर्मीयते । चित्रपटमपि प्रदर्श्य बोधनीयं पाठं प्रति छात्रान् अभिप्रेरयितुं शक्यते । आहत्य छात्रा: पाठं प्रति प्रेरिता: भवन्ति ।

द्वितीयमस्ति उद्देश्यनिरूपणम् । स्तरेऽस्मिन् अध्यापक: बोधयितुमुद्दिष्टस्य पाठस्य शीर्षकं श्यामफलके लिखेत् । श्यामफलके लिखितं शीर्षकं पाठसमाप्तिं यावत् स्यात् । तत्समये एव कस्मिन् पृष्टे पाठोऽयं वर्तत इति अध्यापक: सूचयेत् । सोपानेऽस्मिन् अध्यापक: स्पष्टसूचनया उद्देश्यमुक्त्वा पाठं छात्रेभ्य: परिचाययेत् ।

पाठप्रवर्धनमिति पाठयोजनाया: केन्द्रबिन्दु: भवति । अत्र सर्वेऽपि विचारा: चर्च्यन्ते । अत्र विधय: कौशलानि च प्रयुङ्क्ते अध्यापक: । श्यामफलकस्य कार्यमपि बाहुल्येन इहैव करोति अध्यापक: । श्यामफलके लिखितान् विषयानपि प्रदर्शयति सूचीदण्डमाध्यमेन । छात्रेभ्य: प्रोत्साहनं ददाति मूल्याङ्कनपुरस्सरम् । आहत्य इदं सोपानं पाठयोजनाया: हृदयस्वरूपमिति गदितुम् शक्यते ।

पाठनानन्तरं पाठितं विषयमाधारीकृत्य छात्रेभ्य: प्रशान् पृच्छति । अनेन लक्ष्यद्वयमपि साधितं भवति, एकम् अध्यापकस्य मूल्याङ्कनम् अपरञ्च छात्राणाम् अवगमनम् । छात्रा: कियत् पर्यन्तं पाठम् अवागच्छन् ? अधिगमे दोषा अभूवन् वा ? निरीक्षितोद्देश्यं सफलम् अभूत् किम् ? इत्यादि विषया: निश्चीयन्ते । ज्ञातस्य विषयस्य दृढीकरणाय गृहकार्यं दीयते । अत्र प्रश्ना: यान्त्रिकरूपेण नैव क्रियन्ते । प्रश्नेषु वैविध्यं स्यात् । छात्राणाम् अभिरुचे:


ISSN: 2249-538X

उत्पादनाय, सर्जनात्मकतायाः विकासाय कल्पनाशक्तेः जागरणाय च गृहकार्यप्रश्नाः दीयन्ते ।

## सन्दर्भग्रन्थसूची


1. **शिक्षा मनोविज्ञान -** डा. राम शकल पण्डेय, आर लाल बुक डिपो, निकट **गवर्नमेन्ट इन्टर** कालेज, मेरठ – 250001
2. **शक्षा दर्शन -** डा. भास्करमिश्रः, **नाग** पब्लिशर्स,जवाहर **नगर**, दिल्ली
3. **शिक्षा तकनीकी** – डा. जे. एस. वालिया, अहं पाल पब्लिशर्स, जलन्धर
4. **मातृभाषे कन्नडतत्व मत्तु बोधना मार्ग** – अनुसूया वि परगि, विवेक प्रकाशन चिक्कबळ्ळापुर
5. **संस्कृतशिक्षणम्** – डा. च.ल.ना. शर्म फतेहश्च, आदित्यप्रकाशनम्, जयपुर


**********



ISSN: 2249-538X

# प्राक्कल्पना:

डा.नारायण वैद्य

शोधस्य मुख्यम् उद्देश्यं समस्याया: अथवा प्रश्नस्य उत्तरान्वेषणं विद्यते। एतदर्थं विषयस्य ज्ञानम् अपेक्षते । विषयस्य स्पष्टज्ञानार्जनं गवेषकस्य लक्षणं वर्तते । यदि शोधविषयस्य विभाजनं कृत्वा विषयस्याध्ययनं क्रियते तर्हि शोधकर्मणि साफल्यं लभ्यते । क्रियमाणस्य शोधकार्यस्य निष्कर्श: पूर्वं न भवतीत्यत: शोधस्य फलं किं वा भवतीति ऊह्यते । सा ऊहा प्राक्कल्पना इति व्यवहार: । इयं प्राक्कल्पना आरब्धकर्मण: आद्यं सोपानं भवति ।

स्वीकृतसमस्याया: सम्भावितोत्तरमेव प्राक्कल्पना इति ख्यायते । अनुसन्धातार: समस्याया: समाधानान्वेषणार्थं प्राक्कल्पनां कुर्वन्ति । सामान्यजीवनेऽपि वयं प्रतिदिनं प्राक्कल्पनां विधायैव वास्तविकं समाधानान्वेषणं कुर्म: । यथा – भ्रमद्विद्युद्व्यजनं (Electric Fan) आकस्मिकरूपेण स्थगितं भवति । तदा वयं बहुधा प्राक्कल्पनां कुर्म: । तत्र निम्नाङ्कितरीत्या प्राक्कल्पनां कुर्म:-

1. चञ्चला गता स्यात् ।
2. तन्तु: छिन्न: भवितुं शक्यते ।
3. व्यजनस्य यन्त्रं नष्टं स्यात् ।

एवं प्राक्कल्पनां विधाय तदनु वास्तविकान्वेषणे प्रवर्तामहे । एवम् अनुसन्धानकर्मणि अपि प्राकाल्पना: वास्तविकसमाधानान्वेषणे उपकुर्वन्ति । अत एव **Van Dalen** कथयति प्राक्कल्पना अस्माकं नेत्रसदृशी विद्यते । सा प्राक्कल्पना वैज्ञानिकविधिना समस्याया: समाधानान्वेषणार्थं मार्गं दर्शयति । संक्षेपेण – Hypothesis are suggested problem solutions which are expressed as generalization or proposition इति वक्तुं शक्यते ।

**परिभाषा**

ISSN: 2249-538X

- **John Dewey** - "The Theory of Enquiry'' इत्यस्मिन् ग्रन्थे द्वयो: चरयो: बहूनां चरराशीनां वा मध्ये सम्बन्धस्थापकत्वमेव प्राक्कल्पना इत्यचकथयत् ।
- **D.B. Van Dalen** – "Understanding Educational Research'' इत्यस्मिन् निजनिर्मितग्रन्थे लिखति यत् प्राक्कल्पना अनुसन्धातारं मार्गं दिशति । तत्वान्वेषणे साहाय्यं करोति । अनुसन्धाता प्रथमं स्वमस्तिष्केण किञ्चित्समाधानं विचिन्त्यैव अग्रे प्रवर्तते । एवं प्राक्कल्पना अनुसन्धातृणां बौद्धिकक्षमतां विकासयतीति ।

एवं परिभाषाणाम् अवलोकनेन वक्तुं शक्यते "Hypothesis are calculated guesses'' । इदं सुस्पष्टं भवति यत् प्राक्कल्पना भावीपरिणामस्य पूर्वसूचना अस्ति । या च सैद्धान्तिकविषयं पूर्वानुसन्धानं वा आधारीकृत्य स्यात्।

एवं च प्राक्कल्पनाया: अष्टौ प्रकारा: सन्ति । यथा –

- शोधप्राक्कल्पना
- निर्देशितप्राक्कल्पना
- घोषितप्राक्कल्पना
- संख्याशास्त्रीयप्राक्कल्पना
- क्रियात्मकप्राक्कल्पना
- शून्यप्राक्कल्पना
- उपप्राक्कल्पना
- पर्यायप्राक्कल्पना

शोधप्राक्कल्पना

- शोधकर्मण: फलितांशमाधृत्य निर्मितप्राक्कल्पना शोधप्राक्कल्पना

समस्या –


ISSN: 2249-538X

प्राथमिकविद्यालयीयछात्राणां बुद्धिशक्तिः तथा विद्यालयाधिगमः इत्यनयोः सहसम्बन्धस्याध्ययनम् ।

**प्राक्कल्पना –**

प्राथमिकविद्यालयीयछात्राणां बुद्धिशक्तिः विद्यालयस्याधिगमः इत्यनयोः धनात्मकः सम्बन्धः विद्यते ।

निर्देशितप्राक्कल्पना

- चराणां मध्ये निरीक्षितफलं संलक्ष्य प्राक्कल्पना प्रवर्तते चेत् सा निर्देशितप्राक्कल्पना ।

समस्या –

माध्यमिकस्तरीयछात्राणां वयः तेषां बुद्धिशक्तिः इत्यनयोः धनात्मकसम्बन्धस्य अध्ययनम् ।

प्राक्कल्पना –

- छात्राणां वयः तेषां बुद्धिशक्तिः इत्यनयोः धनात्मकः सम्बन्धः विद्यते ।
- यथा वयः वर्धते तथा बुद्धिशक्तिः वर्धते ।

घोषितप्राक्कल्पना

चराणां सहसम्बन्धस्य घोषणा पूर्वं क्रियते चेत् घोषितप्राक्कल्पना भवति। अत्र अपेक्षितसह-सम्बन्धस्य चराणां च भेदस्य परिकल्पना पूर्वं क्रियते।

समस्या –

शैक्षिकोपलब्धौ पठनबोधस्य प्रभावः ।

प्राक्कल्पना –

ये छात्राः वाचनकर्मणि कुशलाः सन्ति ते वाचनकौशलरहितानाम् अपेक्षया उच्चोपलब्धिमन्तः वर्तन्ते।

संख्याशास्त्रीयप्राक्कल्पना

- चराणां मध्ये सहसम्बन्धः संख्यारूपेण प्रस्तूयते चेत् सा कल्पना संख्याशास्त्रीयप्राक्कल्पना भवति ।

समस्या –


ISSN: 2249-538X

छात्राणां मनोवैज्ञानिकमनोवृत्तिः मनोवैज्ञानिका- धिगमांशयोः सम्बन्धस्याध्ययम् ।

प्राक्कल्पना –

छात्राणां मनोवैज्ञानिकमनोवृत्तिः तेषां मनोवैज्ञानिकाधिगमांशयोः 0.01 स्तरे महत्वपूर्णः धनात्मकः सम्बन्धः विद्यते।

क्रियात्मकप्राक्कल्पना

- क्रियात्मकशोधकर्मणि या प्राक्कल्पना निर्मीयते सा क्रियात्मकप्राक्कल्पना ।

समस्या –

भूगोलविषयस्याधिगमाय भ्रमणविधेः प्रभावस्य अध्ययनम्।

प्राक्कल्पना –

छात्राणां भूगोलविषयाधिगमाय भ्रमणविधेः प्रभावः विद्यते।

शून्यप्राक्कल्पना

- यस्यां प्राक्कल्पनायां चराणां मध्ये सम्बन्धः शून्यत्वेन स्वीक्रियते सा प्राक्कल्पना शून्यप्राक्कल्पना इत्यभिधीयते । इयं शोधप्राक्कल्पना ऋणात्मिका भवति ।

समस्या –

उच्चमाध्यमिकस्तरीयछात्राणां अधिगमस्तरस्य सर्वेक्षणात्मक-मध्ययनम्।

प्राक्कल्पना –

उच्चमाध्यमिकस्तरे बालकबालिकयोः अधिगमस्तरे सार्थकभेदः नास्ति।

उपप्राक्कल्पना

- संशोधना प्राक्कल्पनां नैकधा उपकल्पनारूपेण व्याख्यानं कृत्वा शोधकर्मणि परीक्षितुं शक्यते । संशोधनाप्राक्कल्पनाम् आधृत्य



ISSN: 2249-538X

एकाधिकप्राक्कल्पना निर्मीयते चेत् सा एव उपप्राक्कल्पना नाम्ना ख्यायते।

समस्या –

प्राथमिकविद्यालये अध्ययनरतानां छात्राणां अध्ययनस्तरस्य एकं सर्वेक्षणम् ।

प्राक्कल्पना –

- प्राथमिकविद्यालयीयछात्राणां बुद्धिशक्तिसामर्थ्यस्य तेषां प्रतिशतं गणितस्य स्तरे धनात्मक: सम्बन्ध: विद्यते ।
- वाचनग्रहणशक्ते: विद्यालयीयभाषा प्रोन्नते: च धनात्मक: सम्बन्ध: वर्तते ।
- संज्ञानात्मकचिन्तनस्य महाविद्यालयीयपरीक्षायाम् उत्तरोत्तरोत्कर्षस्तरे महत्वपूर्ण: सम्बन्ध: नास्ति ।

पर्यायप्राक्कल्पना

- शोधकर्ता शोधस्यारम्भवेलायां निर्मितप्राक्कल्पनां तिरस्कृत्य अन्यां प्राक्कल्पनां निर्माति चेत् सा पर्यायप्राक्कल्पना इति कथ्यते । अथवा द्वयो: परिवर्तनयो: मध्ये संख्याया: प्रामुख्यप्रतिपादनं भवति पर्यायप्राक्कल्पना ।

समस्या –

वायो: तुलना न सम्भवति ।

प्राक्कल्पना –

वायो: भार: वर्तते ।

उपसंहार:

प्राक्कल्पनाया: निर्माणं सम्यक्तया करणीयम् । एतदर्थं सावधानतया चिन्तनीयम् । अनुसन्धातार: समस्याया: केन्द्रं परित: प्राक्कल्पना निर्माणं कुर्यु: । तदनु सूचनाया: संग्रहणं कुर्यु: । संशोधक: स्वीकृतविषयस्य संबद्धं विस्तृतम्


ISSN: 2249-538X

अध्ययनं विधाय तर्कस्याधारेण प्राक्कल्पनां निर्मायात् । प्राक्कल्पनायां प्रयुक्ता: शब्दा: सरला: दोषरहिता: च भवेयु: । एवं समस्यासम्बद्धसूचनां संगृह्य निर्मितप्राक्कल्पनाया: परिष्कार: करणीय: ।

सन्दर्भग्रन्थसूची


1. **शैक्षिकानुसन्धानपद्धतय: - डा. चन्द्रकान्त:, चारुल प्रकाशन, नागपुर**
2. **Methodology of Educational Research – Lokesh Koul,** Vikas Publishing House Pvt. Ltd., Noida-01, U.P
3. **Statistical Methods in Medical Research – P. Armitage,** Blackwell Scientific Publications, Oxford and Edinburgh
4. **Educational Research (In Kannada) – Dr. N. B. Konguvad,** Vidyanidhi Prakashan, Gadag-01.
5. **Educational Research (In Kannada) – Dr. N. Laxmi,** Vidyanidhi Prakashan, Gadag-01.


**********



ISSN: 2249-538X

# प्राच्यमनोविज्ञानप्रतिष्ठापनम्

डा. प्रमोद कुमार बुढोलिया

यूनानदेशोत्पन्नमिदं पाश्चात्यमनोविज्ञानं प्लेटो-सोक्रेटिस-अरिस्टाटलप्रभृतिदर्शनविदुषां चिन्तनैः 'psychology' इति नाम्ना दर्शनाङ्गतया आत्माध्ययनशास्त्ररूपेण आविर्भूतम्। कालान्तरे शास्त्रमिदं बहुविधपरिवर्तनैः **आत्मनः विज्ञानरूपं** (Science of soul) त्यक्त्वा **मनसः विज्ञानं** (Science of mind), ततः **चेतनायाः विज्ञानं** (Science of consciousness), ततश्चाधुना **व्यवहारस्य विज्ञानम्** (Science of behaviour) इतिरूपेणोपपन्नं वर्तते । साम्प्रतमिदं मनोविज्ञानं प्राणिनां व्यवहारस्य (behaviour) मानसिकदैहिकप्रक्रियाणाञ्च (Mental and physiological process) अध्ययनं कुर्वदस्ति ।

सर्वाभिमतप्रत्ययोऽस्ति यत् दर्शनशास्त्रं विभिन्नविज्ञानानाम् उत्पत्तिमूलकमिति। मनोविज्ञानमपि तन्मूलमेवेति वेद्यम्। दर्शनशास्त्रमस्योत्पादकमेव न, अपि तु बहुकालं यावत् दर्शनशास्त्रविचारसरण्या प्रभावितमप्यासीत्। इतिहासः साक्ष्यं वहति यत् प्रारम्भे पाश्चात्यमनोविज्ञानस्यात्ममनश्चेतनादीनां विज्ञानरूपेण तत्तत् काले अङ्गीकृतिः आसीत्।

प्राच्यैः भारतीयैः न केवलं प्रमाणविषयकं चिन्तनं विहितम्, अपि तु मनोविज्ञानसम्बन्धिनां मनोबुद्धिचित्ताहङ्काराणाम्, प्रकृतिपुरुषयोः, आत्मपरमात्मनोः, कारणकार्ययोः, हेतुहेत्वाभासानाम्, स्मृति-अनुभव-भ्रमाणां विषयेऽपि सूक्ष्मावलोकनं कृत्वा अनेके सिद्धान्ताः आविष्कृताः । इमे मनोविज्ञानसिद्धान्ताः सांख्ययोगन्यायवेदान्तमीमांसादिशास्त्रेषु बौद्धजैनागमेषु तत्सम्बन्धिष्वन्येषु च ग्रन्थेषु विकीर्णाः विद्यन्ते। पाश्चात्याः अपि मनोविज्ञानक्षेत्रे नवीनैराविष्कारैः अद्भुतं नैपुण्यं प्रदर्शयन्तः नवनवरहस्योद्घाटनाय प्रायतन्त।


ISSN: 2249-538X

तेन मनोविज्ञानविषयकं प्रभूतं साहित्यं निर्मितमभूत्। स्वतन्त्रताप्राप्तेरनन्तरं भारते पृथक्तया मनोविज्ञानाध्ययनस्य प्रारम्भः सञ्जातः। साम्प्रतिकाः विद्वांसः भारतीयं साहित्यमधीत्य तस्य पाश्चात्येन तौलनं कुर्वाणाः द्वयोरपि दाक्ष्यं प्राप्तुं सचेष्टाः वर्तन्ते, यतः ज्ञानविषये देशकालादिनिष्ठाः भेदाः व्यर्था एव।

भारते मनोविज्ञानविषयकं यत्किञ्चित् कार्यमतीतकालेऽभूत् तद्दर्शनशास्त्रस्याङ्गभूतमेव। प्राचीनकाले प्रयोगार्थमुपकरणानामभावात्, वैज्ञानिकप्रक्रियायाः अपरिचयात्, मनोवैज्ञानिकनिष्कर्षाणां प्रयोगाय तथाऽवसरो नासीत् यथाधुनिके युगे वर्तते। साम्प्रतं पाश्चात्यदेशेषु सर्वेषामपि सिद्धान्तानां प्रयोगार्थं यन्त्राणि विविधानि अन्यानि चोपकरणानि निर्मितानि सन्ति।

सर्वेषामपि देशानां साहित्ये विचारसरणौ च तत्रत्यायाः जीवनपद्धतेः प्रभावो दृश्यते। भारते दुःखान्तानां नाटकानां सृष्टिः ग्रीकदेश इव नोपलभ्यते, साहित्ये आत्महत्यानां चर्चैव नास्ति। एवमेव मनोवैज्ञानिकविचारेष्वपि भारतीयदर्शनस्याप्यभावः स्पष्ट एव। सिद्धान्तपक्षोऽत्रत्यो गरीयान्, प्रयोगपक्षस्तु पाश्चात्यानाम्। वस्तुतः प्रयोगादिपुरस्सरं यथेदं शास्त्रं पाश्चात्यैः प्रपञ्चितं न तथा भारतीयैः। भारतीयास्तु विचारमुख्याः शास्त्रवादिनः। पाश्चात्याः प्रयोगमुख्याः यन्त्रधारिणः। वस्तुतः मनोविज्ञाने प्रयोगावसरो भौतिकविज्ञानापेक्षया न्यूनतरो भवति। यथा विषाक्तस्य भोजनस्य मनसि प्रतिकूलोऽस्वास्थ्यकरो प्रभावो भवतीति तस्य परीक्षणाय विषाक्तं भोजनं कस्मैचिदपि मनुष्याय प्रदातुं नाधिकृतो वैज्ञानिकः। कदाचित् तीव्रेण केनचिच्छोकावेगेन मानसिकं सन्तुलनं विहाय जनो निक्षिप्ततामुपैतीति तस्य परीक्षणाय तादृशे शोकावेगे कमपि पुरुषं निक्षेप्तुं न प्रभवति कश्चिदपि मनोवैज्ञानिकः। लोकोत्तरप्रतिभाशालिनः कस्यचित् पुरुषस्य मस्तिष्करचनायां किं वैशिष्ट्यं विद्यते इति परीक्षणाय मण्डूकस्याङ्गविच्छेदवत् तत्र शल्यक्रिया नानुज्ञायते। एवं मनोविज्ञाने बहुषु विषयेषु सप्रतिबन्धः प्रयोगावसरः इति।


ISSN: 2249-538X

किञ्च मनोविज्ञानेऽधिकृताः विषयाः सर्वे सदानुभवगम्या अपि न भवन्ति। यथा भावावेशे कोऽहम् इत्यात्मनोऽपि स्मृतिदुर्लभा। क्रोधसमये क्रोधस्य परीक्षारम्भे क्रोध एव शाम्यति। क्रोधादिभावाः परीक्षासमये पलायन्ते। भावपरीक्षणे भावो हि विलीयते। तथापि किञ्चिन्मात्रस्मृत्या च बारम्बारं स्वात्मन्यपरे वा विलोक्य तज्ज्ञानं भवति। भये असति भयकल्पनां, हासे असति हासकल्पनां, वीरत्वे असति वीरत्वकल्पनां कृत्वा नाटकादिलेखकाः केवलया कल्पनया ताः चेष्टाः सर्वेषु रसेषु भावेषु च विडम्बयन्ति ।

विशिष्य कौटिल्यार्थशास्त्रे अनेके मनोवैज्ञानिकांशाः द्रष्टुं शक्याः। गीताशास्त्रेऽपि श्रीकृष्णस्योपदेशमीमांसया व्यवहारिकमनोविज्ञानस्य सुस्पष्टावबोधनं जायते। वेदोपनिषद्दर्शनादिषु मनो-आत्मा-अहं-चेतनाचेतन-प्रमाण-प्रमेय-ज्ञानादिविषयाणां पृथक्पृथक् दृष्टिकोणैः चर्चा विहितास्ति। तत्र तावत् मनोविद्याविषयकं वाक्यजातं मनस्तत्त्वविषयकम् आलोचनञ्च प्राचुर्येण परिलक्ष्यते।

डा. जायसवालेन [1] ब्रेटवर्यस्य 'History of psychology' इत्याख्यस्य ग्रन्थस्य निर्देशः कृतः, यश्च भागत्रये प्रकाशितः। ग्रन्थस्यास्य प्रथमभागे अष्टादशाध्याये भारतीयमनोविज्ञानस्य उल्लेखः विद्यते। तेन वेदान्त-साङ्ख्य-न्याय-वैशेषिक-बौद्धादिदर्शनेषु मनोविज्ञानस्य स्वरूपं प्रकाशितम्। ग्रन्थोऽयमधुना अलभ्यः तथापि इदं तु स्पष्टमेव यत् भारतीयमनोविज्ञानपरम्परामयं पाश्चात्योऽपि उररीकरोति। 'Asian psychology' इत्यस्मिन् पुस्तके मर्फीवर्यः (Gardners Murphy) एशियाखण्डस्य मनोविज्ञानपरम्परां वर्णयन् भारतीयपरम्परामपि असूचयत्। किञ्च परान्जपे (A. C. Paranjpee) इत्यनेनापि भारतीयमनोविज्ञानस्य विविधस्वरूपाणां प्रदर्शनं सुष्ठु व्यधायि।

---

[1]. मनोविज्ञान की ऐतिहासिक रूपरेखा


ISSN: 2249-538X

वेदेषु मानवव्यवहारस्य (शारीरिकं मानसिकञ्च) कारणानां, प्रेरकाणां, नियन्त्रकतत्त्वानाञ्च विषये विपुला सामग्री उपलभ्यते। उपनिषत्सु मानवव्यवहारस्य व्याख्या अन्नमय-प्राणमय-मनोमय-विज्ञानमय-आनन्दमयादीनां पञ्चानां कोषाणामाधारेण कृताऽस्ति। प्राणमयकोषे मानवस्य शारीरिकक्षमता प्राणशक्तिश्च, मनोमयकोषे मनः, विज्ञानमयकोषे बुद्धिश्च अन्तर्भवति। एतेषां पञ्चकोषाणामेकैकस्यापि सम्बन्धः मानवानां सर्वाङ्गीणविकासेन सह वर्तते। यथा-

शारीरिकविकासः – अन्नमयकोशः।
भावात्मकविकासः – प्राणमयकोशः।
मानसिकविकासः – मनोमयकोशः।
बौद्धिकविकासः – विज्ञानमयकोशः।
आध्यात्मिकविकासः – आनन्दमयकोशः।

किञ्च हितोपदेशपञ्चतन्त्रादिनीतिग्रन्थानां सुभाषितानां च गूढालोचनेन प्राच्यमनोविज्ञानस्य व्यावहारिकस्वरूपस्य निदर्शनं जायते इति तदत्रालोच्यते।

परेषां मनोगतभावानां ज्ञानं विदुषा कार्यम् —

**आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।**
**नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः।।**[1]

**यस्य यस्य हि यो भावस्तेन तेन समाचरेत्।**
**अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्।।**[2]

**उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः।**
**अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः।।**[3]

---

[1]. प. त., मित्रभेद, 45

[2]. प. त., मित्रभेद, 74

[3]. प. त., मित्रभेद, 44


ISSN: 2249-538X

स्वभावस्य विषये हितोपदेशे -

**यो यस्य स्वभावो हि स्यात् तस्यासौ दुरतिक्रमः।**
**श्वा यदि क्रियते राजा स किन्नाश्नात्युपानहम्॥**[1]

**न धर्मशास्त्रं पठतीति कारणं**
**न चापि वेदाध्ययनं दुरात्मनः।**
**स्वभाव एवात्र तथाऽतिरिच्यते**
**यथा प्रकृत्या मधुरं गवां पयः॥**[2]

**सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।**
**अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते॥**[3]

प्रीतिलक्षणञ्चोक्तम् -

**ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।**
**भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥**[4]

**दूरादवेक्षणं हासः सम्प्रश्नेष्वादरो भृशम्।**
**परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु ॥**
**असेवके चानुरक्तिर्दानं सप्रियभाषणम्।**
**अनुरक्तस्य चिह्नानि दोषोऽपि गुणसंग्रहः॥**[5]

अन्यच्च खलस्य विषये -

**प्राक्पादयोः पतति खादति पृष्ठमांसं**
**कर्णे कलं किमपि रौति शनैर्विचित्रम्।**
**छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः**
**सर्वं खलस्य चरितं मशकः करोति॥**[6]

---

[1]. हि. प., विग्रह. 58

[2]. हि. प., मि.ला. 17

[3]. हि. प., मि.ला. 20

[4]. प. त., 2-51

[5]. हि. प., सुहृ., 59 - 60

[6]. हि. प., सुहृ., 80


ISSN: 2249-538X

## प्राच्यपाश्चात्यमनोविज्ञानयोः तोलनम्

प्राच्यमनोविज्ञानिनः विचारमुख्याः चिन्तनानुभववादिनः। एतेषां मते आत्मा उत मनस्तत्त्वमेव प्रमुखः विचार्यविषयः। पाश्चात्याः प्रयोगमुख्याः यन्त्रवादिनः। तन्मते जीवव्यवहारस्याध्ययनमेव मनोविज्ञानविषयः। पाश्चात्यैः प्रयोगशालासु अनेकविधैः यन्त्रप्रयोगैः गवेषणं व्यवहारादीनाञ्च परीक्षणं विधीयते। प्राच्यैस्तु शास्त्रगवेषणाम् उपालम्ब्य अर्वाचीनमनोविज्ञाना-वश्यकतानुगुणं चिन्तनानुभवैः नूतनतथ्यानि आविष्क्रियन्ते। प्राच्यमनोविज्ञानस्याधारस्तावदाध्यात्मिकः पाश्चात्यानान्तु भौतिक इति। पाश्चात्यमनोविज्ञाने मनोविज्ञानवाचकस्य 'psychology' इति शब्दस्य आत्मविचारार्थकत्वादात्मैव पूर्वं मनोविज्ञानस्य विषयः आसीत्तदा मनोविज्ञानं दर्शनशास्त्रस्याङ्गभूतमवर्तत। परं विज्ञानस्य प्रचारेण प्रसारेण सह वैज्ञानिकाध्ययनव्याजेन यदा भौतिकवादः प्रवर्धितः तदा दर्शनमनोविज्ञानयोः सम्बन्धोऽपि नष्टः। गच्छत्कालेन विज्ञानस्य प्रभावात् नात्मा, न मनः, नापि चेतना मनोवैज्ञानिकाध्ययनस्य विषयः, अपि तु जडवादिभिः अनुस्त्रियमाणायां प्रक्रियायां व्यवहार एवास्यविषयतामभिप्रपेदे। तत्र च चरमो व्यवहारवादः चेतनादिसम्बन्धं सर्वथैव परिहृत्य मनोविज्ञानस्य विषयमभ्युपगच्छतीति ।

## परिशीलितग्रन्थसूची


1. कृष्णकुमार (1999). प्राचीन भारत की शिक्षापद्धति, सरस्वतीसदन, सफदरगञ्ज, दिल्ली ।

2. डा. दीवानचन्द (1972). दर्शन संग्रह, गुरूविद्या प्रकाशन, मथुरा ।

3. प्रभुदयाल अग्निहोत्रि, (1973). अर्वाचीनं मनोविज्ञानम्, सम्पूर्णानन्दसं. वि. वि. वाराणसी ।

4. रामशकल पाण्डेय (2006). शिक्षा मनोविज्ञान, आर. लाल बुक डिपो, मेरठ।

5. विष्णु शर्मा, पञ्चतन्त्रम्

6. नारायण शर्मा, हितोपदेशः

7. कौटिल्य, अर्थशास्त्रम्


**********



ISSN: 2249-538X

ISSN: 2249-538X

# राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्

## राजीवगान्धीपरिसरः

शृङ्गेरी – ५७७ १३९